प्रवेश सं०

विषयः धर्मशास्त्र

क्रम सं०

नाम त्रिंशच्छ्लोकी विवृत्तिः

1:890

ग्रन्थकार रघुनाथः

पत्र सं० १-५८५

श्लोक सं०

अक्षर सं० (पंक्तौ) ३२

पंक्ति सं० (पृष्ठे) ७

आकारः ८.२ x ३.५

लिपिः दे.ना.

आधारः का.

वि० विवरणम् पू.

सम्वत् १८३१

आ. ८१६४

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५०,०००

Indira Gandhi National Centre for the Arts

रुं॰ ८ रघुनाथ भट्टी पंत्रें रात्र श्लोका टीका पत्राणि ८५ वे॰ १९ ।२

त्रि.टी. १ श्रीगणेशाय नमः॥ ॥ॐ॥ प्रणम्य रामं हेरंबं पितरौ च तथा। रघुनाथः प्रकुरुते
त्रिंशच्छ्लोकविवेचनं॥१॥ निमित्तभेदभिन्नाशौचप्रतिपादनेकेन चिक्रमेणावश्यक
त्वेप्यस्मिंस्तिष्ठेकरूपतदभावादुत्क्रममनुसृत्य गर्भपाताशौचं तावदाह गर्भेति। स्रु
तिः। गर्भग्रहणादारभ्य षष्ठमाससमाप्तिपावत्स्रावणोत्तुस्यन्तेऽत्र चेतनेन गर्भपतिते
मातैव गर्भपातमाससमसंख्यान्यहोरात्राण्यशुचिः। स्यात्तत्र तुर्ये चत्वारि पंचमे पंच १
षष्ठे षडित्यर्थः। आद्यमासत्रयेनेदं किं तु त्रिरात्रमविशेषेण। गर्भस्रुत्यां यथामास
मचिरेत्तमे त्र्यहं इति मरीचिस्मरणात्॥ अचिरे आद्यमासत्रये। उत्तमे। ब्राह्मणे। नन्व

चिरपदस्याद्यमासत्रयपरत्वे किं बीजमिति चेत्तं शृणु। आमासाभ्यंतरे यावद्गर्भस्रावो भ
वियदा। तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते इत्येतद्वाक्यविहितस्य षष्ठमासं यावन्मा
ससमदिवसाशौचस्य तदन्तःपातितस्त्राववविषयेण निरवकाशेन स्रावे मासतुल्यत्रिरात्रं स्या
दित्येतद्वाक्यविहितेन त्रिरात्राशौचेन बाधात् तन्मात्रविषयत्व यद्यपि प्रतीयते तथापि रि
वसेरितिवद्बहुवचनानुरोधात् त्रिरात्राशौचस्यैवाद्यमासत्रयविषयत्वं युक्तं। न च प्रथ
मास २ ममासमात्रे द्वितीयमात्रे तदुभयमेव वा तस्य विषय उक्तः। प्रथमे त्रिरात्रं द्वितीये द्विरात्र
मित्यनौचित्यात् प्रथमपक्षासंभवात्। अचिरशब्दानुरोधाद् द्विगसमवाययोगेऽणस्त्राव श

Indira Gandhi National Centre for the Arts

त्रि॰टी॰
२

वानुरोधाच्च प्रथमविषयत्वावश्यंभावाद्द्वितीयानुपपत्तेः। तृतीयविषयत्वे विरोधाभावेन तत्प
रिहाणाकांक्षाभावात्तृतीयानुपपत्तेः। गर्भमाससमारात्रीः संस्रवे गर्भस्य त्र्यहं वेति गौतमोक्त
पक्षद्वयस्य वचनांतरानुरोधात्प्रथमासमध्यविषयस्यावस्थासंभवेः व्यवस्थायोगात्। व्य
वस्थापेक्षायामचिरशुद्धौचित्यस्यायानुगृहीतेन समं स्यादश्रुतित्वादिति न्यायेनाद्योत्तम
मासत्रयविषयत्वे न व्यवस्थायामुक्तत्वाच्च। स्वपुरुषानिर्दिष्टतयग्रहणमुत्तरार्धे। व्यभिचार
जगर्भस्य पर्णप्रसवे पितुः संनिधसंनिधिसव्यवस्थितं चित्रात्रैकरात्रसत्त्वे न सपिंडानां च तथे २
वैकाहस्नानसत्त्वेन तद्ग्रहणे। निर्गमे नेषामेवाशौचाभावस्यौचित्यायातत्वात्। मातुस्तत्रापी



द्येव विशेषानुक्तेः। गर्भमात्रस्त्यनुवादः। तदा तदवस्थायानित्यप्राप्तत्वात्। स्नानं पिंडा
। सपिंडाः पित्राद्याः स्नानमुक्तास्तत्कालावच्छिन्नाशौचिनः। पूर्वोक्तविषये पंचमषष्ठौ वर्ज
यित्वा। तथा च स्मरणं। सद्यः शौचं सपिंडानां गर्भस्य पतने सतीति। अशुचित्वाभावे शौच
विधानानुपपत्तेर्निःकारणशौचासंभवाच्च सद्यः शौचं स्नानमात्राच्छुद्धिरित्यर्थः। यत्तु म
रीचिवचनं स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनमिति तत्सपिंडानां प्रकृतत्रिरात्राशौ
चाभावानुवादकं न तु सर्वथाशौचनिषेधकं। यदपि गर्भस्रावे मासतुल्या रात्रयः स्त्री
णां स्नानमात्रमेव पुरुषस्येति तदपि मात्राशौचविधायकं सत्पूर्ववदेवाप्राप्तमेव पितुः स्ना

Indira Gandhi National Centre for the Arts

त्रि·टि
२

नमत्रुवरति।नात्वितरेषांस्नानेनिवर्त्यतिवाक्यभेदप्रसंगात्।यद्यप्येतद्वा । क्यपर्यालोच
नयास्नानमाससमाशौचयोरेकविषयत्वं प्रतीयते तथापिवाक्यांतरबलाद्भिन्नविषयत्वं
कल्प्यमानं नदोषमावहति।अतएवचपः।षट्मासेषुत्वपंचमषष्ठाख्यमासद्वयेगर्भपा
तेसपिंडास्त्रिदिनमाशौचिनःस्युः तथाचमरीचिः।पातेमातुर्यथामासंसपिंडानांदिनत्रय
मिति।पातःपंचमषष्ठयोरितिचान्यतःस्यात्।अतःअंत्यमासद्वयादूर्ध्वंसप्तममासप्र
भृतिःगर्भनिर्गमस्तत्वह्नप्रसवनिमित्तेदशाहादिवर्णभेदेनस्यादितिवक्ष्यमाणमेवेनेण २
कांस्पार्थमुक्तं।अर्हेवतिः।तयाचषण्मासाभ्यंतरेऽस्मितरन्नंतरमतऊर्ध्वंस्वजात्यकल्पितं

साम्राशौचमिष्यतइतिस्मरणं।अत्रतासांग्रहणमुपलक्षणं।अतऊर्ध्वंप्रसूतिःस्या
दितिवाक्यात्सप्तमप्रभृतिचाविकलांगस्यजीवतो निर्गमदर्शनात्तत्रचलोके प्रसव
व्यवहारात्सप्तमप्रभृतिगर्भनिर्गमस्य प्रसवशब्दवाच्यत्वात्प्रसवेचसर्वेषांदशाहाद्या
शौचस्यदशाहंत्याद्यमाशौचंसपिंडेषुविधीयते।जननेप्येवमेवंस्यात्त्रिपुराणांशुद्धिमिच्छ
तामित्यादिषुकृत्वात्।चातुर्मास्ये।गर्भग्रहणात्प्रभृतिअत्रवयोनजन्मादिगर्भाष्टमा
दिवत्।तथाचगर्भग्रहणमासादारभ्यप्रसवपर्यंतंप्रसवमारभ्योपनयनपर्यंतंवावस्था
विशेषपुरस्कारेणायदाशौचमभिहितंवक्ष्यमाणंचतत्त्वनुणंणिवर्णानांतुल्यंभवतिनोपनी

Indira Gandhi National Centre for the Arts

त्रि.टी. तसपिंडमरणप्रसवाशौचवद्वर्णभेदाद्भिन्नमित्यर्थः। नहि धायकवचनेषु वर्णविशेषानुपा
४ दानात्। मातामहाचार्याद्याशौचवत्। तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति व्याघ्रपा
दवचनाच्च। अत्रापि पूर्वोक्तमेव वचः। पद्मामावधीणांतानुवादत्वेन वयोतिक्रांतग्रहणस्या
नुपात्तवर्णविशेषसर्वाशौचोपलक्षणत्वादुक्ताशौचसाधारण्यलाभः। आचार्याद्या
शौचसाधारण्यसिध्यर्थं तस्यावश्यकत्वात्। मूले तु तदेव वयः एवमोजस्येन व्याख्यान
संभवे विभज्यव्याख्यानमनुषंगाध्याहारापेक्षत्वादपव्याख्यानं ॥ १ ॥ जन्म। कृत्स्नं ॥ ज ४
न्माशौचांतरालेजननिमित्ताशौचपरिच्छेदकाहोरात्रमध्येनालच्छेदात्पूर्वकालेनालच्छेदा

नेतरं परिच्छिजीवतउत्पन्नस्य शिशोर्नेशानमुपरमः निःप्राणोमृत एव वा निःपतेदुत्पद्येत तदा
विषयद्वयेपि मातुः पित्रादीनां च जननजनितं जन्मनिमित्तमाशौचं कृत्स्नं दशाहाद्येवा
स्ति न तु वक्ष्यमाणेन शावाशौचेन निवर्त्तत इत्यर्थः। तथा च हारीतः। जातमृते मृतजाते वा
सपिंडानां दशाहमिति। जातमृत इति नालच्छेदादूर्ध्वं यावन्न च्छिद्यते नालं तावन्नाप्नोति सू
तकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति जैमिनिवचनात्। अस्य च वचनस्येत
त्प्रकरणपाठान्मृतस्पर्शिशावाध्याहृत्य योजना। प्राकूल. लकं। जीवत्सुतस्य नापि छेद
नान्नालच्छेदात्प्राक् त्रिधनमुपगतस्तत्र हि सर्वेषां पित्रादीनां ग्रहणे वशुद्धिं जनाननाशौ

Indira Gandhi National Centre for the Arts

चस्यासन्निकायामातस्करहचनानंतरोक्तेपिविषयेसकलंदशाहाद्येवजननाशौचं
सर्वविषयद्वयेत्वस्येवेत्यर्थः॥तथाचवृहन्मनुः॥जीवन्जातोयदितृतोमृतःसूतकएवतु
।सूतकंसकलंमातुःपित्रादीनांत्रिरात्रकमिति।ततोजननानंतरमेवनालच्छेदात्पूर्वमित्यर्थः
।प्रेतःसद्यः।प्रेतशब्देनतन्निमित्तमाशौचंलक्ष्यते।तस्यशुद्धिर्निवृत्तिः।सद्यःस्नानमात्रेणै
वत्रिष्वपिविषयेष्वित्यर्थः॥तथाचशंखः॥प्राङ्नामकारणात्सद्यःशौचमिति।सद्यस्त्वंचस्ना
नकालावच्छिन्नत्वमेवशंखोक्तयुक्तेर्विज्ञानेश्वरेणतथाव्याख्यानाच्च॥पंचदशाहाभ्यंत ५
रेबालेप्रमीतेतस्यबांधवैःशावाशौचंनकर्तव्यंसूत्याशौचंविधीयतइतिवृहन्मनुवच

नेतन्मरणाशौचनिषेधकं।प्राङ्नामकरणादितिचजन्माशौचकालोपलक्षणंत्राशौचां
तेनामकरणविधानात्।अतएवविष्णुवचनं।अनिर्वृत्तेदशाहेतुपंचत्वंपरिगच्छति।सद्यए
वविशुद्धिःस्यान्नप्रेतंनोदकक्रियेति।एतच्चानंतरंवक्ष्यमाणमपिजननजनितत्वविशेष
णस्यावस्यंप्रदर्शनार्थमुक्तं। २ स्नानंप्राङ्गमतः।परेतद्वितिसर्वत्रसंबध्यते।गतार्थं।अ
र्वाक्सद्यः॥नात्रिवर्षस्यकर्तव्याबांधवैरुदकक्रिया।जातदंतस्यवाकुर्यान्नाम्निवापि
कृतेसतीतिमनुवचनेसाहचर्यादुदकक्रियोपलक्षितस्यदाहस्यापिनामकरणोत्तरका
लिकत्वप्रतीतेर्नामकरणादूर्ध्वंदंतोत्पत्तेस्तत्कालादर्वाक्जन्मसप्तमेमासीत्युपनिष

Indira Gandhi National Centre for the Arts

त्रि॰टी

६

दर्शनात्प्रागमपास लक्षणाद्दर्वाक्परेते मृते ऽग्निदग्धे सत्यहः। अहोरात्रमाशौचं। अद
ग्धे तु न केवलं दर्वीक्त एव विषयो। अत्रापि विषये सद्यः स्नानमात्रं भवति। तथा च यमः। अ
दंतजाते तनये शिशौ गर्भस्रुते तथा। सपिंडानां तु सर्वेषामहोरात्रमशौचकमिति। याज्ञ
वल्क्योपि। आदंतजन्मनः सद्य इति। अनयोश्च कल्पयोर्वयस्यापेक्षायां अदंतजाते
बाले प्रेते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति विष्णुवचने ऽग्निसंस्कारनिषेधसाह
चर्यात्सद्यः शौचस्यादाहविषयत्वे ऽहोरात्रस्य दाहविषयत्वं पारिशेष्यादवगम्यते। तदुक्तं ६
।दंतजननोपरि आप्रवृत्तेः त्रिवर्षायावज्जायते तावत्पर्यंतं तृतीयवर्षे समाप्तिपर्यंतमि

र्थः। अभिविधौ वा आङ्। तृतीयवर्षमभिव्याप्येत्यर्थः। चौलभूम्ये परेते दग्धे अदग्धे वा
ऽहमहोरात्रमाशौचं। तथा च विष्णुः। दंतजाते ऽप्यकृतचूडे त्वहोरात्रेण शुद्धिरिति। दं
तजननोर्ध्वं दाहे ऽप्यहोरात्राशौचाभिधानं मिताक्षरानुसारेण। ममतु प्रतिभाति। अकृ
वा तचूडे वर्षे प्रेते गर्भपतने सपिंडानां त्रिरात्रमिति वसिष्ठोक्तत्रिरात्रस्याविशेषेणैकरात्रस्य
च वयोवस्थापेक्षायां प्राप्यकृतचूडे जातदंतस्तु संस्थितः। दाहयित्वा तथाप्यस्य माशौ
चं त्र्यहमाचरेदित्यंगिरोवचनाद्दाहे त्र्यहं अदाहे त्वहरिति। यत्तु वर्षत्रयादूर्ध्वं कुलध
र्मापेक्षया अकृतचूडो यस्तद्विषयत्वमंगिरोवचनस्य विज्ञानयोगिनोक्तं तदयुक्तं। जा

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ ७ तदंतपदवैयर्थ्यापत्तेः॥ नहि हरणे त्रिवर्षोपयत्ता तदंतः संभाव्यते। इदमेवाभिप्रेत्याशौचदशकारादिदमेवोक्तं॥ यत्तु स्मा चूडा त्रैशिकी स्मृतेत्याशौचे चूडाग्रहणस्य कालोपलक्षणत्वात्तृतीयवर्षस्य च तत्कालत्वादंतेजननकालात्सप्तममासादूर्ध्वं वर्षद्वयाभ्यंतरे एकाहरात्रिप्राच्चैरुक्तं तदयुक्तं। कालोपलक्षणत्वासंभवस्य वक्ष्यमाणत्वात्। तत्त्वेपि यद्यपि यघि डांतन्यायात्तृतीयवर्षोपक्रमस्यैवावधित्वं प्राप्नोति तथापि विप्रैस्तु त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकीत्यंगिरोवचनबलात् तदंतस्यैवावधित्वं युक्तं। यत्तु वसिष्ठवाक्ये कृतनहि ७
वर्षग्रहणे तत्तस्य निखननपक्षस्य मुख्यत्वाद्दाहाभावेन त्रिरात्रप्राप्तेर्नहि विद्धारा

तस्यापि पाक्षिकदाहविधिद्योतनार्थं। अन्यथा तन्मते व्यानर्थक्यात्। परस्य न हि वार्षिके वालेप्रेतत्वमनुगच्छतीत्यादि यमवचने एकाहविधौ तद्ग्रहणं तदुपेतस्य निखननमुख्यत्वद्योतनार्थं तादृतस्य च दाहमुख्यत्वद्योतनार्थमिति विवेकः। सद्यो॰ रात्रं॥ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः प्रथमेब्दे तृतीये वा कर्तव्यं श्रुतिचोदनादिति ततः संवत्सरे पूर्णे चूडाकर्म विधीयते। द्वितीये वा [redacted] तृतीये वा कर्तव्यं स्मृतिदर्शनादिति च मनुयमवचने प्राप्प्रथमाब्दादावपि चूडाकरणस्योक्तत्वादंतजननादूर्ध्वं सत्त्वोले कृतचौलपरेतवर्षत्रयमध्येपि त्रिरात्रं। तथा च मनुः। नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता। निर्वृ

Indira Gandhi National Centre for the Arts

त्रि·टी:
८

नचइकानां तु त्रिरात्राच्छुद्धिरिष्यत इति। चूडाकरणं तु नामकर्मदंतजननवन्न कालोपलक्ष
णं। तस्यानियतकालत्वेन कालविशेषस्योपलक्षयितुमशक्यत्वात्। न च नामधेयं दशम्यां
तु द्वादश्यां वापि कारयेत्। पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्वित इति मनुवचनान्नामकर
णमप्यनियतकालमिति वाच्यं। तस्याशौचांतपरत्वात्। तथा हि॥ दशम्यां रात्रावतीतायां ब्रा
ह्मणः द्वादश्यामतीतायां क्षत्रियो नामधेयं कुर्यात्॥ इदं चोपलक्षणं। वैश्यस्य द्वे षोडशे
एकत्रिंशे च। एवं सत्यनेन प्रकारेण स्वस्वाशौचांते नामकुर्यादित्युक्तं भवति। पुण्य इत्यादि ८
स्त्वनुकल्प इति तस्यार्थः। यत्तु तिथिपरत्वेन सर्वं तेनास्य व्याख्यानं कृतं तत्सकलगृह्यस्य

तिविरोधादनुपाख्यानमेव। यदपि मेधातिथिना रात्रिविशेषणत्वात् स्त्रीलिंगो दशमीद्वा
दशीशब्दावहोरात्रपरौ कृत्वा वचनद्वयादाशौचमध्ये पि जातकर्मवन्नामकर्माप्याद्यपक्षे
कर्तव्यं। अत्र द्वाहारोपलक्षणत्वयोः प्रमाणाभावादित्युक्तं। तदप्ययुक्तं। प्रमाणाभावासि
द्धेः। आशौचव्यपगमे नामधेयं। आशौचे व्यतिक्रांते नामकर्म विधीयत इत्यादि विष्णुशं
खादिवचनसद्भावात्। दशम्यामुत्थाप्य पिता नाम कुर्यादित्यादि गृह्येषु च सूतिकोत्थानानं
तरकालविधानात्। यच्च रुद्रधरेण सत्यपि चूडाकरणस्य प्रथमवर्षादिकालत्वे विधेयस्ये
त्रिभिर्वर्षैर्मृतेऽप्युद्धिस्तु नैशिकीत्यादिवाक्ये तृतीयवर्षात्पूर्वं महोरात्राशौचविधानान्नैकं

Indira Gandhi National
Centre for the Arts

त्रि·टी· वाक्यतया तृतीयवर्षमेवाचूडान्नैशिकीस्मृतेत्यादिवचनेष्वपि गृह्यत इत्युक्तं तद्दर्शनद्विवर्ष इ पृ १
२ त्यादिवसिष्ठादिवाक्येस्त्वेव त्रिरात्रस्यापि विधानादयुक्तं। तृतीयाद्युत्सर्गतश्चौलकालः प्र १२२
थमाब्दादिस्तु कुलधर्मापेक्षयापवाद इति द्वारलतादिवचनं तु चूडाकर्म द्विजातीनामित्य च प्रथ
म तृतीययोस्तुल्यवन्निर्देशाच्चूडाकार्या यथाकुलमित्यादिषु च कुलधर्मप्राप्तत्वेनैव सर्वेषां
निर्देशाद्यत्किंचिदेव। तस्मान्नामकर्मादेरंतरं जननयोरेव कालोपलक्षणत्वं न तु चूडाकरणस्य।
एवमुपनयनस्यापि। वचनबलात्तु त्रिवर्षादूर्ध्वमकृतचूडस्यापि त्र्यह इति। यत्तु वाचस्पतिना २
यमवचने संवत्सरे पूर्णे इत्येव द्वितीयलाभात्तत्पदानर्थक्यपरिहारस्यानुनदृष्ट्यानयवपरत्वमि
हार्थं तत्र पूर्णे इत्यनुपपन्नं तृतीयपदानर्थक्यपरिहारार्थं तस्य तृतीयवर्षचरमावयवपरत्वं इ

ति व्याख्याक्लेशः कृतः सोकारणस्यैवाज्ञाननिबंधनः। त्रिदिनं ब्रतात्। तृतीयवर्षादूर्ध्वमाब्रता
दुपनयनपर्यंतमितरत्यापि कुलधर्मापेक्षयाऽकृतचौलेपि परेते त्रिदिनं। कृतचौले तु प्राग्वदु
पनयने सर्वदा त्रिरात्रमुक्तमेव। तथा चांगिराः। यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः। दा
हयित्वा तथाप्येनमाशौचं त्र्यहमाचरेदिति। इदं च [redacted] वचनं विप्रे स्यन त्रिवर्षे तु मृते शुद्धिस्तु
नैशिकीति तेनैवाभिहितत्वात्पूर्णत्रिवर्षाकृतचूडविषयमिति मिताक्षरोक्तेरस्मिन्नर्थे
भवति मूलं। द्वितीयपक्षेपीदमेव मूलं। न च तस्मिन्पक्षे एतस्य वाक्यस्य त्रिवर्षात्रिवर्षोभयवि
षयत्वेन त्रिवर्षे व्यवस्थाविषयसमर्पकत्वाद्दाहयित्वेति विवक्षितं। त्रिवर्षे तु दाहस्य नित्यत्वा

Indira Gandhi National Centre for the Arts

त्रि॰टी
१० दविवक्षितमितिवेदितव्यंस्यादित्याशयः। अत्रिवर्षविषयादेवास्मादूर्ध्वंसपिण्डापेनास्याप्यर्थस्य
सिद्धेः। अत्र शौचं। आत्रनादितिशब्दाविधिसमर्पकत्वेनात्रापिसंबध्यते। मध्यगतत्वेनविशेषा
ग्रहणादपेक्षितत्वाच्च। उपनयनात्प्रभृतिउपरमेधाम्नाणत्वादिजातिनिमित्तंदशाहादिकमशौचं
तत्सपिंडानांभवतीतिवक्ष्यमाणमेवमेराकांक्ष्यार्थमुक्तं। तथाचयाज्ञवल्क्यः। त्रिरात्रमा
११ व्रतादेशाद्दशरात्रमतःपरमिति॥ दशरात्रमितिजात्याशौचोपलक्षणं। अशौचमित्यत्रशो
चशब्दस्यनञ्समासः। तेननोभयपदवृद्धिः। अर्वाचिनस्यापुत्रस्योद्वावचाशौचस्यमाता नो॰ १०
पित्रोरपिप्रसक्तावाह। मातापितरौ। नाम्नः प्राउक्तस्याशौचस्यनापवादः। किंत्वदंतजांघुक्त

स्येवेतिप्रदर्शनार्थमदशनग्रहणं। नतुसदशनस्याहत्यर्थः। नामकरणादूर्ध्वंयावदुपनयनंपु
त्रैअपत्येपरेतेवयोवस्थादिविशेषानाश्रयणेनमातापित्रोस्त्रिदिनमाशौचं। पुत्रग्रहणमु
पलक्षणं। बालानामजातदंतानांत्रिरात्रेणशुद्धिः। वैजिकादभिसंबंधादनुरुंध्यादघंत्र्यहमि
तिचसामान्येनस्मरणात्। संनिचेष्टे। संनिधिशब्देन ~~[illegible]~~
तेसउअते। तादृशसंनिधौनष्टेचेष्टेमृतेपूर्वोक्तंजात्याशौचमतिरिक्तंसकलेमरणाशौ
चंभवति। नचप्रथमादिनश्रवणापूर्णतद्दिनाशौचदिनमध्यश्रवणेतच्छेषः। अतिक्रां
तेत्वाशौचकालेश्रवणेजात्याशौचवन्नास्तीत्यर्थः। तथाचव्याघ्रपात्। उपनीतेतुविषमं

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ स्मिन्नेवातिकालजमिति। वक्ष्यमाणदशाहाशौचभ्रमतीति विशेषणेनाचार्यादिमरणवदनुपनी
११ तमरणेप्यतिक्रांताशौचनिषेधे सिद्धेपि वक्ष्यमाणेन द्विवर्षविषयमातापितृसोदरदशाह
पक्षेप्यनुपनीतोपरमनिमित्तत्वादतिक्रांताशौचं नास्तीति प्रदर्शनार्थमिदमुक्तं २ ऊन
द्विवर्षउभयोः सूतकं मातुरेवहीत्यस्य विज्ञानेश्वरकृतं प्रथमव्याख्यानमभिप्रेत्याहुःकेचि
शाहं। योगीश्वरवाक्ये ऊनद्विवर्षग्रहणस्याप्यूनेष्वाब्दग्रहणमस्मिन्पक्षे न तु पूर्णद्वि
वर्षस्याहत्यर्थं तत्राशौचस्य सुतरां तावत्त्वात्। तस्मिन्नसंनिधौ तेन जनिकरस्यापितुर्जनन्याः ११
सोदराणां च दशाहमाशौचं। इतरसपिंडानां तत्रूं। इदं च पित्रोर्जननादूर्ध्वमेव सोदराणां त

नामकरणादूर्ध्वं वेदितव्यं। तथा च पैठीनसिः। गर्भस्थे प्रेते मातुर्दशाहं जाते उभयोः कृते नाम्नि सोदरा
णां चेति॥ जन्माशौचकालमध्ये सद्यः शौचप्रतिपादके केस्तु ऊर्ध्वं च त्रिरात्रादिप्रतिपादके मन्वा
दिवाक्ये विरोधाल्लोकविद्विष्टत्वाच्चास्य पक्षस्य निबंधकारैरनादराद् ऊनद्विवर्षपदं वैय्यर्थ्या
पत्तेश्च याज्ञवल्क्यवचनस्य तत्परत्वेन व्याख्यानस्य सुतरामयुक्तत्वाद्द्वितीयव्याख्यानमभि
प्रेत्याहुर्यद्वाराचं॥ इह विषये तु न द्विवर्षमनेपि त्रोः अस्पृश्यत्वमितरेषां स्पर्शयोग्यत्वमे
वेतरसपिंडापेक्षयाधिकं। अस्पृश्यत्वस्य चावधिं वक्ष्यति अर्थानिधने इत्यादिना। आशौ
चे तु कर्मानधिकाररूपं पित्रोस्त्रिरात्रं सोदराणां त्वितरसपिंडवदेव न तु दशाहं। एवं च पित्रि

Indira Gandhi National Centre for the Arts

त्रि॰टी॰
१२

तरसपिंडानामनह्यद्दोषा इमे । अनुगमनमिपमवक्तास्यस्य श्यता किं तर्हि त्रिवर्षोपरम एव
वक्ष्यमाणावधिकासेसुक्तं भवति । तथा च स्मृत्यंतरं । तु न हि द्विवर्षे संस्थिते उभयोरेव नेतो भा
मिति । इदं च कर्मानधिकारलक्षणस्याशौचस्यानिषेद्धुमशक्यत्वादस्पृश्यत्वस्यैव निषेध
कं । स तकं मातुरेव हीत्येवमेव व्याख्यानार्थमिताक्षरापर्यालोचनया विज्ञानयोगिनोपीद
मेव व्याख्यानमभिप्रेतमिति लक्ष्यते । अर्वागित्यादिनोक्तास्येतरसपिंडाशौचस्य कन्यावि
षयेपवादमाह । स्त्रीषु । कालात । नाम्नक ध्वं आश्वौराचौलपर्यंतं अकृतचौलासु स्त्रीषु १२
प्रेतासु त्रिपुरुषविषये कूटस्थादारभ्य पुरुषत्रयपर्यंतं सपिंडः स्नानेन शुध्येत । तथा चाप-

स्तंबः । अचूडायां तु कन्यायां सद्यः शौचं विधीयते इति । वसिष्ठोपि । अप्रत्तानां तु स्त्रीणां त्रिपु
रुषी विज्ञायत इति । तृतीयवर्षपरं कालग्रहणमुत्तरार्थं तृतीयवर्षादूर्ध्वं कुलधर्मवशेना
कृतचूडायास्त्र्यहोरात्रस्येष्टत्वात् । न तु सद्यः शौचप्रतिपादके आपि वाक्ये कालोपलक्ष
णप्रदर्शनपरं तस्य एवं क्रियमाणे प्रथमवर्षकृतचूडाया अपि सद्यः शौचप्रसं
गात् । तस्माद्यदा कदाचित् क्रियमाणचौलपर्यंतं सद्यः शौचं तदूर्ध्वं यावद्वाग्दानमहोरात्रं ।
तृतीयवर्षादूर्ध्वं त्वकृतचूडायामपि यावद्वाग्दानमेवमपत्ये त्र्यहं वन्हिर्यामेकाहरन्ये
तावद्विवक्षितं । अर्वाक्तोद्धा चौलात्तृतीयवर्षाद्वोर्ध्वं वाग्दानं यावत् स्त्रीषु प्रेतासु त्रिपुरु

Indira Gandhi National Centre for the Arts

त्रि॰री॰ १३ षविषये ज्ञातिरहोरात्रेण शुध्येत। तथा च याज्ञवल्क्यः। अहस्त्वदत्तकन्यासु बालेषु च वि-
शोधनमिति। इदं चाकृतचूडायां सपिण्डाशौचविधानात् ऊर्ध्वं अविशेषेण वर्णानामवाक्सं-
स्कारकर्मणः। त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्ना विधीयते। त्वं गिरोवचनेन तु पुमप-
त्ये त्रिरात्रेण तत्र कन्यास्वहोरात्रं शुध्येत। तथा च मरीचिः। अवारिपूर्वं प्रदानात्पानेवप्र-
तिपादिता। असंस्कृतानुसा ज्ञेया त्रिरात्रमुभयोः स्मृतामिति विवाहादूर्ध्वं तु वक्ष्यति ४ १३
जन्म॰पक्षे। जन्मनि पूर्णप्रसवे उपेत एवोपेत उपनीतस्तन्मृत्यौ पित्रादेस्त्र्यहमतस
पिंडाद्ब्राह्मणक्षत्रियवैश्यशूद्रा वर्णाः क्रमेण दश द्वादश पंचदश त्रिंशत्संख्याहोरात्राण्य
विधानादर्तीयवर्षादूर्ध्वं वाकृतचूडायामपि प्रवर्तत इति निबंधॄणामभिप्रायो लक्ष्यते। त्रि॰भि॰ सर्कं वा
वाग्दानादूर्ध्वं उपयमनाद्विवाहाद्दत्ता कन्या स्त्रीषु प्रेतासु भर्तृगोत्रे स्वकं पितृगोत्रे समपर्यन्तं त्रिभिरहोभिः ४

शुचयः स्युः। उचितकृतद्विजस्तु स्वधर्मानुष्ठानपरः शूद्रस्तु पक्षं पंचदशरात्रमशुचिः
स्यात्। तथा च याज्ञवल्क्यः। दशरात्रमतः परं। त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते। क्ष-
त्रस्य द्वादशाहानि विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः इति। उपने-
यनस्य वश्यविधित्वं त्रैवर्णिकपुरुषविषयं। स्त्रीशूद्रयोस्तु विवाहस्य वश्यविधित्वं जा-
त्याशौचे वयोनिमित्ताशौचे चोत्तरावधित्वं द्रष्टव्यं। वैवाहिको विधिः स्त्रीणां मौपनायनि-
कः स्मृतः इत्यस्योपनीतपुरुषाधिकारिकधर्मेषु स्त्रीणां विवाहितानामधिकारप्रतिपादना-
र्थत्वात्। ततो दत्तानां भर्त्रे रेव हि। स्वजात्युक्तमशौचं स्यात्सूतके जातके तथेति ब्रह्मपुराणीय

Indira Gandhi National
Centre for the Arts

त्रि·टी· विशेषवचनाच्च। स्त्रीशूद्रयोश्च समानधर्मत्वात्। बहुकालमविवाहितस्य शूद्रस्य षोडशाद्
२४ ऊर्ध्वं मासाशौचं। अत एव मार्यः शूद्रस्तु षोडशाब्दात्परात्परं। मृत्युं समधिगच्छेच्चेन्मासात्तस्य
पिवांधवाः। शुद्धिं समधिगच्छंतीत्यत्र कार्या विचारणा इति शांखस्मरणात्। अत्र दक्षस्मृतौ
सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा। षड्दशद्वादशाश्चैव पक्षो मासस्तथैव च। म ह।
६३ रणांतं तथा चान्यद्दश पक्षास्तु सूतकैः। उपन्यस्य अर्थतो विजानाति वेदमंगैः समन्वि
तः। सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकं। एकाहाद्ब्राह्मणः शुध्येद्योग्निवेदसम २४
न्वितः। हीने हीनतरे चैव त्र्यहश्चतुरहस्तथेत्यादिना। एकाहाद्ब्राह्मणः शुद्ध्येद्योग्निवे

दसमन्वितः। त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैरित्यादिस्मृत्यंतरे च ब्राह्मणस्य
क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः। तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात्।
शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके। त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः इत्या
दिवचनैश्च क्षत्रियवैश्यशूद्राणामपि तत्पाधिविशेषोपाधानपुरःसरं संकुचिताशौच
कल्पाः प्रतिपादिताः। सर्वेषामेव वर्णानां सूतके मृतके तथा। दशाहाच्छुद्धिरेतेषामि
ति शातातपोऽब्रवीत्। पंचदशरात्रेण राजन्यो विंशतिरात्रेण वैश्य इत्यादिवचनैश्च सामा
न्यत एवाद्यावचनाश्चाशौचकालाः प्रदर्शिताः। तत्र व्यवस्थिताशौचकल्पप्रतिपादका

Indira Gandhi National Centre for the Arts

त्रि·टी·
१५

नांतावदग्निवेदकार्याग्निहोत्रादिस्वाध्यायविषयताद्रव्यार्जनं विना सीदत्कुटुंबास्वस्त
निकादिकर्तृकतद्धरणोपयोगिद्रव्यार्जनविषयता च विज्ञानेश्वरादिभिः प्रपंचेन प्र
तिपादितेव। सामान्यतः प्रवृत्तानां तु मनुयाज्ञवल्क्यादिमहास्मृतिविरोधाच्छिष्टसमा
चाराभावाच्च यद्यपि तैरनादरणीयत्वमेवोक्तं तथापि मन्वाद्युक्तापेक्षयाल्पकालाशौ
चप्रतिपादकानां तावदस्पष्टावतिकालेयेन विना तत्र्यभावस्तस्य तद्विषयेतावत्काला
शौचप्रतिपादकत्वेन सर्वतुल्यतेव। अत एव दशाहाशौचमाशौचं सपिंडेषु विधीयते। १५
अर्वाक्संचयनादस्थ्नां त्र्यहमेकाहमेव वेति सामान्यपदं तमपि मनुवचनं कुसूलधान्य

---

कोवा स्यात्कुंभीधान्यक एव वा। त्र्यैहिकोवापि भवेदश्वस्तनिक एव वेति प्राक्प्रतिपादित
चतुर्विधगृहस्थाभिप्रायमित्युक्तं मिताक्षरायां। अधिककालाशौचप्रतिपादकानां तु ज्ञा
तिमात्रक्षत्रियादिविषयतेत्यपि वक्तुं शक्यमित्यादिकं पत्र विस्तरः। सोदकविषयोऽप्याव ८३
प्र४ चाशौचकल्पप्रतिपादकानां मध्ये षेव व्यवस्था। माधवस्तु दशाहत्र्यहदशाहादिस्त्रनाशौ
चकल्पा युगांतरविषयाः। वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथेति स्मृत्यंतरात् दशा
हएव विप्रस्य सपिंडमरणे सति। कल्पांतराणि कुर्वाणः कलौ भवति किल्बिषीति हारीत ८२
वचनाच्चेत्याह। एतच्च ब्राह्मणादिवर्णानां सजातीयविषयमेव। विजातीयेषु तत्र ब्राह्मणादे



Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ मूर्धावसिक्तादिषु तावदनंतरेषु द्वादशरात्रं तेभ्यो हीनत एकरात्रं। तथा च हारीतेनोक्तं। द
१६ शाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु। षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु॥ इति। बौ
धायनेन तु स्वस्वजात्याशौचमेव तत्रापि तु गोक्षत्रविट्शूद्रजातीयापेक्षया विप्रस्य बांधवा॥
। तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यत इति। अनयोश्च पक्षयोर्जातिमात्रत्वधर्मपर
विषयत्वेनापरनापद्विषयत्वेन वा व्यवस्था। मूर्धावसिक्तादेर्ब्राह्मणादिषु तु जातमृत
जात्याशौचं द्रष्टव्यं। तथा च विष्णुः। ब्राह्मणस्य क्षत्रियविट्शूद्रेषु षड्रात्रत्रिरात्रैकरा १६
त्रैः। क्षत्रियस्य विट्शूद्रेषु षड्रात्रत्रिरात्राभ्यां। वैश्यस्य शूद्रे सपिंडे षड्रात्रेण शुद्धिः॥ ही

नवर्णानां तूत्कृष्टेषु सपिंडेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिरिति। मूर्धावसि
क्तादीनां सजातीयसपिंडेषु तु क्षत्रियादिजात्याशौचं। ब्राह्मणात् क्षत्रियायामुत्प
न्नः क्षत्रिय एव क्षत्रियाद्वैश्यायामुत्पन्नो वैश्य [redacted] एव वैश्यात् शूद्रा २८
यामुत्पन्नः शूद्र एवेत्यस्य मूर्धावसिक्तादीनां क्षत्रियादिधर्मलाभप्रतिपादनार्थत्वात्
। सूतादिप्रतिलोमजानां प्रतिलोमा धर्महीनाः इति स्मरणात् आशौचं नास्त्येव केवलं जनने
ने मरणे च मलापकर्षणार्थं शौचमात्रमिति विज्ञानेश्वरः। माधवाचार्य
स्तु यस्मिन् त्रिपिने शूद्रस्य पराशौचं तस्मिन् त्रिपिने प्रतिलोमानां तदेव शौचाशौचे प्रकुर्वी

रं त्वहर्वहर्णसंकराइति ब्रह्मपुराणवचनादिस्मादिदिङ्मात्रं तथासत्यपि सपिंडत्वेऽन्यो
रसेषु क्षेत्रजादिसुतेषु त्यक्तेषु मृतेषु च वर्णविक्षेपेणः प्रतिलोमभिन्नान्याश्रितासु प
लीषु प्रसूतासु मृतासु च एर्वीपरपत्न्योश्च त्रिदिनमाशौचं न तु दशाहादि। तथा च त्रिरात्रे
णशुद्ध्येदित्यनुवृत्तौ विष्णुः। अन्यो रसेषु पुत्रेषु जातेषु च मृतेषु च। परपूर्वासु भार्यासु
प्रसूतासु मृतासु चेति। अन्यौरसपदेन चात्रौरसो धर्मपत्नीज इति परिभाषितौरसभिन्न
[redacted] त्यते। तेन दीक्षितोपि क्षेत्रजादौ त्रिरात्रसिद्धिः। अत एव वृद्धहस्पतिनान्याश्रिते
षु दारेषु परपत्नीसुतेषु चेत्युक्तं। पत्न्योरसएव द्वानेन रूपेणवान्यस्य पुत्रीक्रतस्तत्र पूर्वापि 

तुर्नो त्रिरात्रं पूर्वसंबंधनिवृत्तेश्च न दशाहादीति प्रतिभाति। परपूर्वाग्रहणात्स्वपत्न्यपि द्विती
यपत्युरेव त्रिरात्रमिति प्रतीयते तथापि वा हस्यत्वेन्याश्रितग्रहणात्स्वस्यापि पितृपति
सपिंडानां तु एकरात्रं। तथा च मरीचिः। सूतके मृतके चैव त्रिरात्रं परपूर्वयोः। एकाह
स्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति। पितृग्रहणं पत्युपलक्षणं। हारीतोपि। परपूर्वासु
भार्यासु पुत्रेषु कृतकेषु च। भर्तृपित्रोस्त्रिरात्रं स्यादेकाहं तु सपिंडत इति। याज्ञवल्क्योन्तु
पित्रोः पत्योश्चैकाहत्युक्तः। अन्यो रसेषु पुत्रेषु भार्यास्वन्यगतासु चेति। तस्य चासंनिहित
विषयत्वं निर्गुणविषयत्वं वा। त्रिरात्रैकरात्रयोः सवर्णासवर्णाविषयत्वेन व्यवस्थेत्यपि

Indira Gandhi National
Centre for the Arts

त्रि.टी. कश्चित्।एकाहपक्षे च सपिंडानां स्नानमात्रं।एवं च अन्यास्मिन्नेव दारेषु परपूर्वीसुतेषु चागो
१८ त्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणेव तंत्विते तिथज्ञापतिवचने सममपि आहारान्यंतिपिर्नंतस उ३२
पिंडत्रिरात्रस्नानयोरत्यंत समानविषयत्वं यद्यपि प्रतीयते तथापि त्रिरात्र विषये सपिंडानां मरी
चिहारीत वचनाभ्यामेकाहविधानात्सामान्यतः समानविषयत्वांगीकारेणास्वीकारो वांतरवि
षयविभागः कल्पनीयः।एवं च सद्यःशौचानुवृत्तौ अन्यपूर्वासु भार्यासु पुत्रेषु कृतकेषु चेति शं
खलिखितवचनमपि भार्यापुत्रशब्दयोः संबंधिशब्दत्वादुपस्थितयोः पतिपित्रोः सपिंडानामि १८
त्यध्याहारेण सपिंडविषयमेव व्याख्येयं।अत्यथ मजातीयभार्यादिशास्त्रीयपुत्रविषय मित्य

पि कश्चित्।पितृपितृकसोदरे च जाते एकाहः मृते अहः।तथा च मरीचिः।मातैकपादि
पितृको भ्रातरावन्यगोचरौ।एकाहः सूतके तत्र त्रिरात्रं मृतके तयोरिति।वा नःस्यात्।कुलजे
सगोत्रसपिंडे वान्यस्त्वेपतौ सत्यासि त्रिपंडकेन तीयवृहन्नोवोपरम तिमृते आश्रवः स्ना
नमात्रमेव शुद्धिहेतुः स्यात्सर्वदैवा।तथा च पराशरः।देशांतर मृतं श्रुत्वा क्लीवे खानसेयते
मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिण इति॥इदं च स्नानमौर्ध्वदेहिककर्मभिन्नविषयं।संनि
हित सपिंडत्वाद्यनापाद्यनिमित्तकार्यो च मात्रापवादत्वेनौर्ध्वदेहिकानुष्ठाननिमित्ततदप
वादाभावात्।एवमग्रेऽपि।यतेस्त्वौर्ध्वदेहिकमेव नास्ति।कुलजग्रहणमारो च प्रयोजका

Indira Gandhi National
Centre for the Arts

।तथा च स्मृतिः। ब्राह्मणार्थे विपन्नानां षोषितां गोग्रहेपि वा। आहवेपि हतानां च एकरात्रमशौ २

त्रि॰टी॰ नाद्याघसंबंधमात्रोपलक्षणं। योषिः स्त्री। योषितां गवां च बाणां गुद्वेरक्षणाय मृतवतिनन्द्रे
१९ बंधिनोहिनमहोरात्रमाशौचं वेकमिति। आहवहते विशेषमाह युद्ध सद्यः। विद्वुशद्ब्रन्दतल
क्षणार्थः। युद्धभूमिमृते सद्यः स्नानमात्रेण शुद्धिः। एकयोगनिर्दिष्टत्वात्पूर्वत्रोपलक्षिते युद्ध
हतेविशेषद्योतनार्थस्तु पारार्थे च शब्दः। तथा च मनुः। उद्यतैराहवेशस्त्रैः क्षत्रधर्महतस्य च।
सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति। अत्रोद्यतैरित्यादि विशेषणबलाद्युद्धमृ
ईमृतविषयीति। तथा च एवंवाक्यस्य युद्धस्थानेन कालो नरमृतविषयं। अत्र तु क्षो ईर्द्वदैहिक कर्तव्य १९
र्युदासो नास्ति सद्यः संतिष्ठते यज्ञस्तु क्त त्वात्। पत्तोस्मकर्म ५ शावेमात्रो विषयोवस्यमा

णलक्षणदेशांतरभिन्ने यस्मिन्देशे आशौचभागिनः संजितस्मिन्नेव देशे उत्पन्नेर्दशाहान्तभ
तिदशाहादिकेब्राह्मणत्वादि[redacted]जातिप्रयुक्ते शावे मृतिनिमित्ताशौचे। नीने ज्ञाते सतिद
शाहादिकाले परिछेद्याशौचनिमित्तभूतेमरणे दशाहाद्युत्तरं ज्ञाते सतीत्यावत्। त्रिमासान्
तृतीयमाससमाप्तेः प्राक् मासत्रयपर्यन्तं त्रिरात्रं। तदूर्ध्वं षण्मासमभिव्याप्य तत्समाप्तिपर्य व
तं पक्षिणी आगामि वर्तमाना दृष्टयमुक्तामध्यगता रात्रिः। तदूर्ध्वं नवममासमभिव्याप्य तत्स
माप्तिपर्यंतमपि विषये दिनमहोरात्रं। ततोनंतरमुदक दानसहितं स्नातमात्रकालनिरवे
क्षं शुद्धिहेतुः स्यात्सपिंडानां। न पुनर्ज्ञातस्य मरणाद्दशाशौचनिमित्तत्वात्तत्रारभ्य शुद्धिशा

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰
२०

हादिभवतीत्यर्थः। तथा च बृहद्वसिष्ठः। मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा। अहस्तु नवमाद् स्मृ १
र्वागूर्ध्वं स्नानेन शुध्यतीति। स्नानेनोदकदानमप्युपलक्ष्यते। सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचिरि
ति याज्ञवल्क्यवचनात्। एकमानवे संवत्सरेऽतीते तु स्पृष्ट्वैवापो विशुध्यतीत्येवकारेण तत्का २१
लनिवृत्त्यर्थः। अत्र च वाक्यद्वये संवत्सरग्रहणं तदूर्ध्वमपि स्नानमात्रं पर्यन्तं तु वर्षमध्ये नवमादूर्ध्व
मप्यधिकाशौचाभिप्रायेण। उदाहृतवसिष्ठवचनात्। श्रावणग्रहणेन दशाहाद्याशौचनिमित्तभूत २०
स्य जननस्य दशाहाद्यनन्तरं श्रवणेऽपि व्यतिरिक्ताशौचं नास्तीति दर्शयति। तथा च देवलः।
नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति। पितुस्तु स्नानमात्रमस्त्येव। निर्दशं ज्ञातिमरणं श्रु

न्ती २

पृ १

त्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य शुद्धो भवति मानव इति मनुवचनात्। एतच्च पुत्रग्रहणं
जन्मन्यतिक्रान्ताशौचाभावस्य ज्ञापकं। अन्यथा श्रुत्वा जन्म च निर्दशमित्येवावक्ष्यत। द
त्रि १ शाहा ^ भ्यतीत्येन त्रिरात्राद्याशौचनिमित्तभूतानुपनीतादिप्रायणेऽप्यतिक्रान्ताशौचं नास्तीति द
र्शयति। तथा च व्याघ्रपादः। उपनीते तु विषमं तस्मिन्नेवाति कालजमिति। अत्र च पूर्णपु
नीतग्रहणादनुपनीतपर्युदासेऽप्याचार्यसोदकादिप्रायणेऽतिक्रान्ताशौचं प्रसज्यत एवेत
प्यापि त्रिरात्राहोरात्राद्याशौचनिमित्ते मरणे त्रिरात्राद्यनन्तरं ज्ञातेऽपकर्षस्योक्तत्वेन त्रिरा
त्राद्याशौचविधानस्यायुक्तत्वादतिक्रान्ते दशाहे त्विति च मनुवचने स्पष्टमेव दशाहग्रह

Indira Gandhi National Centre for the Arts

त्रि·टी· णां दशाहादिजात्याशौचविषयत्वमेवाति क्रांताशौचविधेर्युक्तमित्यभिप्रेत्य दशाहात्प्र
२१ भृतीत्युक्तं। तद्बृध्यैरपीणात्मन्नेषिते कालशेषः स्यात्तस्यौर्ध्वदैहिकं शुचिरिति याज्ञवल्क्यवच
नपाठानुसारेण मानवानि दशाहग्रहणस्यानिः क्रांताशौचकालपरत्वमंगीकृत्य त्रिरात्रा
द्याशौचातिक्रमेपि स्नानोदकदानमात्रमुक्तं। देशांतरे विशेषस्य वक्ष्यमाणत्वादिह विष
यस्त्युक्तं देशांतरानुवक्ष्यति। केवलेनतस्य थोक्तं। आत्रिपक्षात्त्रिरात्रं स्यात् षण्मासात्प
क्षिणी ततः। परमेकाहमावर्षादूर्ध्वं स्नातो विशुध्यतीति। स्नान विषयप्रदर्शक २१
मिताक्षरायं ग्रंथे अर्वाक्संवत्सरादित्युक्तेरभिप्रायं न विद्मः। अत एवात्र नवमादूर्ध्वमवि

शेषेण स्नानमुक्तं। स्नानं त्वेतु देशांतरस्थेनुजात्याशौचनिमित्तेत्नातिमरणे दशाहाद्य
नंतरं तानेत्रविशेषेण स्नानोदकदानमात्रं न तु त्रिरात्रादि। तथा च स्मरणं। देशांतरम्
तेष्वाक्त्वेत्यादि। पूर्वो दत्वोदकं शुचिरिति च। [redacted] देशांतरलक्षणं च बृहस्पतिनोक्तं
। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते। देशां
तरं वदंत्येके षष्टियोजनमायतां चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव च। इति। एते यांच
पक्षाणां देशपरिग्रहेणाव्यवस्थाबुद्धिविवेकेनुषष्टियोजनांतरत्वं नद्यंतरेपि गि
बाभेद गिरिमहानदीव्यवधानानि चेति लक्षणद्वयमेव निष्कर्षेणोक्तं। मातापित्र

Indira Gandhi National
Centre for the Arts

त्रि.दी मरणेपवादमाह। अथ त्वंस्वं। माता च पिता च पितरौ तद्विषये तु मृतौ दशाहाद्युत्तरं यदा २१
कदाचिद्यस्मिन्कस्मिन्नपि देशे ज्ञाते देशकालाविशेषात्स्वदेशविदेशरूपदेशविशे
२२ षं त्रिमासषण्मासादिरूपं च कालविशेषमनालोच्य स्वत्वं दशाहाद्यादशाहाद्याशौच
पुत्रैः कर्तव्यं। तथा च पैठीनसिः। पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः। श्रुत्वा त
द्दिनमारभ्य दशाहं सूतकी भवेदिति। अपि शब्दात्कालांतरेपि। अपवादांतरमाह। मातुः २२
दिकं। देशकालाविशेषादित्यनुवर्तते। मातुः सपत्न्या मरणे त्र्याशौचकालोत्तरं यदाक
दाचिद्यस्मिन्कस्मिन्नपि देशे ज्ञाते त्रिदिनमाशौचं पुत्रैः कार्यं। तथा च स्मृत्यंतरे। पितृपत्न्या

मपेतायां मातृवर्जं द्विजोत्तमः। संवत्सरे व्यतीतेपि त्रिरात्रमशुचिर्भवेदिति। इदं मानं।
१६ मासोर्ध्वकालातिक्रांते परशो च पुत्रं तत्सवर्णानां समानं। न वेत्यपेक्षायामुक्तं।
तथा च माधवाचार्यः। तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति ६ पित्रोः कान्तामा
तापितृगृहे समूढायाः परिणीतायाः दुहितुः प्रसवे मरणे च यथाक्रमं पित्रोरेकरात्र
त्रिरात्रे स्यातां प्रसवे एकरात्रं मरणे त्रिरात्रं। आदिपदग्राह्याणां च भ्रातॄणां मातृ
पितृगृहवासे सति तद्गृहे तदभावे स्वगृहे भगिन्याः प्रसवे मरणे च एवं वदेदेकपक्ष
त्रिरात्रे। तथा च विष्णुः। संस्थितायां तु स्त्रीणां शौचं पितृपक्षे तत्प्रसवमरणे चेत्पि

त्रि॰टी॰ नगृहे स्यान्नांतरैकरात्रं त्रिरात्रं वेति। पितृपक्षस्येति शेषः। तदुपक्रमात्। पक्षपदेन च्या
२२ तरएव गृह्यंते वाक्यांतरेण भगिनीमरणे त्रिरात्रविधानात्। पतिगृहे तु सन्मृतायाः प्रसवम
रणयोः प्रसवे तावत्सर्वेषां पित्रादीनामाशौचाभावः। व्यापकाभावात्। मरणे तु पित्रो
स्त्रिरात्रं भवत्येव वैवाहिकादपि संबंधादनुरुध्यारदंग्र र। वनाद्यनासु योषित्सु संस्कृ
तासंस्कृतासु च। मातापित्रोस्त्रिरात्रं स्यादितरेषां सद्य इति विधीत्यादिसामान्येन स्मरण
ज्ञातव्यं। आशौचकल्पानराश्रवणादिषु वाक्यगतपितृगृहग्रहणस्य च प्रसवपक्ष २२
विषयत्वेन सार्थक्यात्। आत्मणां तु वक्ष्यमाणं पक्षिणी। त्रिरात्रस्य गृहे पस्य न षक

स्त्रिदसपिंडः कथंचन। तस्याप्यशौचं विहितं यत्त्रिरात्रं नात्र संशयः इत्यंगिरोवचनेन स्व
गृहमरणे प्यवस्थापितत्वात्। इदं च वचनं पक्षवक्ष्यमाणविषयं [redacted] स्मृत्यंतरोक्तं
पक्षिण्यादिकल्पांतविकल्पितत्रिरात्रव्यवस्थापकमेव लाघवात्। तु स्वगृहे यत्किं
चिदसपिंडमरणे त्वपूर्वं त्रिरात्राशौचविधायकं गौरवात्। वाक्यांतरविहितैकरात्रवि
रोधाच्च। असपिंडपदेन च ज्ञात्याशौचानर्हं गृह्यते। एवं च सति यत्त्रिरात्राद्येव नि
यमेनोक्तं तत्र स्वगृहे स्याद्देवा मरणे तद्देवाप्यत्र न त्रिरात्रं पक्षिण्या एकरात्रेण वावि
कल्पितमुक्तं न त्वांगिरोवचनात्त्रिरात्रस्यास्वगृहमृतविषयत्वं तरस्य तदितरविष

Indira Gandhi National
Centre for the Arts

त्रि·टी
२४

मत्वं। एकाहविकल्पितायां पक्षिण्यामप्येवमेवावस्था। यत्र तु त्रितयं विकल्पितमुक्तं
यथा मातुलादौ तत्र त्रिरात्रस्य पूर्वोक्तविषयत्वमेव पक्षिण्यास्तु मेऽप्रतिज्ञायये गिवि
षयत्वं न्यायवर्त्रिविषयत्वं वा एकरात्रस्य तु मातुलादिमात्रविषयत्वमित्युत्सर्गेणावस्था
प्रकारः प्रसंगादत्रैवोक्तः। क्वचित्त्वन्यदपि अवस्थापकं वक्ष्यामः। षडशीत्यां तु त्र्यंगि
रोयचनस्य विधित्वमभ्युपगम्य सर्वत्रोक्तवक्ष्यमाणविषयेऽप्यशौचभागि गृहमरणे त्रि
रात्रमुक्तं तद्याज्ञिकग्रंथविरोधादुपेक्ष्यं। तत्रैव दुहितुः समुदायाः पितृगृहादन्यत्र मृतौ
पित्रोः पक्षिण्यातिक्रान्ते तदपि मूलाभावादयुक्तं। अथ रात्रं। पित्रोर्मरणे ऊढपुत्र्याः २४

परिणीता दुहितुस्त्रिरात्रमाशौचं। तथा च वृद्धमनुः पित्रोरुपरमे स्त्रीणामूढानां तु क
थं भवेत्। त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः॥ इति। अनूढानां तु पुत्रादिवदेवाशौ
चं। प्रेते रात्रं। आचार्य उपनीय वेदाध्यापके मातामहे दुहितृसुते श्रोत्रिये अतद्वलि
नैकशाखाध्यायिनि ऋत्विजि सयाज्य स्वस्त्रीये यजमाने भागिनेये च प्रेते शिष्ये दौ
हित्रादिषु त्रिरात्रमशुचयः स्युः। तथा च बृहस्पतिः। अहं मातामहाचार्यश्रोत्रियेष्वशु
चिर्भवेदिति। श्रोत्रिये च समानग्रामीणे मैत्री प्राप्तिवेद्यत्वात् स्नानाचारेणैवोपसंपन्ने
त्रिरात्रं द्रष्टव्यं। श्रोत्रियेऽनुपसंपन्ने त्रिरात्रमशुचिर्भवेदिति स्मरणात्। अनुपसंपन्ने तु स

Indira Gandhi National Centre for the Arts

मानग्रामीणमात्रे एकाहं सब्रह्मचारिणि समानग्रामीणे च श्रोत्रिय इति वचनाद्वक्ष्यमाणं
एकाहः। असमानग्रामीणत्वाशौचाभाव एव। दौहित्रभागिनेययोश्चोपनीतयोस्त्रिरा
त्रं। अनुपनीतयोस्तु वक्ष्यमाणपक्षिणी। संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते।
संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थित इति वृद्धमनुवचनात्। वचेतोऽत्रापि। मृते चर्त्वि
जि याज्ये च त्रिरात्रेण विशुध्यतीति। एतच्चाचार्यमातामहादौ त्रिरात्राद्यन्यस्मिन्त्र्यंमेष्टि
कर्तरि प्रत्यासन्नसंनिहितत्वाधिकार्यंतराभावात्स्वयमेव तेषामौर्ध्वदेहिकं करो ति तदा सं
पूर्णमेवाशौचं। गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्। प्रेताहारैः समं तत्र दशरात्रेण 

शुध्यतीति मनुवचनात्। त्रिदि। अत्र। यद्यपि सपिण्डता तु पुरुषे सप्तमे विनिवर्तते। समानो
दकभावस्तु जन्मनाम्नोरवेदने इति मनुना सप्तमपुरुषादूर्ध्वं यावज्जन्मनामज्ञानं सोदक
त्वमुक्तं तथाप्यत्र गोत्रजे ष्वेकरात्रस्यापि वक्ष्यमाणत्वादत्र सप्तमपुरुषादूर्ध्वं चतुर्दश
पुरुषपर्यन्ताः सोदकपदेन गृह्यन्ते। स सोदकं प्रथमं च सोदकोनरपसंवेउपनीतसोदकां
तरमरणे च त्रिदिवसमशुचिः स्यात्। तथा च मनुः। जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्य
ते। शवस्पृशो विशुध्यन्ति त्र्यहात्तूदकदायिन इति। इदं च त्रिरात्रं दशरात्रं वा शावमाशौचमपि
ष्यते इत्यादिवाक्येषु दशरात्रतुल्यकक्ष्यत्वेनोक्तत्वात्ततो भिन्नविषयमपि पूर्णं त्र्यसंवेउप

Indira Gandhi National
Centre for the Arts

नीतमरणे च वेदितव्यं।अर्वाक्संस्थानमा चैकं ल्यं॥७॥पक्षि॰ण्यां च।दौहित्रभागिनेयावनुपनी
तौ।एकस्माद्गुरोर्बहुकालेसहवेदमधीयानः सहाध्यायी।आत्मनः पितृष्वसुर्मातुलस्य च पु
त्रा आत्मबांधवाः।पितुः पितृष्वसुर्मातृष्वसुर्मातुलस्य च पुत्राः पितृबंधवः।मातुः पितृष्वसुर्मा
तृष्वसुर्मातुलस्य च पुत्रा मातृबंधव इति बंधुत्रयं।अंतेवासी सहाध्यायिवदेव।यद्वाशिल्प
शिक्षार्थी।शिष्याः प्रसिद्धाः।ऋत्विगादीनां प्रमाणे मरणोमातामेष्याशौचं विरतेत्वृत्विक्का
दिनिरूपकसंबंधिनां ज्यादीनां पक्षिण्याशौचं।विरतपदस्य लिंगविपरिणामेन भ्राता
मध्यादावनुषंगः।तथा च यमः।श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले।पित्रोः स्वसरि तद्व 

पक्षिणीं क्षपयेत्रिशामिति।तथा।मातुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च।आशौचं पक्षिणीं
रात्रिं मृता मातामहीयदीति।अत्र गुरुः केवलाध्यापकः।मनुरपि।मातुले पक्षिणीं रात्रिं
शिष्यर्त्विग्बांधवेषु चेति।गौतमोपि।पक्षिणी असपिंडयोनिसंबद्धे सहाध्यायिनि चेति।यो
निसंबद्धा मातुलमातृष्वस्रीयपैतृष्वस्रीयादयः।अथो॰नष्टे।स्वदेशाधिपतौ स्वग्रामा
धिपतौ च नष्टे सज्योतिराशौचं।प्रतिकालीने नमत्र्यनक्षत्ररूपेण ज्योतिषा सह वर्त्त
ते तत्सज्योतिः॥दिनमृते दिनेन रात्रिमृते रात्रिरित्यर्थः।तथा च मनुः।प्रेते राजनि सज्योतिर्य
स्यस्याद्विषये स्थितिरिति।वृद्धमनुरपि।ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि।शिष्ये

त्रि.टी.
२७

पंचत्वमापन्नेष्वपि विनश्यत्यर्चना इति ॥८॥ शिष्ये। एतत्। शिष्य एकदेशमध्यापितः।
वेदविद्यार्थिनां च वा। उपाध्याय एकदेशाध्यापकः। गुरोराचार्यस्य तनयः। सगोत्रश्चतुर्दश
पुरुषादूर्ध्वं यावज्जन्मनामज्ञाने। अनूचानो गाध्यापकः। श्रोत्रियः समानग्रामीणः। शि
ष्यादिषु मातुलांतेषु नष्टेषु स्वगृहे परस्यासपिंडस्यैतद्वित्रयमतो च निरूपकसंबंधिना
मेकरात्रमाशौचं। तथा चाहेत्यनुवृत्तो याज्ञवल्क्यः। गुर्वंतेवास्यनूचानमातुलश्रो
त्रियेषु चेति। अत्र गुरुरुपाध्यायः। मुख्यगुरोः पितरि सपिंडत्वेन दशाहस त्वात्। अस २७
पिंडाचार्ये च त्रिरात्रसत्वात्। मातुलग्रहणं बांधवानामुपलक्षणमिति विज्ञानेश्वरः। मत्तु

रपि। त्रिरात्रमाकृताशौचमाचार्ये संस्थिते सति। तत्पुत्रे च पत्न्यां च दिवारात्रमिति स्थि
तिरिति। विष्णुरपि। असपिंडे स्ववेश्मनि मृते एकरात्रमिति। जाबालिरपि। एकोदका
नां तु अहो गोत्रजानामहः स्मृतं। मातृबंधौ गुरौ मित्रे मंडलाधिपतौ तथेति। गार्गिरि
ति। एकाचार्योपनीतः सब्रह्मचारी। तस्मिन्प्रेते रात्रिमहोरात्रमाशौचमितरः सब्र
ह्मचारी कुर्यात्। तथा चाश्वलायनः। एकाहं सब्रह्मचारिणीति। अथ। स्यात्। अक
थमपि केनचित्प्रकारेण स्वल्पेन एकाहाद्याशौचप्रयोजकत्वेनानुक्तेन संबंधेन ज्ञा
तस्यालवाहीन छेवासांगुतंस वस्त्रं स्नानं स्यान्मतियोगिनां। तथा च वृद्धमनुः। प

गिन्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते। मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते। शा
लके तत्सुते चैव सद्यः स्नानेन शुध्यतीति। आत्मभगिनीदौहित्रभागिनेये बुसमघुः श्वश्र
भिधानं देशांतविषयं। अत्र चैतस्मिन्नघत्रये स्मृतिभेदवशे कस्मिन्नेव विषये नाना
विधाशौचकालप्रतिपादनमस्ति तत्राशौचभागिनस्त्वगहमरणरूपेणापूर्वोक्तप्र
कारेणाडीस्तु प्रकारा निशापनस्थावाप्यां वोत्सर्गतो व्यवस्था द्रष्टव्या। आचार्योपा
ध्यायशिष्यसहाध्यायिश्रुतिहृत्ताध्ययनत्वानि वृत्ताध्ययनत्वाभ्यां सकलेकदे
शाध्ययनेन च। ऋत्विग्याज्ययोर्वैद्धृत्यकालत्वेन श्रोतस्मार्तभेदेन चेति दिक्॥२० २८

तुल्यं।२१। श्लोकत्रयोक्तमसपिंडाशौचं वक्ष्यमाणं च सकलमपि संनिपाताशौचादिकं
सर्ववर्णेषु तुल्यं भवति। उपनीताशौचं बहूनां विशेषोपादानेनाविहितत्वात् ९
पूर्वप्रवृत्ताशौचवद्धितीयादिदिने तु आशौचांतरनिपाते संनिपाते प्रतिनिमित्तं नै
मित्तिकावृत्तिन्यायेन प्रथमदशाहादिकं प्राप्तं तत्र पूर्वप्रवृत्ताशौचावशिष्टदिना
नामुभयसाधारणत्वेपि तदुत्तरमाशौचांतरसैकादशादिष्वनुवृत्तिआम्नावपवादमाह
वहा शुचिः। वहुस्य पूर्वप्रवृत्तस्याशौचस्यान्तर्मध्ये परस्य दशाहादिरूपस्यका
लस्य मध्ये द्वितीयादिदिने तु समं पूर्वप्रवृत्ताशौचसमकालव्यापकं स्वल्पकालम्

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰
२९

नकालव्यापकं वा सजातिजन्मनिमित्ते जन्मनिमित्तं मृतिनिमित्ते मृतिनिमित्तं अपाम
प्याशौचं स्वनिमित्तभूतजननमरणोपनिपातेन यदि भवति चेत्तेन मृतिनिमित्ताशौचस्य
मध्ये जातं तेन तद्विजातीयं तादृशमेव जननाशौचं वा यदि भवति तदा तस्याशौ
चांतरस्य पूर्वाशौचकालशेषेण नवदिनादिरूपेणैव शुद्धिर्निवृत्तिर्भवति न तु तन्नि
मित्ताहारभ्य पूर्णदशाहादि भवतीत्यर्थः। एवं च सजातीयं स्वल्पसमानं तदाशौच
निमित्तद्वयमेकस्मिन्नेव दिने यदि भवति तदा विशेषाग्रहणात्साधारणकालपरि
च्छेदं पूर्णमेवाशौचद्वयं भवति। तथाल्पकालव्यापकाशौचमध्ये सजातीयमपि २९

अधिककालव्यापकाशौचनिमित्तं यदि भवति तदा तदुत्तरं पूर्णमेव तन्निमित्तमा
शौचं भवति। तथा जननाशौचमध्ये तदपेक्षया स्वल्पकालाशौचनिमित्तं समकाला
शौचनिमित्तं वा मरणं यदि जायते तदा तन्निमित्तमाशौचं न शावमध्यपतितमस्ति व
त्स्वधर्मप्रयोजकं किं तु स्वस्वरूपत्वादिस्वधर्मप्रयोजकं निमित्तानंतरं पूर्णं च भवति।
तथा त्रिरात्रादिप्रेताशौचमध्ये दशाहादिव्यापकं जन्माशौचं यदि भवति तदा स्व
कालं यावत्स्वरूपत्वादिस्वधर्मप्रयोजकत्वात्प्रबलेनापि शावाशौचेन न निव
र्त्यते। किंतु पूर्णमेव भवतीति व्यतिरेकोऽर्थादुक्तो भवति। तथा चोशनाः अल्पस्याशौ

Indira Gandhi National
Centre for the Arts

त्रि.टी. वस्यमध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यतीति । इदं च
३० वचनं पूर्वप्रवृत्तमरणाशौचमात्रेण तदंतःपतितयोर्जननमरणाशौचमात्रयोः प्र
वेप्रवृत्तजननाशौचमात्रेण च तदंतःपतितजन्माशौचमात्रस्य निवृत्तौ प्रसक्तायां
लघुनाधिकस्य तस्य निषेधकं उभयत्र तत्र सजात्यविरोधात् । तथा च त्रिरात्रादि
शावांतःपातिनो दशाहादिजननाशौचस्य न पूर्वेण निवृत्तिः । किंतु स्वकाले पा
वहत्रुवर्तमानस्येव तस्यास्पृश्यत्वादिस्वधर्मप्रयोजकत्वमात्रेण गरीयसा शावाशौ ३०
चेन तत्स्वधर्मप्रयोजकत्वनिवृत्तिमात्रं । सूतके मृतकं चेत्स्यान्मृतकेत्वथ सूतकं । तत्रा

धिकृत्य मृतकं शौचं कुर्यान्न सूतकमित्यंगिरोवचनात् । पचतुञ्ज्याघानांयौगपद्ये
तु तेषां शुद्धिर्गरीयसा । मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति कूर्मपुराणवच
नेपूर्वोक्त[redacted]पवादत्वमुत्तरार्धस्यांगीकृत्य लघुनापि मरणाशौचेन दीर्घस्या
पि जननाशौचस्य स्वरूपनिवृत्तिरूपमपि बाधत्वमुक्तं रुद्रधरेण । तन्न स्यप्य
पवादत्वेन स्योदाहृतो वाक्याविरोधात्स्वधर्मप्रयोजकत्वमात्ररूपगरीयस्त्वप्र
तिपादकत्वाद्युक्तं । वस्तुतस्तु । सर्वप्रकारगरीयस्त्वप्रतिपादकत्वेपि तस्य न प्र
वीपवादत्वं । किंतु तदविरोधेन समाधिककालशावाशौचगरीयस्त्वप्रतिपादक

Indira Gandhi National Centre for the Arts

त्रि·टी·
३१

त्वमेवेति। षट्त्रिंशन्मतेपि। शावाशौचेसमुत्पन्नेसूतकंतुयदाभवेत्। शावेनशुध्य-
तेसूतिर्नसूतिः शावशोधिनीति। एवंचअंतराजन्ममरणाशौचाहोभिर्विशुध्यतीत्या
दिसामान्यवचनमपिपूर्वोक्तविशेषविषयमेवभवति। अंतरापतिताशौचकालाधा
धिककालव्यापिनालघुनापिपूर्वप्रवृत्ताशौचेनदीर्घस्याप्याशौचांतरस्यनिवृत्तिरित्यु
शनोवाक्यार्थापवादोदेवलेनदर्शितः। परतःपरतोशुद्धिरघवृद्धौविधीयते। स्याच्चेत्पं
चतमादह्नःपूर्वेणैवात्रशिष्यतइति। अस्यार्थः। प्रनकालाशौचप्रवृत्तेःपरतोघवृद्धौ ३१
वृद्धिमतिदीर्घकालव्यापिन्यघेपतितेअशुद्धिस्तद्दीर्घकालमघंपरतःपरंपश्चात्ना

ला

तंनिमित्तमारभ्यपूर्णाविधीयतेनतुपूर्वेणानिवृत्तिः। तत्पूर्वप्रवृत्तंलघ्वाशौचंयदिपंचत
मादह्नोंतरापतिताशौचकाधात्परतोप्यनुवर्ततेतदापूर्वेणैवनदपेक्ष्यालघुनापिषडहा
दिरूपपूर्वाशौचकालेनैवसाशुद्धिः। शिष्यतेनिवर्ततइति। इदमत्रोदाहरणं। चतुरहांत
र्विदेशस्थमरणेज्ञातेशेषेणशुद्धेर्वक्ष्यमाणत्वात्पंचदिनाधिकमाशौचंतन्मध्येदशाहा
शौचपातेपूर्वेणशुद्धिः। अपरंच। षष्ठमासगर्भपातनिमित्तषडहाशौचमध्येग्रामस्पर्
शाद्दशाहाशौचस्यपूर्वेणनिवृत्तिरिति। अत्रशुद्धिविवेकेआद्यंभागद्वयंयावत्सूतकस्यनुस
तके। द्वितीयेपतितेचाद्यात्सूतकाच्छुद्धिरिष्यते। अतऊर्ध्वंद्वितीयात्सूतकोनाच्छुद्धिः

Indira Gandhi National
Centre for the Arts

त्रि॰टी
३२

स्मृता। एवमेव विचार्यं स्यान्मृतके मृतकांतरेऽ तिब्रह्मपुराणवाक्यानुसारेण देवलवचनेपू
र्वेणाप्यनुशिष्यतइतिपाठं कल्पयित्वा पंचतमादह्नः चतुर्द्धा विभक्त पूर्वपूर्वतनाशौचभाग
द्वयात्परतः अपरेद्युः सजातीयसंपूर्णाशौचांतरोपनिपाते परतः पूर्वेणाशौचेनातीतेन
शुद्धिर्नतु पूर्वेणेति पादत्रयं व्याख्याय पंचतमादह्नः पूर्वेणाद्यभागद्वयमध्ये नाद्दशाशौचां
तरोपनिपाते पूर्वेणैवाशौचेनातीतेन शुद्धिरिति च चतुर्थं पादं व्याख्याय रात्रिशेषे यदा
शुद्धिर्यामशेषे सुचि सुव्रतादिति च तदपवादत्वेन व्याख्याय दशाहादि संपूर्णाशौचे यदि ३२
द्वितीयं सजातीयं संपूर्णाशौचमाद्यभागद्वयमध्ये पतति तदा पूर्वाशौचापगमेन शुद्धिः

यदि तदुपरिष्टात्पंचदिनपर्यंतं तदा द्वितीयापगमेन। अंत्यदिने तदनंतरदिनद्वयेन। तद्दिन
रात्रं त्यपायेतदनंतरत्रिरात्रेणेति व्यवस्था प्रदर्शिता। तत्र देवलवचनस्यैतदर्थत्वेन व्याख्या
नेतावदस्य शुद्धिपदानंजस्यात्पूर्वेणोत्पस्याहृत्यापत्तेश्चायुक्तं। अर्थोप्ययुक्तः। षष्ठसप्त म॰
व माष्टमनवमदिनेष्वाशौचांतरोपनिपाते दशपादेवोत्तरपंचषट्समाप्तदिनेषु तदस्तुवृत्तिः दश
मदिने तद्वासंपात्मयामयोस्तु तदुपनिपाते द्वित्रिदिनेष्वेव तदस्तु वृत्तिरित्यस्यानुचितत्वात्। ज्ञान
वमाद्विवसा रितिबोधायनवचनविरोधाच्च। कस्तर्हि ब्रह्मपुराणवाक्यस्यार्थः। तत्र केचित्
वदंति त्रिशौचस्यतत्समानार्थत्वेनेदं व्याचक्षते। तथाहि सूतकसंबंधिचरमाहोरात्रस्यादिव

Indira Gandhi National Centre for the Arts

त्रि॰टी ३३ सकृत्प्रमाद्यभागद्वयं प्राप्य द्वितीये सूतके पतिते आद्यादेव सूतकाच्छुद्धिः। अतः आद्यभागद्वया
द्दूर्ध्वं तत्रोक्तसूतकांतरापाते द्वितीयात्सर्वकालाभिव्याप्तसूतकान्ता शुद्धिः। सच सूतकान्तो रात्रिशेष
इत्यादिना पातातत्पादिभिर्दर्शित इति। तदप्युक्तं। अघपरिदशरात्राः सन्निपाते त्वशुद्धिदशरा
त्रमशौचमानवमाद्दिवसात्। पुनःपाते दशाहात्प्राक्सर्वं तासह गच्छति। दशमे द्विपते घस्या
हद्वयात्स विशुध्यति। प्रभाते तु त्रिरात्रेण दशरात्रे त्वयं विधिरिति बोधायनदेवलवचनाभ्यां न
वमदशमशङ्खयोस्तु पांत्यांत्यादिनोपलक्षणत्वेनोपांत्यादिनपर्यन्तमेव पूर्वेणाचतुर्थ्यामप ३३
र्यंतं चांतिमाहोरात्रे द्विरात्राधिकेन तेन शुद्धिः प्रतिपादितत्वात्। रात्रिशेष इत्यादिकं त्वेतद्वि

रोधेनैवानुपदं व्याख्यास्यामः। चरमाहोरात्रविषयत्वं चास्य न वाक्यात् प्रकरणाद्वा लभ्यते तत
स्माद्ब्रह्मपुराणमिति कृत्वा लिखितमिदं मिताक्षरादावदर्शनान्निर्मूलमेव। यद्वा परतः पा
इत्यादिवाक्यसमानार्थत्वेनेदं व्याख्येयं। अन्तरापतितस्य सूतकस्य चतुर्द्धा विभक्तस्याद्यभा
गद्वयमध्ये यावत्तत्पर्यन्तं नाधिककालव्यापिनि लघुनि पूर्वप्रवृत्तसूतके तदधिके द्वितीये प
तिते आद्यात्सूतकस्य तु सूतकं इत्यत्र प्रथमपातिनिर्दिष्टादतः पातितसूतकादेव शुद्धिर्न तु पूर्वान्त।
अतः अर्द्धाद्दूर्ध्वं तदधिककालव्यापिनि लघुन्यपि सूतके तदधिके द्वितीये पतिते द्वितीयात्त
त्रैव चरमनिर्दिष्टात्सर्वसूतकादेव शुद्धिः। एवं शावाशौचेऽपीति। पूर्वोक्तवि षयाणि विशि

Indira Gandhi National
Centre for the Arts

पातित्विवाःसंस्पर्शेन च केवलयोरेवाद्यदृश्यमयोः शोधकत्वसंभवेन पूर्वाशौचशे
ष सापेक्षतच्छोधकत्वघातिपादनायोगात् । पूर्वोक्तानुव्यवस्थात त्रापि भवतितत्
स्यात्तद्विषये वीजाभावात् । यत्तु तदधिरेण पूर्वोक्तदेवलवौधायनवचनबलादियं
सर्वापि व्यवस्था संस्पर्शाशौचविषये व समकालेष्वापकासंस्पर्शाशौचसंनिपाते तु उत्त
रेणोव शुद्धिरित्युक्तं । तदयुक्तं जननाशौचमध्ये पघपरं जननं स्यात् तच्च पूर्वाशौचशेषेण
मेव शुद्धिर्मरणाशौचमध्ये मरणे प्येवं । अत्र जन्ममरणाशौचादो भिविशुध्यतीत्यादि
विष्णुयाज्ञवल्क्यादिवाक्येषु विशेषानुपादानात् । बोधायनादिवाक्येपि सत्रियादि 

संस्पर्शाशौचसंग्रहार्थं दशरात्रादिशब्दानामुपलक्षणत्वस्यावश्यांगीकार्यत्वेनाघवा
द्राशौचमात्रोपलक्षणत्वस्यैव युक्तत्वात् । न च वाक्यान्तरबलाल्लघुनः पातिर्दीर्घस्य तु
तः पातित्वावमात्रमेव परिच्छिद्यतां न तु संस्पर्शाशौचमपि प्रमाणाभावात् । अत्र च वृद्धि
नद्दादृश्यद्राशौचे तदधिकाशौचान्तरोपनिपाते तस्य लघुत्वादधिकाशौचापगमेनैव शुद्धि
रिति प्रतिभाति । एवं प्रवृत्तश्यावांतःपातिनस्तत्समकालस्यापि कस्यचिच्छावस्य पूर्वेणापि
हतिरित्याहृनेवा। पित्र्यं। माता च पिता च पितरौ तत्संबंध्याशौचमंतरापतितं पूर्वप्रवृत्तेनतर
सपिंडमरणाशौचेन न गच्छति किंतु निमित्तादारभ्य पूर्णं भवतीत्यर्थः ॥ एवं च सति पितृ

Indira Gandhi National
Centre for the Arts

मरणनिमित्ताशौचस्येतरसपिंडाशौचेनैवमात्राशौचेनापियथानिवृत्तिर्नास्तितथा
मात्राशौचस्यापीतरसपिंडाशौचेनेवपित्राशौचे[redacted]नापिनिवृत्तिर्नास्तीतित्रा
च्योविशेषमाह॥पितुःमृतोपि॥पितुरुपरमेनैवंजातेनत्रिमितायामशुद्धौसत्यांपश्चान्मा
तम्रतोनपित्राशौचशेषमात्रेणशुद्धिःकिंतुपक्षिणीअधिकाभवतितत्रदशमदिन
पर्यंतंदशमएवपर्यंतंवा॥मात्राशौचोपनिपातेपक्षिणीमात्रं॥तत्रतुहारीतस्मृतिसंमु
मी॰२ च्चितासा॥तथाचशंखः॥मातर्यग्रेप्रमीतायामशुद्धौम्रियतेपिता॥पितुःशेषेणशुद्धिःस्यान्मा ३६
तुःकुर्यात्तुपक्षिणीमिति॥अस्यार्थः॥मातर्यग्रेप्रमीतायांत्रिमितायामशुद्धौसत्यांय

दिपितामृियतेतदापितुस्तन्मृतिनिमित्ताशौचस्यशेषेणमात्राशौचपरिच्छेदकादिनात्
परंपक्षितदिनेऽप्यनुवर्त्तनेनशुद्धिर्नतुमात्राशौचशेषेण॥पित्राशौचमध्येमातुस्तुमरणेपि
तुःशेषेणशुद्धिःस्यादेवपक्षिणींत्वधिकांकुर्यादिति॥एवंचमात्राशौचेनापिपित्राशौ
चस्यननिवृत्तिःकिमुतान्येन॥तथापित्राशौचेनापिकेवलेनमात्राशौचस्यननिवृत्तिः
किमुतान्येनकेवलेनान्यसहितेनवेतिकैमुतिकन्यायेनास्मादेववचनात्तस्याप्यर्थस्य
सिद्धिमभिप्रेत्यनैवाशौचेनपिअपितकर्त्ता॥इदंचसंनिपातेएवंलाभुध्यापिधानंसत्तिका
ग्निदेतरसपिंडानांतयोस्तुनिमित्तादारभ्यपूर्णमेवानधिकारलक्षणमस्पृश्यत्वलक्ष

Indira Gandhi National
Centre for the Arts

त्रि॰टी
३७

णं वाशौचमिति षडशीत्यां विशेष उक्तः पूर्वाशौचेनयाशुद्धिः सूतके मृतके च सा। सूति
कामग्निदं हित्वा चेतरस्य च भुनाश्नीति। तथाशौचसंनिपातेपि पूर्वनिमित्तकमुत्तरेण
उत्तरनिमित्तकं वा पूर्वेण जातकर्म पिंडदानादिकं न प्रतिबध्यते। यथाह प्रजापतिः आशौ
चे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यतीति। आ
शौचसूतिनिमित्ते मृतिनिमित्ते वा। शातातपोपि। अंतर्दशाहे जननात्पश्चात्स्यान्मरणं ३७
यदि। प्रेतमुद्दिश्य कर्तव्यापिंडदानं स्वबंधुभिः। प्रारब्धे प्रेतपिंडे तु मध्ये चेज्जननं भवेत्।
तथैवाशौचपिंडांस्तु शेषान्दद्यायथाविधीति॥ जननग्रहणं मरणस्याप्युपलक्षणं तुल्य

न्यायत्वात्। १० पूर्वं। शुद्धिः। तद्देशस्थेन देशांतरस्थेन वा सर्वमुक्तं संस्पर्शमसंस्पर्शं चाशौ
चं तन्निमित्तमितियावत्। यदि त्वंतः प्रवृत्तिदिनातिरिक्तदिने सुविदितं ज्ञातं तदात्रस्य
आशौचस्य तत्परिछेदकत्वयोग्यस्य निमित्तोत्तरदशाहादिदिनसंख्यानस्य यः शेषस्त
न्मात्रेणशुद्धिर्नतु ज्ञानादारभ्य दशरात्रत्रिरात्रादिनेत्यर्थः। तथा च याज्ञवल्क्यः। प्रोषि
ते कालशेषस्यादिति। विदितग्रहणेन ज्ञातयोर्जननमरणयोराशौचनिमित्तत्वं न तु ज्ञा
नमात्रयोरिति दर्शयति। नचैवं तदारंभसामर्थ्यादेव सिध्यति। अन्यथा त्वाशौचदिनगणा
नायाउत्पत्तिप्रभृतिकत्वात्तदंतर्निमित्तज्ञाते शेषदिनान्याशौचमध्यादेव भवतीतीदम्

Indira Gandhi National
Centre for the Arts

त्रि.टी
३८ नारंभणीयंस्यात्।आशौचपूर्वं त्रिदिनमाह दाहाशाचं।आहिताग्नेरोऽनाग्निमतिनष्टेदा
हाहाहदिवसमारभ्य दशाहादाशौचं तन्निमित्तं च संध्यावंदनलोपादि कुर्यात्।अन्यत्र
तद्दिनेऽस्याग्नेरग्निमति त्यक्ताग्न्यादौ च विनष्टे मरणदिवसत एव त्रिरात्रमेवाशौचं कुर्यात्।तथा
च ब्रह्मनग्निमत उक्तो नेराशौचादि द्विजाति शुद्धौ दाहाद्ग्निमतो विधादिदेश स्तोम नेसती निषे
धीनसि स्मरणं।अत्राग्निमत इति यद्यपि सामान्येनोक्तं तथापि दाहादेव कर्तव्यं पस्यैवेता हा३
निको विधिरिति वाक्यांतराद्धत्तग्निक एव गृह्यते।आदिशब्देन च तन्निमित्तकं संध्याव ३८
दनलोपादि गृह्यते।त्रैपक्षिक पर्यंतं प्रेतकार्यं च।मूलं।ईकाः।यें जां पावानः शौचकाल

उक्तो वक्ष्यते च तेसर्वे ब्राह्मणादयस्तस्मिन्काले शूद्रो शृणु निसचैलं स्नात्वा विहितस्यदेव
विहितस्य पित्र्यस्यादृष्टार्थस्य च दृष्टार्थस्य कृतावनुष्ठाने ईकाः योग्या भवंति न तु कालमात्रात्ति
क्रमेण।एवं च कालस्नानापनोद्यातिशयविशेषत्वमाशौचलक्षणमुक्तं भवति।जलस्प
र्शनादिकं तु वर्णविशेषविषयत्वान्नोक्तं तदपि द्रष्टव्यं।तथा च मनुः।विप्रः शुध्यत्यपः स्प
ष्ट्वा क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः इति।कृतक्रियः
कृतसचैलस्नानक्रियः स्मृतिसंस्कृतपुत्रत्वापवादस्य वक्ष्यमाणत्वात्कन्याप्रसः सूति
कारशराचादिना आशौचस्य स्पर्शप्रतिबंधकत्वं वक्तौ न स्नायामपि कर्माधिकारप्र

Indira Gandhi National
Centre for the Arts

त्रि॰टी
३९

तिबंधकत्वाभावेऽर्विद्यमानत्वात्त्रिंशद्रात्रंपितृसुरकार्येनयोग्यापुत्रस्यतुविंशतिरात्रंनयोग्या
नदुत्तरंस्नात्वायोग्या।तथाचपैठीनसिः।सूतिकांपुत्रवतींविंशतिरात्रेणकर्माणिकारयेन्मा
सेनस्त्रीजननीमिति।आशौचेनष्टेनिर्निमित्तकर्मानधिकारासंभवादाशौचमेवतावत्प
र्यंतमितिबहवः।केचिदाशौचेगतेपिवचनात्पतितादिवत्कर्मानधिकारमात्रमित्यपिव
दंति ११ निर्हारिकः।अन्यंसवर्णमसपिंडंप्रेतंस्नेहाद्धारिना।निर्हृत्योद्वादिवसमहोरात्रम ३९
शुचिर्भवेत।एतच्चमृतपुत्रादिस्वामिकान्नाभोजिनस्तद्गृहावासिनस्तद्ग्रामवासिनश्चेद
ष्टव्यं।यस्तुनिर्हरणंकृत्वातत्स्वामिकंसिद्धमसिद्धंवाचमश्नातितद्गृहेचवसतिनवानस्य

त्रिर्हरणाभिमतातिप्रयुक्तंदशाहाद्याशौचं।यस्तुनिर्हृत्यतद्गृहवासमेवकरोतितस्यत्रि
रात्रं।तथाचमनुः।असपिंडंद्विजंप्रेतंविप्रोनिर्हृत्यबंधुवत्।विशुध्यतित्रिरात्रेणमा
तुराप्तांश्चबांधवान्।यद्यन्नमत्तितेषांतुदशाहेनैवशुध्यति।अनदन्नन्नमह्नैवनचे
तस्मिन्गृहेवसेदिति।बंधुवदितिस्नेहादित्यर्थः।एवंचग्रामांतरवासीनस्यसज्यो
तिःप्रेतस्याशौचमंनविशेषुरानक्षत्रदर्शनाद्रात्रौचेदादित्यस्येतिहारीतस्मरणा
त्।भूतियहत्तेनसवर्णशवनिर्हरणेतुतदन्नभोजनाद्यभावेपितज्ज्ञात्याशौचंभवति
।यदिनिर्हरतिप्रेतंप्रलोभाक्रांतमानसः।दशाहेनद्विजःशुध्येद्द्वादशाहेनभूमिपः।अ

Indira Gandhi National
Centre for the Arts

त्रि·टी·
४०

र्द्धमासेनवैश्यस्तुशूद्रोमासेनशुध्यतीतिकूर्मपुराणात्।अथ।शौचः।अथअ
सवर्णब्राह्मणादिःक्षत्रियादिशवंनिर्हृत्यतदुक्तंनिर्हरणीयजातिप्रयुक्तमाशौ
चंपसनादिशौभवेद्विशेषेण।ब्राह्मणाःअदग्निर्हरेत्रिंशद्दिनानिशूद्रोब्राह्मण
निर्हरेद्दशदिनानीत्येवमित्यर्थः।तथाचगौतमः।अवराश्चेद्वर्णाःपूर्ववर्णमुपस्पृ
शेत्सर्वोवाऽवरंतच्छावोक्तमाशौचमिति।उपस्पृशेत्रिर्हरेत।भक्त्याःसवर्णानिर्हा
रेनुगमनःद्विगुणं।अवराश्चेद्वर्णंवर्णावरोवाप्यवर्णमद्विवहेद्वैवंतदाशौचंदृष्टार्थेद्विगु ४०
णंभवेत्।इतिव्याघ्रपादवचनात्।यदा लंकरणमपिकरोतितदाकृच्छ्रमाशौ

पिंडस्पृष्टेतालंकरणेकृते।अज्ञानादुपवासःस्यादशक्तौस्नानमिष्यते।मित्रार्थेवोक्तं
प्रायश्चित्तंवकुर्यात्।अथ।ध्येतं।अथअनाथस्नेहादिघभाजनंसवर्णमसवर्णवाद्विजं
प्रेतंद्विजोधर्मेणनिर्हृत्याघक्रतून्नामग्निष्टोमानांशतस्यअपरिमितानांतेषांफलंलभ
अतिःतादृशःसत्वाप्लवेनेवशुध्येत।तथाचपराशरः।अनाथंब्राह्मणंप्रेतंयेवहंति
द्विजातयः।पदेपदेयज्ञफलमनुपूर्वंलभंतिते।नतेषामशुभंकिंचित्पापंवाशुभकर्मणां
।जलावगाहनात्तेषांसद्यःशौचंविधीयतइति।यत्तुश्चात्वप्राथम्यादग्निहोमएवत्व
मिप्रेत्याघक्रतवित्युक्तं।अपेचार्थवादः।आस्नवप्रहणंप्राणायामाग्निस्पर्शायोरुप

Indira Gandhi National
Centre for the Arts

त्रि·टी·
४२

लक्षणं। तथा च परमार्षः॥ असगोत्रमबंधुं च प्रेतीभूतं द्विजोत्तमं। वहित्वा च दहित्वा च प्रा
णायामेन शुध्यतीति॥ ६३ वृद्धोद्ररः॥ अंगिरा अपि। यः कश्चिन्निर्हरेत्प्रेतमसपिंडः कथंच
नास्वालासंचेलः स्पृष्ट्वाग्निं तस्मिन्नेवाह्नि वै शुचिरिति। अत्र ब्राह्मणो द्विजोत्तमग्रहणमुपल
क्षणं। मृतं द्विजं न शूद्रेण हारयेन्न च शूद्रं द्विजेनेति विष्णुस्मृतौ शूद्रमात्रस्य कर्तृत्वे नैकमत्ये
न च निषेधात्। न विप्रं स्वेषु तिष्ठत्सु न्निमानवे पि विप्रग्रहणमुपलक्षणं शूद्रसंस्पर्शदूषि
ते सिसामान्येन दोषश्रवणात्। नीत्वा। दोषी। परमगुरुराचार्यः। एतान्नीत्वा निर्हृत्य ब्रह्म ४२
चारी दोषी व्रतलोपनिषेधातिक्रमनिमित्तप्रत्यवायरूपदोषवान्भवति। तेन तु व्रतसं

धानार्थं पुनरुपनयनं प्रत्यवायपरिहारार्थं प्रायश्चित्तं च न कुर्यात्। आशौचं तु निर्हरणनिमि
त्तं पूर्वोक्तमेव वक्ष्यमाणं कुर्यादेवेत्यर्थः॥ तथा च मनुर्देवलौ। आचार्यं स्वमुपाध्यायं मातरं पितरं गु
रुं। निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यत इति। तेभ्यो मेव। उपाध्यायादिभ्योन्यं निर्हृत्य निर्हरतो
स्य ब्रह्मचारिणो वितं तं व्रतमवश्यमेव भ्रश्यते। तेन पुनराधानवद्भूरुब्रह्मचर्यसंधानार्थं
पुनरुपनयनं कुर्यात्। अपि शास्त्रात्प्रायश्चित्तमाशौचं च। तथा च देवलः॥ ब्रह्मचारी न कुर्वी
त शवदाहादिकाः क्रियाः। यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव चेति। अत्र चादिशब्देनालंक
रणादिकमेव गृह्यते न तु दाहादि। न च गुरुप्रायश्चित्तस्य वक्ष्यमाणत्वात् १२ तुल्या। ध्येता।

Indira Gandhi National Centre for the Arts

मि॰टी॰ तुल्यस्य सवर्णस्योत्कृष्टवर्णस्य वा असपिंडस्यानुयानेव स्वजनसहितोभस्य गृहीतेवमुत्यस्ना
४२ त्वाव द्विंस स्पृष्ट्वा जलं घारयच्छुध्येत । तथाच याज्ञवल्क्यः । ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः
क्वचित् । अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिरिति । अत्र च ब्राह्मणशूद्रद्विज
ग्रहणमुपलक्षणं । सर्वत्राशौचस्योक्तत्वाद्धि हितं हि सपिंडस्येत्यादिवचनाच्चासपिंडस्या
सपिंडानुगमनमात्रनिषेधतात्पर्यावगमात् । अत्र यद्यपि निषेधस्य सामान्यविषयत्वा
त्तदनंतरोक्तस्नानादिविधेरपि तद्विषयत्वमेवोचितस्येन प्रतीयते तथापि हीनवर्णानुगम ४२
नेपि स्नानाग्निस्पर्शघृतप्राशनानामितरनिरपेक्षशोधकत्वे वाक्यांतरोक्तैकरात्रादिवि

रोधापत्तेस्तत्सापेक्षशोधकत्वे हीनवर्णानुगमननिमित्तैकरात्राद्यंतैस्नानस्य प्राप्तत्वेनावि
धेयत्वात्समोत्तमवर्णानुगमने त्वप्राप्तत्वेन तस्य विधेयत्वाद्विध्यनुवादवैरूप्यापत्तेरनुवाद
वयोजनाभावात्तस्यार्थिकत्वांगीकारेण तस्य नियमविधित्वकथंचित्परिहारेपि हीनतः
दितरवर्णानुगमनयोरेकरात्रादिसापेक्षत्वतदभावाभ्यामुपात्तवपंनीत्यस्यापर्वेच तत्रैपवि
षयत्वस्वसापेक्षत्वनिरपेक्षत्वकृतविधिवैषम्यस्यापरिहार्यत्वाद्वैषम्यमेवाविकल्पासं
भवात् गत्या निषेधविषयैकदेशसमोत्तमानुगमनविषयत्वमेवतस्य स्वरसभंगेनापि
कल्प्यं । अनुगम्येच्छयापि प्रेतं ज्ञातिमज्ञातिमेव च । स्नात्वा सचेलः स्पृष्ट्वाग्निं घृतं प्राश्य विशु

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ ध्यतीतिमनुवचनमपितद्विषयमेव।अत्रतानिमांतसपिंडः।स्वसपिंडानुगमनेविहितंहिस
पिंडस्यैतेननिर्देशादिकं।दोषःस्यात्वसपिंडस्यतत्रानाद्यक्रियांविनेतिहारीतवाक्याद्दो
४२ षाभावात्।अतएवतत्रतत्राम्नाज्ञातिकादिग्रहणंकृतंमूले।ज्ञात्यनुगमनेग्निस्पर्शनघृ
तप्राशनमात्रमधिकंविधीयते।आशौचंतुयथोक्तमेवेतिरुद्रधरोक्तिस्त्वयुक्तैव।स्व
ज्ञात्यनुगमनस्यातिशयविशेषाख्याशुद्धिजनकत्वेप्रमाणाभावेनतदपनायकविधान
स्यायुक्तत्वात्।स्नापयत्यादिवत्रेपिनिक्तमात्रविधानेनविशुध्यतीत्यस्यानन्वयात्। ४२
एवंचाग्निस्पर्शघृतप्राशावपिततल्पोक्तस्यानुगमनेएवएकयोगनिर्देशात्।केचित्तुपा

गीश्वरवचनस्यसाग्रस्येरनसर्वविषयत्वात्सर्वत्रानुगमनाशौचेतावित्युक्तितत्पूर्वोक्तवि
धिवैषम्यापत्तेरयुक्तं।प्राच्यास्तुकपालकल्पवचनंनतुमूर्द्धःकथंचनेतिपाठांतरेणपठि
त्वाअनुगम्येत्यादेरपिशूद्रानुगमनविषयत्वमेवाभ्युपगम्यवाक्यांतराविरोधायानुद्धि
पूर्वप्रासंगिकतद्विषयत्वेनव्यवस्थापयंति।ममतुपूर्वोक्तपाठानुसारेणोपलक्षणत्वां
गीकारेणचनिषेधस्यसर्वविषयत्वात्तत्रहारीतविधेरपिसर्वविषयत्वेनसर्वासपिंडा
नुगमनेस्नानादित्रयंकालनिरपेक्षंशोधकंभवत्येव।वचनैकाहाद्याशौचविधायकवा
क्यविरोधायैवंविषयभेदःकल्प्यते।हीनानुगमनेप्रासंगिकेसमोत्तमानुगमनेतु

Indira Gandhi National
Centre for the Arts

त्रि॰टी
५४

द्विसर्वे इति। अत एव मनुनेदृश्ये त्युक्तमिति प्रतिभाति। इदं च घृतप्राशनं भोजननिवर्त्ति
कं। कल्पवृक्षपाठात्कृच्छ्रतुल्याभावेन भोजनकार्यविधाने प्रमाणाभावात्। अथ। याने। त्वा
नंतरं हीनवर्णसपिंडानुगमने दिनमेकाहोरात्रमशुचिः स्यात्। तथा च वसिष्ठः। शवा
नुगमने चैवमिति। अहोरात्रमत्र प्रक्रांतं। पक्षे। जले। स्नानापेक्षये कांतरस्य हीनासपिंड
स्यानुव्रजने ब्राह्मणक्षत्रियपर्यो वैश्य शूद्रानुगमनमित्यापवत्। पक्षिणापाशौचं। अत्र
वार्थे यद्यपि वचनं नास्ति तथाप्येकांतरस्य यंतरापेक्षयोत्कृष्टत्वात्तदनुगमनाशौच ५४
कालं न्यूनं स्यात् एतेपेक्षया चापकृष्टत्वात्तदनुगमनाशौचकालाधिकस्य कालस्य

तदनुगमनाशौचपरिच्छेदकस्यापेक्षायां द्विरात्रादेराशौचकालत्वेनादर्शनात्पक्षिण्ये
ता२ वं वदाशौचपरिच्छेदिका प्रक्रांतमनेनाभिप्रायेण विज्ञानेश्वरादिकल्पनैव मूलं। मिता
क्षरे। दाहृतम्हृविषयप्रेती मृतमित्यादिना व्यक्तं लग्नान्मोधवव्याख्याता छवे
चवैश्यमृतानां ब्राह्मणो योनुगच्छति कृत्वा शौचं द्विरात्रं स प्राणायामान्षडाचरेदि
तिपराशरवचनात्त्वेकांतरानुगमने द्विरात्रं प्रतीयते। आशौचदशकेपि तथैवोक्तं। अ
चतत्वं न विघ्नः। स्नांतः कुर्युः। अनुगम्य च संतरत्वे सति इह अनुगमने कृते ब्राह्मणाः
शूद्रानुगमन इति यावत्त्रिरात्रमाशौचं कृत्वा पुनर्गंगादिकापास्नात्वा अस्तु यम

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ नानांप्राणायामानांशतंसर्पिराशंघृतप्राशनंचकुर्युः। तथाचपराशरः। प्रेतीभूतंतुयःश्रद्धं
४५ ब्राह्मणोज्ञानदुर्बलः। अनुगच्छेन्नीयमानंसत्रिरात्रेणशुध्यति। त्रिरात्रेतुततस्तीर्थेनदींगत्वास
मुद्रगां। प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीति। अत्रचज्ञानदौर्बल्यंशास्त्रार्थज्ञानरा
हित्यं। अज्ञानादित्यत्रापितथा। अतएवमाधवेनेमौश्लोकावित्थंव्याख्यातौ १३ तातो। येत्वा
चार्यग्रहणेनोपाध्यायोमातामहश्चोपलक्ष्यते। अनलादित्यग्रहणेनचसकलमौर्ध्वदैहिकमुप
लक्ष्यते। तथाचअन्याधिकार्यभावेपित्रादीनामौर्ध्वदैहिककर्ताब्रह्मचारीतदीयानांसपिं ४५
डानांमाशौचमपिवृशौचमस्यतादृशोपवतिरशाहमिर्जात्याशौचभाग्भवतीत्यर्थः। तदन्ये

भ्यस्त्कतदः अग्निपिंडादिदाता[redacted]ब्रह्मचारीतिविद्वानुष्ठाननिमित्तवक्ष्यमाणकृच्छ्रत्रया
त्मकप्रायश्चित्ताद्यिनुस्युतब्रह्मचर्यसंधानार्थत्वेनाधिकारस्यस्यपुनरुपनयनंगुरुणाका
र्यमित्युकायस्तुर्वोक्तिमाशौचंवा। तथाचदोषः स्यात्वस्यपंडस्यतत्रानाद्यक्रियांविनानकदा
चिद्गोत्रापश्याद्धंकार्यमगोत्रजेरित्यादिवचनैःसर्वेषामसपिंडानामनाथमतिरिक्तास
पिंडोर्ध्वदैहिकानुष्ठानेनिषिद्धेगुरोःप्रेतस्याशौचमप्युक्तपितमेधंसमाचरन्। प्रेताहारैःस
मंतत्रदशरात्रेणशुध्यतीत्यादिवचनैर्निरन्तवमेःसपिंडत्वमतेसतिदृश्यान्वितः। तदशौचं
गुरावीत्याकुर्यात्तुपितृवत्क्रियामित्यादिवचनेभ्यःकथंचिनदनुष्ठानेसंस्पर्शाशौचविधांघो ना१

Indira Gandhi National
Centre for the Arts

त्रि·टी यस्योर्ध्वदैहिकं करोति स न ज्ञाति प्रयुक्तं संस्पर्शाशौचं कुर्यादिस्तु त्सर्गतोवसीयते। तत्र ब्रह्म ५२
४६ चारिणः सपिंडस्योर्ध्वदैहिकं भागिनेयत्वाद्युबांधवनिमित्तकाशौचनिषेधविनिर्देशोर्ध्व
दैहिकक्रियाद्यापाद्यनिमित्तकतन्निषेधाभावात्पित्रादेस्तदितरस्य च सपिंडस्याप्योर्ध्वदैहिके
तेनानुष्ठिते पूर्वोक्ताशौचे सत्येव ब्रह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरित्यादिवचनप्रति
पादितायामधिकायां ब्रह्मचर्यनिवृत्तेरेव पर्युदासोन्यत्र मातापित्रोर्गुरोर्वेत्यादिभिः क्रिय
ते पित्रादिचतुष्टयोर्ध्वदैहिकानुष्ठाने। अनेनैवाभिप्रायेणाचार्यपित्रुपाध्यायान्निर्हृत्या ४६
पिव्रतीव्रतीत्यत्र निर्हरणग्रहणस्योदकपिंडदानाद्युपलक्षणत्वमभिमतं विज्ञानेश्वरादीनां॥

तथा च व्रतस्थोपि यथा पुत्रः पितुः कुर्यात्क्रियां नृप। तथा मातामहस्यापि दौहित्रः कर्तुमर्ह
तीति भविष्यत्पुराणोक्तिर्याग्रहणांकृते। तेन पित्रादेरन्त्येष्टिकरणे तदन्नभोजनाद्यभावेपि ब्र
ह्मचारिणस्तन्निमित्तसंस्पर्शाशौचं भवत्येव। पुनरुपनयनं प्रायश्चित्तं च नास्ति अन्यत्र ज्ञा
नात्। तदितरस्य तु सपिंडस्यासपिंडस्य वान्त्येष्टिकरणे त्वितयमपीति सिद्धं। पित्रादेर्दहना
त्रकरणेऽवतदन्नभोजनाद्यभावे एकरात्रं तत्तु द्वावेव पूर्ववदेव। तथा पाराशरव्याख्यायां वृद्धवि
वेकादिषु ब्रह्मपुराणवचनं। आचार्यं वाप्युपाध्यायं गुरुं वा पितरं च वा। मातरं वा स्वयं दग्ध्वा
व्रतस्थस्तत्र भोजनं। कृत्वा पतति नो तस्मात्प्रेतान्नं तत्र भक्षयेत्। अन्यत्र भोजनं कुर्यान्न च

Indira Gandhi National
Centre for the Arts

त्रि॰टी
४७

तैः सहसंवसेत्। एकाहमप्युषित्वा द्वितीयेह्नि स्नुध्यतीति। तु शब्देन चैतदाशौचं विवे लक्षणपयो
तकेनैव सकलत्रं च नाश्नीयान्न चैतैः सह संवसेदित्युक्तं तदन्नाशनाद्यभावं दर्शयति। तथा च
पित्रादेरव्योर्ध्वदैहिके दाहमात्रे निर्हरणादौ वा तत्कारणेऽप्युत्पन्नपन्नेऽप्यायश्चित्तं च भवति। तथा
च हर्षवाक्येऽपि प्रतीत्युक्तं। अत्र चाशौचे कर्मलोपो न भवति। तत्प्रजैत्त न केकर्मब्रह्मचारीत्व
यं कचिदिति छंदोगपरिशिष्टकात्यायनवचनात्। अत्र सूतकशब्देनाशौचं मुच्यते ब्रह्मचारिणो
मुख्यसूतकाभावात्। यत्तु स्मृतिचंद्रिकायां संवर्तवचने पित्रोर्गुरोर्विपत्तौ तु ब्रह्मचार्यपि यः सु ४७
तः। स व्रतेऽप्यपि कुर्वीत त्रिपिंडोदकक्रियां। तेनाशौचं न कार्यं [illegible] संध्यादि चैव न लुप्यते। अ

ग्न्येकार्यं विकर्तव्यं सायंप्रातस्तु निन्यथा तितदाशौचं कर्तव्यं आशौचनिमित्तः कर्मानधिका
रो नास्तीत्यर्थः। तद्देवविहारणेति संध्यावेल्मादीत्येवं व्याख्येयं। आशौचस्योर्ध्वदैहिकानुष्ठान
पृष्ठलग्नस्य निषेद्धुमशक्यत्वात्। संध्यावेलाद्यपास्तप्रतिषेधानर्थक्यप्रसंगाच्च। यदपि देव
दासप्रकाशादौ प्रजापतिवचने ब्रह्मचारी यदा कुर्यात्पिंडनिर्वपणं पितुः। तावत्कालमशौचं
स्यात्पुनः स्नात्वा विशुध्यतीति तदपि तावत्कालं दशाहादिना द्विरूपपिंडदानकालपर्यंतमशौचं
स्यात्कर्माणि कर्मणि पुनः स्नात्वा विशुध्यति तत्र कर्माधिकारी भवत्यग्निहोमादावित्याहिता
ग्निरिति व्याख्येयं। देवदासादयस्तु एकरात्राशौचविधायकमाप्तवाक्यं दर्श्यते स्म सकलोर्ध्व

Indira Gandhi National
Centre for the Arts

त्रि·टी
४८

देहिकोपलक्षणत्वात्पित्राद्यौर्ध्वदेहिककर्त्तुर्ब्रह्मचारिणः प्रथमदिने आशौचमस्त्येव तन्निमि
त्तः संध्यादिलोपश्च द्वितीयादिदिनेषु तु यस्मिन्काले पिंडदानादि करोति तस्मिन्काल एवा
शौचं नेतु तत्त्र्वे ... भागयोरिति यथाश्रुतसंवर्त्तप्रजापतिवचनानुसारेण वदंति। तन्न
तिदिनं नानाशौचकल्पनागौरवादुपेक्ष्यं तस्माद्स्पृश्यत्वेतरकर्मानधिकारसंपाद
को आशौचेन्नुवर्त्तमान एव वचनात्संध्यावंदनाद्यधिकारः इतराशौचस्पर्शयनाचै
त्येव युक्तमित्येतत्सर्वमभिप्रेत्य तदीयाशौचं स्युक्तं अस्मिं अपक्षेयथा सकल
वाक्यसंगतिस्तथा प्रदर्शितमेवमयेत्यादिरन्यत्र विस्तरः। अन्ये पंचाब्रह्मचारि ४८

णोन्ये सपिंडान्य ज्ञातिकेभ्योसपिंडेभ्यः समोत्कृष्टवर्णेभ्यः स्नेहादिनाप्यन्तला
दीन्दहति तदा तज्ज्ञातिप्रयुक्ताशौचभाजः स्युस्तदंते च कृच्छ्राणां प्राजापत्यादीनां स्ने
हलोभाद्यनुसारेण गुरुलघुभूतानां त्रयं कुर्युः ननु त्रिः प्राजापत्यसंख्यायाः श्रुतत्वे
निवेशितत्वात्। तथा च प्रदीपाद्युदाहृतं वाक्यं। सगोत्रो वा सगोत्रो वा यो ग्निं दद्यात्स
खेतरः। सोपिकुर्यान्नवश्राद्धं शुध्येतु दशमेहनीति। कृच्छ्रत्रयमुक्तं मनुना। प्रात्या
नां याजनं कृत्वा परेषामंत्यकर्मेव। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्विशुध्यतीति
। अत्र वयपथ्यभिचारत्रपोत्यपिशब्दोऽहीनयाजकांत्येष्टियाजकयोः संग्रहार्थः स्युक्ता

Indira Gandhi National
Centre for the Arts

त्रि·टी
५९

मिताक्षरायामेतद्व्याख्योपन्यासाद्याजनोपक्रमाद्दीनेचतदन्वयारंभकर्मणएपि
याजयितुरेवेदंप्रायश्चित्तमितिप्रतीयतेतथापिअहीनस्यविहितत्वेनतत्कर्तुः[redacted]
प्रायश्चित्तासंभवात्तद्याजनान्वयेपिनकदाचिदग्नौत्राधेयस्यादिवाक्येनपरात्यक
र्मणोनिषिद्धत्वात्तत्कर्तुरेवप्रायश्चित्तसंभवात्त्वरसाभंगेनैवमेधातिथिनाव्या
मनुस्मृतेरप्युक्तं॥धर्मार्थंसकलौर्ध्वदैहिककरणेपिपिंडदानाद्यनंतरंस्नानमात्रा
च्छुद्धिः॥स्नेहादिसंबंधेनतुसवर्णानांदाहमात्रेत्रिरात्रं।असंबंधिद्विजान्वहित्वा ५९
दहित्वाचसद्यःशौचंसंबंधेत्रिरात्रमितिपैठीनसिस्मरणात्।उत्तमवर्णदाहमात्रे

प्यवरश्चेदित्यादिगौतमोक्तंतज्जात्याशौचं।यद्यपितत्रोपस्पर्शनंनिर्हरणेमिताक्षरायां
व्याख्यातंतथापिकेचित्तिकल्पायेनदाहेपितदिच्छंति।अतएवदाहमात्रकरणेपिसवर्णे
यदिनिर्हरतीत्यादिकूर्मपुराणोक्तंतदेव।हीनवर्णोत्तमवर्णेतुअवरश्चेदुद्धरमित्यादिस्मा
प्योक्तंद्विगुणंतज्जात्याशौचं।पत्नुयोसवर्णंतुमृत्येननीत्वाचैवदहेन्नरः।आशौचं
तुभवेत्तस्यप्रेतजातिसमंत्र्यहमितिब्राह्मणेतदापदिद्रष्टव्यं।केचित्तुदाहमात्रेपिजात्याशौ
चंभवत्येवपैठीनसित्रिरात्रंतुतदसंभवेअनुकल्पइतिवदंति।अत्रचविजातीयदाहादौ
प्रायश्चित्तमुक्तएवनिर्हरणात्तुविशेषः।आशौचंतुतद्वदेव।प्रायश्चित्तस्यचाशौचाउ

Indira Gandhi National
Centre for the Arts

सारेणान्यूनाधिकभावःकल्पनीयः।अथ.वंति।स्वापेक्षयाअधमवर्णस्यासपिंडस्यदह
नादिकरणीयस्यदाहादिकुर्वंतितेतद्वर्णमाप्नुवंतिन तुल्याभवंतीत्यर्थवादः।तेनदोषाधि
क्यात्स्वेदेनतावद्दाहेसर्वस्मिन्वौर्ध्वदेहिकेकृतेतत्तज्जातिप्रयुक्तमाशौचंप्रायश्चित्तंवानं
तरेद्विगुणंएकांतरेत्रिगुणंद्व्यंतरेचतुर्गुणं।अस्यानुआशौचंप्रायश्चित्तंचतत्तद्वर्णापेक्ष
याद्विगुणंभवतीत्यर्थः।तथाचब्रह्मपुराणे।ब्राह्मणस्त्वन्यवर्णानांनकुर्यात्कदाचन।का
मान्मोहाद्भयाल्लोभात्कुर्वन्तज्जातितांव्रजेदिति।ब्राह्मणग्रहणमुपलक्षणं।अधमजा ५०
तिप्राप्तेरेवदोषत्वात्समस्तवर्णानामितिसामान्यग्रहणेहीनवर्णपरमेवेदं।अत्रचका

मादित्येतत्पादानात्कर्मार्थेद्विजानांद्विजप्रेतदाहादौदोषाभावोगम्यते।शूद्रस्यतुधर्मेणा
पिद्विजैर्दाहादिनकार्यंशूद्रेणचतेषामिति।निर्हरणशौचेउक्तप्रायं।अत्रचनिर्हाराघा
शौचेनिर्हरणादिकर्तुःसंबंधिनांभार्यापुत्रादीनांद्रव्यग्रहणंचनाशौचंकिंतुतस्यैवा
तस्यापिनित्यकर्मलोपोनास्ति।आशौचंयस्यसंसर्गादापतेच्छूद्रमेधिनः।क्रियास्त
स्यनलुप्यंतेगृह्याणांचनतद्भवेदित्यंगिरःस्मरणात् १४ पालाशविधिः।आहिता
ग्नेःप्रोषितमृतःप्रेतस्यकाष्ठवद्दाहादिनानष्टशरीरस्यास्थ्नामलाभेपंचगव्यप्रा
क्षालितानिदग्ध्वातेषामप्यलाभेपालाशीपलाशवृंतनिर्मिताकुशमयी

Indira Gandhi National
Centre for the Arts

त्रि॰दी वाग्निकृत्तिंस्वशाखोक्तविधिनाकृत्वा तेयेवदग्ध्वा यदाकदाचिद्दाहे पितद्दिन
५२ प्रभृत्येव ज्ञातयः सर्वे सपिंडा दशाहादिसंपूर्णाशौचिनः स्युः ॥ इदं चोपलक्षणं
दुहितृदौहित्रादयोपि दाहदिनप्रभृत्येव स्वस्वाशौचभागिनः स्युः ॥ तथा च व
सिष्ठः । आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वा शववदाशौचमि
ति । अत्र च सर्वे कृतायाः शरीरप्रतिपत्तेर्लौकिकत्वात्संस्कारत्वाभावेपि संस्का
रसमानकार्यत्वात्संस्कारत्वं विवक्षित्वा तदपेक्षया प्रतिकृतिदाहस्य पुनः संस्का ५२
रत्वोक्तिः । यदा तु प्रोषितमृतस्याप्याहिताग्नेः शरीरं लभ्यते तदा तदेव दग्धव्यं । तथा

च ब्रह्मपुराणे । आहिताग्नौ विदेशस्थे मृते सति कलेवरं । निधेयं नाग्निभिर्यावत्तद्दीपे
रपि दह्यते । तावत्काले दक्षिणाग्रैः कुशैरास्तीर्य वेदिकां । अधोपरि च समिधं धार
यित्वापिधानवत् । परकीयेन वत्सेन दुग्ध्वा तां गां च तद्गृहे । गोक्षीरेणाथ तेनैव जुहुया
दग्निहोत्रकं पश्चादग्नीन्समारोप्य यज्ञभांडानि तान्यपि । उपपद्धे नविज्ञाय ततो दृषदमे
वहिमथित्वाग्निप्रणयनं कृत्वा तत्कुशापं दहेदिति ॥ ततः कुर्युः । आहिताग्नीनरे
षांस्कात्लग्निमदादीनां च तत् । ततः प्रतिकृतिदाहानंतरं त्रीणि वा दाहात्पुरतो वा कुर्युर्न
लदर्शाहादि । तथा च ब्रह्मपुराणे । अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः । तद

त्रि·टी· ५२ लाभे पलाशानां वृंतैः कार्यः पुमानपि। शीनेस्त्रिभिः पष्ठ्यधिकैः शरवृंतैर्विधानतः। वे
ष्टितव्यस्तथा पलाल्कृष्णसारस्य चर्मणा। ऊर्णासूत्रेण बध्वा तु प्रलेप्तव्यो यवैस्तथा
।सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना। असोत्वर्गयिलोकायस्वाहेत्युक्त्वा सबां
धवैः॥ एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेदिति। पर्णशरं पर्णः पलाशस्तस्य शरः प
र्णत्रयप्रवृंत्तं तन्निर्मितं प्रतिरूपकमित्यर्थः। इदं चास्थ्नामप्युपलक्षणं। विदेशमरणे
स्थीनिञ्ञा हृत्वाभ्यज्य सर्पिषा। दाहयेदूर्णयाच्छाद्य पात्रन्यासादि पूर्ववत्। अस्थ्ना ५२
मलाभे पार्णानि शकलान्युक्तया वृता। दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकमिति

छेदो गवादिशिष्टैः स्यादपि देहालाभे दाहविधानात्। इदं च त्रिरात्रं निश्चितमरणस्य
सर्वस्य प्रतिकृतिदाहे संपूर्णाशौचकालोर्ध्वं क्रियमाणे पत्नीपुत्रयोः पूर्वगृही
ताशौचयोर्भवति। अगृहीताशौचयोस्तु संपूर्णमेव। अगृहीताशौचत्वं च पञ्च
दृशवर्षादिप्रतीक्षोत्तरकालं मरणावधारणेन दाहादिकं क्रियते तत्र तत्पूर्वमरण
संदेहादेव। अन्यत्रापि मरणज्ञानेन संभवति। पत्नीपुत्रातिरिक्तानां तु द्वादशवर्षा
दिप्रतीक्षोत्तरदाहे त्रिरात्रं तत्र मरणकालविशेषानवधारणेन कालविशेषमवष्ठि
तत्रिरात्राद्यतिक्रांताशौचपक्षासंभवे प्राथमिकत्रिरात्रपक्षस्यैवोचितत्वात्। अन्य

Indira Gandhi National Centre for the Arts

त्रि॰टी त्रतुत्रिरात्राद्यतिक्रांताशौचप्रश्न एवमेव लयाभवंति। दशाहाद्यंतः प्रतिहतमिदादे
तुसर्वेषां कालशेषएवंतुत्रिरात्रं। अत्र च सर्वत्र त्रिरात्रवचनस्याकांक्षितविधित्वंमूलं
५३ ।तथाहि सर्वोक्तत्रिरात्रविषये दशाहांपायाशौचपरिच्छेदककालविशेषापेक्षायांत्रि त्र
रात्ररूपतद्विधीतस्यवचनस्याकांक्षितविधित्वंभवति। अस्मत्रतुकौशेषादेर्निर्णी ल
तत्वेनापेक्षाभावान्नाकांक्षितविधानंस्यात्।तथाश्वलायनाद्यपरिशिष्टमपि। अथा
तीतसंस्कारः सचेदं तदेशाहंस्यात्तत्रैवनत्सर्वसमापयेत्। ऊर्ध्वमाहिताग्नेर्दशाहादिभ्यः स ५२
र्वदाशौचंकुर्यात्कर्म च यथाकालमन्येषु पत्नीपुत्रयोः एवमगृहीताशौचयोः सर्वदा

शौचंगृहीताशौचयोः कर्मांगंत्रिरात्रमिति। एतद्गुलादेवदर्शितंतत्काप्रत्ययाद्दाहकर्म
मात्रविषयत्वेनप्रतीयमानस्यापित्रिरात्रस्यसमानकर्तृकत्वाविवक्षयापत्नीपुत्रवि
षयत्वमुक्तं। विष्णुदर्शेतुप्रतिकृतिदहनेत्वग्निदेस्यात्त्रिरात्रमित्यभिधानाद्दाहक
र्तुरेवत्रिरात्रमितरेषांतुप्रोषितमरणादिरीत्येतिप्रतीयते। केचित्तुसपिंडानामपित्रि
रात्रमुक्तं। ममत्विदंप्रतिभातिपारिशिष्टवचने आश्वासस्तदात्रिरात्र
स्यगृहीताशौचपत्नीपुत्रविषयत्वंपूर्वोक्तयुक्तमेव। यद्यनाश्वासस्तदाद्वादशव
र्षादिप्रतीक्षानंतरंदाहेसर्वेषांपुत्रादीनांत्रिरात्राशौचप्रतिपादककल्पतरुरेवदा

Indira Gandhi National Centre for the Arts

सप्रकाशादिग्रंथदर्शनाग्निनाश्मरादिस्वास्यच्च समानकर्तृकत्वाविवक्षयागृहीता
शौचानामगृहीताशौचानांवा सर्वेषांपुत्रादीनां सपिंडानां सर्वत्रश्रुतिस्मृतिदाहे स्ना
शौचकालादूर्ध्वं क्रियमाणे त्रिरात्रमितिपुत्रमिति। देशांतरगतस्यजीवद्वार्ता नाक
र्णने विशेषो गृह्यकारिकायां। दूरदेशांतरगते जीवद्वार्ता पुनः पुनः। इतस्ततसमन्वि
ष्टेस्मर्यालोच्यगतागतैः। तस्यामश्रूयमाणायांवयः कालविशेषतः। तस्यपूर्ववय
स्कस्यविंशत्यब्दोर्ध्वतः क्रिया। ऊर्ध्वंपंचदशाद्वाचतुर्थमध्यमे वयसिस्मृता। द्वादशाद्ध्वस
रादूर्ध्वंपुनरेवयसिस्मृता। चांद्रायणत्रयंकृत्वात्रिंशत्कृच्छ्राणि वाप्युनैः। कुशैः प्रति



कृतिंतस्यदग्ध्वाशौचादिकाः क्रियाः इति। कार्याः इति शेषः। अन्यो नेषां। अन्योसगो
त्रोविप्रादीनामशौचेवृद्धिपूर्वेसत्कृदपिअन्नापरितत्स्वापिकंअस्नंपिडान्नमदत्वा
न्नम्यक्षिन्निनेयुक्तं नदाशम्यावत्तेषामाशौचंविशिष्टं तावदाशौचकारी सापिस्यानां त
थाचाविष्णुः। ब्राह्मणादीनामाशौचेयः सकृदेवान्नमश्नाति तस्यतावदाशौचंयावत्ते
षामिति। एवंच प्रथमदिनेतदन्नभोजनमात्रेपिपरादशाहाशाद्वारितदानिर्हैमतदन्नभो
जनमात्रेत्रिरात्रंपंडुदंधरेतोक्तंनघटितं विदेव। अबुद्धिपूर्वंतुभोजने ज्ञातेदशाहे
भुक्त्वान्नेसततकेमृतकेपिवा। अस्याशौचंभवेत्तावद्यावदन्नं व्रजत्यधः इत्यांगिरसदर्शनं।

Indira Gandhi National
Centre for the Arts

त्रि·टी· आपदि तु कामतोऽकामतो वाऽनन्नभोजने यावत्तद्वमनमतिदुर्भिक्षोपद्रुतो नरः
५५ ।तावत्स्नानमशौचे वा स्यात्प्रा[redacted]पश्चित्तं न तच्चरेदिति कूर्मपुराणोक्तं।अनुक्तान्य
या ६३ तिरिक्तासिद्धतद्दी॰ नीयप्रतिपदे तु नाशौचे किंतु वक्ष्यमाणप्रायश्चित्तमेवार्धकृत्स्ना
योज्यं।नक्तं चरेत्।नक्तं ते आशौचे तु तेन व्रतं प्रायश्चित्तमपि विविधं अवस्थया चरेत्।
तथा च विष्णुः।आशौचव्यपगमे प्रायश्चित्तं कुर्यादिति।तत्र कामतः सकृद्भोज
ने भुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः।भुक्त्वा तु क्षत्रियाशौचे तथा कृच्छ्रो वि ५५
धीयते।वैश्याशौचे तथा भुक्त्वा महासांतपनं चरेत्।शूद्रस्य च तथा भुक्त्वा द्विजश्चां

द्रायणं चरेदिति मार्कंडेयोक्तं द्रष्टव्यं।तत्रैवाभ्यासे शूद्रस्य सूतके भुक्त्वा षण्मासान्व्रतमा
चरेत्।वैश्यस्य तु तथा भुक्त्वा त्रीन्मासान्व्रतमाचरेत्।क्षत्रियस्य तथा भुक्त्वा द्वौ मासौ व्रत
माचरेत्।ब्राह्मणस्य तथा भुक्त्वा मासमेकं व्रती भवेदिति शंखोक्तं।अकामतः सकृद्भो
जने अज्ञानाद्भुंजते विप्राः सूतके मृतके तथा।प्राणायामशतं कृत्वा शुध्यंते शूद्रसू
तके।वैश्ये षष्टिं भवेद्राज्ञि विंशतिर्ब्राह्मणे दश।एकाहं च त्र्यहं पंच सप्तरात्रमभोजनं।
ततः शुचिर्भवेद्विप्रः पंचगव्यं पिबन्नपि इति छागलेयोक्तं।ब्राह्मणादिक्रमेणैकाहादयो
योज्याः।अकामतोऽभ्यासे त्वेतद्द्विगुणं।आपद्यकामतः सकृद्भोजने अज्ञानाद्भु

Indira Gandhi National
Centre for the Arts

जतेविप्राः सूतकेमृतकेपिवा। प्रायश्चित्तंकथंतत्रचातुर्वर्ण्येविधीयते। गायत्र्यष्टस
५६ हस्रेणशुद्धिःस्याच्छूद्रसूतके। विशःपंचशतेनैवक्षत्रियस्यशतेनच। ब्राह्मणस्य
तथाभुंक्तेप्राणायामेनशुध्यति। अथवावामदेव्येनसाम्नैकेनैवशुध्यतीतिपराश
रोक्तं। तत्रैवकामतःसवर्णस्याशौचेद्विजोभुक्त्वास्रवंतीमासाद्यतत्रिमग्नस्त्रिरघ
मर्षणंजप्त्वोत्तीर्यगायत्र्यष्टसहस्रंजपेत्। क्षत्रियाशौचेब्राह्मणस्त्वेतदेवोपोषितः
कृत्वाशुध्यति। वैश्याशौचेब्राह्मणस्त्रिरात्रोपोषितश्च। ब्राह्मणाशौचेराजन्यःक्ष ५६
त्रियाशौचेवैश्यःस्रवंतीमासाद्यगायत्रीशतपंचकंजपेत्। वैश्यश्चब्राह्मणाशौचे

गायत्र्यष्टशतंजपेत्। शूद्राशौचेद्विजोभुक्त्वाप्राजापत्यंचरेत्। शूद्रश्चद्विजाशौचेस्ना
नमाचरेत्। शूद्राशौचेशूद्रःस्नात्वापंचगव्यंपिबेदितिविस्मृक्तं। आपद्यभ्यासेत्वेत
स्यैवावृत्तिः। वैश्यवातिरिक्तंचसर्वव्रतजातंब्राह्मणस्यैवभोक्तुःक्षत्रियादेस्तुपादपा
दह्रासनंकल्प्यं। एतच्चप्रायश्चित्तमाशौचिस्पृष्टत्वापिकसिद्धान्नभोक्तुराशौचिस्पृष्ट
भोजननिमित्तप्रायश्चित्तेनसमुच्चीयते। निमित्ताविनाभावाभावात्। आशौचस्पृष्ट
द्रोक्तस्तकेवलं। आमसिद्धान्नभोक्तुस्तूक्तं। हेरःरात्रं। अत्रसपिंडोसपिंडमरणनिमित्ते
गोरन्नेश्रुतपातकेतत्रिमित्तमेकरात्रमाशौचंकुर्यात्। तथाचपारस्करः। मृतस्यबांध

त्रि·टी· वैः सार्धं कृत्वानुपरिदेवनं। वर्जयेत्तदहोरात्रं दानं श्राद्धादिकर्म चेति। अत्र च रोदननि
५७ मित्तेकरात्रमा... शौचप्रतिपादकमिदमेकमेव वचनं मिताक्षरायां लिखितमिति कृ
त्वा मूलकारेणानादृतोक्तं। गौतमीयमिताक्षरापराशरव्याख्याशौचदशकादिदाक्षि
णात्यनिबंधेषु हारलताशुद्धिविवेकादिप्राच्यनिबंधेषु तु वचनप्रदर्शनपूर्वकं वर्णका
लभेदव्यवस्थिता नानाविधा आशौचकल्पाः प्रदर्शिताः। तेयथा। ब्राह्मणादीनां ब्रा
ह्मणविषये रोदने अस्थिसंचयनात् पूर्वं स्नानं तदुत्तरमाचमनं। क्षत्रियादीनां क्षत्रि
यविषये वैश्यशूद्रयोश्च वैश्यविषये शूद्रस्य च शूद्रविषये रोदने अस्थिसंचयनात्पूर्वं ५७

सचेलस्नानं तदूर्ध्वमाचमनमात्रं। तथा च ब्रह्मपुराणे। मृतस्यपादस्थीनि ब्राह्मणस्या
हृतानि तु। तावद्यो बांधवस्तत्र रौति तद्बांधवैः सह। तस्य स्नानाद्भवेच्छुद्धिस्ततस्त्वाचम
नं स्मृतं। ततः अस्थिसंचयनानंतरं। सचेलं स्नानमन्येषामकृते त्वस्थिसंचये। कृते तु के
वलं स्नानं क्षत्रविट्शूद्रजन्मनामपि। अन्येषां क्षत्रविट्शूद्रजन्मनामित्यन्वयः। अ
त्र चाशौचभागिसमर्पकमबांधवपदं समहीनवर्णपरं न तु ब्राह्मणमात्रपरं प्रमाणाभा
वात्। ब्राह्मणस्य क्षत्रियवैश्यविषयेपि तत्रैव। अस्थ्नां संचयने विप्रो रोतिचेत्क्षत्रवैश्य
विषयेष्वेतेरेवतुल्यत्वात् शूद्रविषये तु अस्थिसंचयनात्प्राक् ब्राह्मणस्य त्रिरात्रं क्ष
यः। तदा स्नातः सचेलस्तु द्वितीयेहनि शुध्यति। कृते तु संचये विप्रः स्नानेनैव शुचिर्भवेत् इति
क्षत्रियवैश्य १

त्रि·टी त्रियवैश्ययोर्द्विरात्रं तदूर्ध्वं तु सर्वेषां द्विजातीनामेकरात्रं। यथाह पारस्करः। अस्थिसंचयनादर्वा
५८ ग्दिवि प्राश्रुपातयेत। मृते शूद्रे त्र्यहं गत्वा त्रिरात्रेण विशुध्यति। अस्थिसंचयनादूर्ध्वंभा
त सोयावद्विजायिनः। अहोरात्रेण शुध्यंति वाससः क्षालनेन वा सजातेर्दिवसेनैव त्र्यहात्क्षत्रि ग
यवैश्ययोरिति। सजातेरित्यर्थः अस्थिसंचयनप्राक्कालविषयत्वेन तत्संलग्नत्वाद्द्विजाती
नेतरत्वेन तदर्थो ह्यहं। सजातेः शूद्रस्याहोरात्राभिधानं च तद्गृहवासाद्यनुबंधवतो द्रष्टव्यं
। अन्यस्य तु पूर्वोक्तं सचेलस्नानमेवेति। असपिंडवाचकान्यज्ञातिकपदोपादानेन सपिंडा ५८
नां निर्हरणादौ दोषाभावो दर्शितः। तथा च हारीतः। विहितं हि सपिंडस्य प्रेतनिर्हरणं

दिकं। दोषः स्यादसपिंडस्य तत्रानाथक्रियां विनेति।।५५।। सर्वत्राशौचेऽशुचित्वादेव सर्वेषा
मस्पृश्यत्वे प्राप्ते क्वचित्केषांचिदपवादमाह। जन्म। वर्जं। जन्मनि तत्त्रिपित्राशौचे मातवर्जं
सूतिकाव्यतिरिक्तानां कुलजवामाशौचभागिनामस्पृश्यता नो भवति। सूतिकायास्तु या
वद्दशाहाद्यस्पृश्यतेव। उत्तरकालं तु मासादिपर्यंतं पक्षद्वयमुक्तं। तथा चांगिराः। सूतके
सूतिकावर्जं संस्पर्शो न निषिध्यत इति। पितुश्चैलात्। चस्त्वर्थे। जनकस्य तु सचेलात्स्ना
नादूर्ध्वं तत्रास्पृश्यता नो भवति। तत्सर्वं तु तस्याप्यस्पृश्यतेव। अन्येषां तु सचेलस्नाना
भावात्त्रिमित्तादारभ्यैवास्पृश्यत्वं न भवति। एवं समर्थात्पितुर्जन्माशौचे स्नानमपि वि

Indira Gandhi National
Centre for the Arts

त्रि.टी.

५८ ह्तिंभवति।तथाचसंवर्त्तः।जातेपुत्रेपितुःस्नानंसचेलंतुविधीयते।माताशुध्येद्दशाहेनस्नाना
त्तुस्पर्शनंपितुरिति।अत्रचपुत्रग्रहणमविवक्षितंनिमित्तविशेषणत्वात्सूतिमात्रविषये
णमाताशुध्येद्दशाहेनेत्येतेनसमभिव्याहाराच्च।अतिप्रसंगस्यचविधेयविशेषणेनपितु
रित्यनेनैवपरिहारात्।तथाचसामान्येनैवब्रह्मपुराणवचनं।सूतकेतुमुखंदृष्ट्वाजातस्यज
नकस्ततः।कृत्वासचेलस्नानंतुशुद्धोभवतितत्क्षणादिति।पित्रोस्तुसूतकंमातुस्तदसृग्दर्श
नाद्ध्रुवमितियोगीश्वरवचनेच।नाशौचंसूतकेपुंसःसंसर्गंचेन्नगच्छति।रजस्तत्राशुचिज्ञेयंत ५८
च्चपुंसिनविद्यतइत्यंगिरोवचनंतुमिथुनीभावात्मकसंसर्गाभावेस्नानोत्तरमस्पृश्यतानास्ति

पितुःसंसर्गेतुतदुत्तरमप्यस्पृश्यतेत्येतदर्थप्रतिपादकं।एवंचव्यवस्थितेनासंवर्त्तव.चनेपुत्र
ग्रहणंविवक्षितमत्वापुत्रसूतकेसंसर्गेऽस्पृश्यतानापत्तिमनालोच्यांगिरोवचनस्यकन्या
सूतकपरत्वंकृत्वाकन्यासूतकेस्नानात्पूर्वमपिपितुर्नास्पृश्यत्वमित्युक्तंतद्धेयं।अथ.प
रि।अल्पेनिधनकृताशौचेऽनुपनीताचार्यादिमरणे त्रिपिते त्रिरात्राद्याशौचेत्रिभागे
सतिपूर्वांशस्योपर्यस्पृश्यतानोपभवति।तथाचदेवलः।स्वाशौचकालाद्विज्ञेयंस्पर्शनंतुत्रि
भागतः।शूद्रविट्क्षत्रविप्राणांयथाशास्त्रप्रचोदितमिति।स्वाशौचस्यत्रिरात्रादिरूपत
त्यरिक्तेरककालस्यावयवभूतोयस्तृतीयभागरूपात्कालादनंतरंस्पर्शनंविज्ञेयमित्यर्थः।

Indira Gandhi National
Centre for the Arts

त्रि·टी·
६०

तेनैव संपूर्णाशौचे विशेषाभिधानादिदमपूर्णाशौचविषयं। न च तस्य सर्ववर्णसाधारण्या
च्छूद्रादीनां स्वाशौचकालादिरस्यासंगतिरिति वाच्यं। यत्र त्रियत्रं विप्राणामाशौचं संप्रद
शपंचेति तत्र भूदेहादशाहः मासेनैव स्वत्रैवैश्ययोरित्यादिवचनैः संपूर्णाशौचस्यापि विषम
स्योक्तत्वात्। सहास्य तिविरोधादननुष्ठानमात्रं तु तस्यास्थ्यःरिष्यतां। सहति च दशाहादि
रूपे संपूर्णे निधनकृताशौचे तृतीयभागादूर्ध्वमस्पर्शयता नो भवति यदि प्रथमततो
यभागे संचायनमस्थिसंचयनं कृतमासीत्कृतं भवति। नो चेद्यदि सप्तमादिदिनेषु संचय ६०
नं क्रियते तदा तस्य संचयनस्योपरिष्टात्कालेऽस्पर्श्यता नो भवति। अस्थिसंचयनस्य

च कालं वक्ष्यति। तथा च देवलः। दशाहादित्रिभागेन कृते संचयने क्रमात्। अंगस्पर्शनमिच्छं
ति वर्णानां तत्वदर्शिनः। त्रिचतुःपंचदशभिः स्पृश्या वर्णाः क्रमेण तु भोज्यान्ना दशभिर्वि
प्रः शेषास्तु त्रिषड्नरैरिति। ब्राह्मणादीनां वर्णानां क्रमाद्दशाहादिकालतृतीयभागेन ग
तेन तत्र संचयने कृते सत्यंगस्पर्शनमिच्छंति। तदेव विवृणोति त्रिचतुरित्यादि। किंचिदधि
के त्रिभिरिति द्रष्टव्यं। आशौचकालमाह भोज्यान्न इत्यादि। क्रमेण दशभिः क्षत्रियः। अक
त्रैर्द्वादशभिर्वैश्यः। त्रिगुणिताः षडष्टादशतन्नैर्द्वादशभिः शूद्र इति त्रिपदाहत्वाख्या
ख्येयं। षड्नरैः पंचदशभिरिति मिताक्षराव्याख्यानं तु दशभिरित्यत्र विरोधादुपेक्ष्यं तथा

Indira Gandhi National
Centre for the Arts

त्रिं·टी·
६१

वाशौचकालाद्यतृतीयभागापगमसंचयनानुष्ठानयोर्मिलितयोरेवस्पर्शप्रतिबंधशक्त्य
पनायकात्वंनत्वेकैकस्येत्युक्तंभवति।एवंचचतुर्थेह्निकर्त्तव्यः संस्पर्शोब्राह्मणस्यच।ए
कादशेत्वन्नशुद्धिर्दानमध्ययनक्रिया।पंचमेह्निकर्त्तव्यः संस्पर्शः क्षत्रियस्यतु।षष्ठेवाह्
निवैश्यस्यवित्तेयंस्पर्शनंबुधैः।क्षत्रियस्यान्नशुद्धिःस्याद्द्वादशाहेननित्यशः।अर्धमासे
नवैश्यस्यद्वादशाहेनवापुनः।दशमेह्निशूद्रस्यकार्यसंस्पर्शनंबुधैः।मासेनैवतुशुद्धिःस्या
त्सूतकेमृतकेतथेत्यंगिरोवचनेसंचयोप्युपलक्षितोद्रष्टव्यः।तेनसंचयस्त्पलक्षणमिति ६१
यत्पाउशीनावुक्तंतत्प्रमाणाभावान्नियतकालोपलक्षणासंभवाच्चायुक्तं।अतएवास्थिसं

चयनानंतरंदिनात्रित्रिधाविभज्येत्यादिकस्यचित्त्रोचेरितस्यव्याख्यानमपिनिर्मूलं।इदंचक
लियुगनिषिद्धेषुमाधववायाद्दोपठितं।अस्थिसंचयनादूर्ध्वमंगसंस्पर्शनंतथेति।अत्रचास्थि
संचयनंतृतीयभागस्याप्युपलक्षणंनिषेधस्यप्राप्तिसापेक्षत्वेनयथाप्राप्तिवर्णनात्।अथ
रणात्।गृहेस्वदास्यांजातयोर्दासयो[redacted]र्गर्भदास्यागर्भदासस्यचस्वसपिंडादिमरणनिमि
त्तेआशौचेआत्मबोधैःसचेलस्नानानंतरंअन्यसाध्येकार्येअस्पृश्यतोभवति।अत्रेनोपा नो।३
नयोस्तदासयोर्भक्तदास्याभक्तदासस्यचत्रिरजनिवरणादहोरात्रत्रयापगमादूर्ध्वंनचैव
कार्येअस्पृश्यतानोभवति।तथाचमिताक्षरोदाहृतस्मृत्यंतरे।सद्यःस्पर्शोगर्भदासोभक्त

Indira Gandhi National
Centre for the Arts

द्दा२

त्रि·टी· दासस्याहाहतुचिरिति। दासादिशब्दैश्च तत्कर्मविशेषोपस्थापनादान्तर्प्याधिकत्वाच्चाशोचसंकोच
६२ स्यैव दासान्वयत्कर्मकुर्वत्यपि बली लया। तस्यैव न क्षमः कर्तुं तस्मान्निश्चयः सदैत्यादिवच
नाच्चान्नमस्ता आवश्यकत्वं तत्कार्यविषयमेवेदं शुध्यभिधानं। एवं स आदिष्वपि द्रष्टव्यं। स्तन·
ऊर्ध्वं। स्तनदासादिकानां स्वामिनो ग्राहणादैर्याः स्वाशौचपरिच्छेदकाहसंख्यानत्समानां तन्म
भिमितानां छिन्नानां गमनातिक्रमणाद्यर्थं समर्पिया वन्यासाधाशौचे स्वस्वकार्ये अस्पृश्यता
नो भवति। आदिपदेन गृहजातस्तथा क्रीतो लब्धो दायादुपागतः अन्नाकालभृतस्तद्वदाहि ६२
तः स्वामिना च यः। मोक्षितो महतश्चर्णाधमद्व प्राप्तः प्रोजितः। तवाहमित्युपगतः प्रव्रज्याव

सितः कृतः। भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पंचदशस्मृ
ताः इति नारदोक्तपंचदशदासेषु भक्तगृहदासातिरिक्तानां दासानां उत्तमस्त्वा सुधीयोत्रमध्य
मस्तु कृषीबलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृतः इति तदुक्तस्यैव भृतकस्यत्वाशि
ल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया। आचार्यस्य वसेदंते कृत्वा कालं सुनिश्चितं। आचार्यः
शिक्षयेदेनं स्वगृहे दत्तभोजनं। न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत्। शिक्षयंतमसंदुष्टं यस्त्वा
चार्यं परित्यजेत्। बलाद्वासयितव्यः स्याद्वधबंधौ च सोर्हति। शिक्षितोपि कृतं कालमंतेवासी स
मावसेत्। तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलं। गृहीतशिल्पः समयेकृत्वाचार्यं प्रदक्षिणं। शि

Indira Gandhi National
Centre for the Arts

त्रि·टी
६३

क्षितश्चानुमास्येन मंतेवासी निवर्त्तत इति तदुक्तस्यैवांतेवासिनश्च ग्रहणं। तथा च बृहस्पतिः
।दासांतेवासिभृतकाः शिष्याश्चैकत्रवासिनः। स्वामितुल्येन शौचेन शुध्यंति मृतसूतक
इति। ॐष्यो विद्यार्थी। न चात्रांतेवासितुल्याचरणो ग्राह्यः। तत्साहचर्यात् नास्तिकायास्तु दा
स्यान्यस्यापत्यमपि मासपर्यंतमेव। तदाहांगिराः। दासी दासश्च सर्वो वै यस्य वर्णस्य यो
भवेत्। तद्वर्णस्य भवेच्छौचं दास्यां मासस्तु सूतकमिति। दासश्चात्र स्वक्रीतादिः। अत्र
च वचनद्वयेपि सत्येव श्वशुरत्वादिनिमित्ते स्वसपिंडमरणे मासाद्याशौचे दासत्वादिनिमि ६३
त्तास्वामिकार्यस्य रूपे तेषु प्रतिपादितेन तत्राशौचस्यैव संकोचस्तन्निमित्तः प्रतिपादित इति

हारश्चोक्तं पुरुक्तं। मूल्यकर्मकराः शूद्रा दासी दासास्तथैव च। स्नाने शरीरसंस्कारे गृहक
र्मण्यपदूषिताः इति वचनेन कार्यविशेषे शुद्धौ प्रतिपादितायामपेक्षितत्वसंपादकका
लविशेषसमर्पणेपलाघवात्। यत्तु वाचस्पतिना दासादीनां स्वामिसपिंडमरणे आ
शौचमेव स्वामिसमकालमत्र प्रतिपादितमित्युक्तं तन्मंदं। एवोक्तपुरुचस्पर्शार्हत्वल
क्षणशुद्धिपरत्वेन शौचशुद्धिपदयोः कर्माधिकाररूपतत्परत्वाभावात्। सत्यपि वा
तत्परत्वे आशौचशुद्धिवादेन कालविशेषमात्रविधानात्स्वसपिंडमरण एव चनत्वामि
त्तत्रैव दासत्वादिनिमित्त आशौचकालसंकोचः स्यात्। न हि स्वामिसपिंडमरणे दा

Indira Gandhi National
Centre for the Arts

त्रि.टी. सादीनामाशौचव्यापकमस्ति। शिष्यांतेवासिनोर्गुरुमरणे त्रिरात्रादिवत्कामं स्वामिमरणे
६४ दासादीनां स्वामितुल्यमन्यद्वाशौचं वचनांतरबलादस्ति चेदस्तु। न त्वनयोर्वचनयोस्तत्रापि
स्वामितुल्याशौचप्रतिपादकत्वं एकत्र गुरुमरणनिमित्तत्रिरात्रादिकाशौचभागि शिष्यां
तेवासिसमभिव्याहारात्। अपरत्र दासामासस्तु सूतकमित्यनेनस्तम भिव्याहारात्।
न च पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचं मृते स्वामिन्यात्मीयमिति वि
ष्णुवचने पत्नीनां स्वामिसपिंडमरणे स्वामितुल्याशौचप्रतिपादनाद्दासानामपि तत्रै ६५
व तत्प्रतिपादनमिति वाच्यं। पत्नीनामपि स्वसपिंडमरणे तावत्कालास्पृश्यत्वस्यैव त

त्रापि प्रतिपादनात्। स्वामिस्वसपिंडयोरस्पृश्यत्वाशौचकालयोश्च संप्रतिपत्तिः पत्नी
ष्वस्ति सुभेदस्त्वन्यत्र तत्। तस्मात्स्वामिमरणे तत्सपिंडमरणे वा स्वामितुल्यमाशौच
मिति नैषां वचनानामर्थः किंतु अस्पृश्यत्व एव। दासादीनां तु स्वामिशौचेन स्पृश्यत्वं क
र्माधिकारस्तु मासावधिरेव। तदाहांगिराः। दासादासश्चेत्यादि मिताक्षराग्रंथा
दृष्यं वमेवावगम्यते। षडशीतावप्येवमेव। स्वामिशौचे तदासाद्याः स्पृश्या मासात्तु
कर्मसु। योग्याः स्युर्मासतो दासास्ता चेत्सम्पूपतामियादिति। न हि स्वामिमरणे त
त्सपिंडमरणे वा मासाशौचसंभवः। विष्णुवचने चानुलोम्येनेति विशेषणात्स्वानि लोम

Indira Gandhi National
Centre for the Arts

त्रि॰टी
६५

दासानांवर्णानामानुलोम्येनदास्यंनप्रतिलोमतःइतिनिषेधातिक्रमात्प्रतिलोमाश्रित
स्त्रीणांश्रिवाशौचाभावः।अन्यत्तूक्तं।जन्मन्यस्पृश्यतेमातादशाहंपंचोषः।अन्यत्तुकार्म
णिकास्त्रक्ष्मा माशौचंमातवर्जंसपिंडादीनांदशाहादिरूपंसुखस्पर्शंयुक्तमित्यस्पृ
श्यतेत्यस्याप्यावश्यमुक्तं।ज्ञातेःयोग्याः।अपत्येजातेसतियस्मिन्नहनियस्यांवाराज्ञाव
पत्यजन्मतस्मिन्नहनितस्यांवाराज्ञौचकारात्सप्तदशमदिनेयोम्यतस्यापत्यस्यमंगलंकु
र्यात्पोनरर्थ्येपुरानरसंजादिषुस्मृतिपुराणोक्तेषुसदाचारप्राप्तेषुचपेयांपिचादीनांपानि ६५
विहितानितेषुतेसत्यप्याशौचेयोग्याअधिकारिणोभवेयुः।तन्मंगलार्थयहणंजातस्या

द्वारेऽप्युपलक्षणं।तथाचब्रह्मपुराणे।देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां।आयांतितस्मा
त्तदहःपुण्यंपूज्यंचसर्वदा।तत्रदद्यात्सुवर्णंचभूमिंगांतुरगंरथं।छत्रंछागंचमाल्यंचशयनं
चासनंगृहं।जातश्राद्धेचनरदैत्यक्तान्नंब्राह्मणोऽपिपीति।अन्यदपिकर्तव्यमुक्तंव्यासेनास्
तिकावासनिलयाजन्मदानामदेवताः।तासांयागनिमित्तंतुशुद्धिर्जन्मनिकीर्तिता।प्रथ
मेदिवसेषष्ठेदशमेचैवसर्वदा।त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनीति।मार्कंडेयेनापि
।रक्षणीयातथाषष्ठीनिशातत्रविशेषतः।रात्रौजागरणंकार्यंजन्मदानांतथाबलिः
।पुरुषाःशस्त्रहस्ताश्चगीतनृत्यैश्चयोषितः।रात्रौजागरणंकुर्युर्दशम्यांचैवसूतके

Indira Gandhi National Centre for the Arts

ति। जन्मदिनाच्चोर्ध्वमशुद्धिर्नालच्छेदात्सर्वमेवद्रष्टव्या। प्राङ्नालच्छेदात्संस्कारपुण्यार्थान्कु
र्वीत। नाड्यांछिन्नायामशौचमितिहारीतस्मरणात्। तथानकेवलंग्रहणादिवदानएवाधि
कारः। प्रतिग्रहेपिनदोषः। तदाह बृहद्याज्ञवल्क्यः। कुमारजन्मदिवसेविप्रैःकार्यःप्रति
ग्रहः। हिरण्यभूगवाश्वाजवासःशय्यासनादिषु। तच्चसर्वंप्रतिग्राह्यंपक्वान्नंतुनभक्षये
त्। भक्षयित्वाचतन्मोहाद्द्विजश्चान्द्रायणंचरेदिति। इदमपिनालच्छेदात्पूर्वमेव। कुमारप्र
सवेनाड्यामच्छिन्नायांगुडतिलहिरण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहेदोषइतिशंखलि 
खितवचनात्। सर्वाश्रमाणांयतिश्चतुर्थाश्रमी। वनीतृतीयाश्रमी। ब्रह्मचर्यस्थितःप्रथ

माश्रमी। एतेषांसर्वेसपिंडाःसपिंडजननादिनिमित्तकमाशौचंसदासंध्यावंदनादिकालेपि
नतुसत्रादिवत्कार्यविशेषकालेनोभवति। तथाचयाज्ञवल्क्यः। ब्रह्मचारिदानंब्रह्मवि
दांतथेति। दातादानमात्राधिकारीवानप्रस्थः। अयंचाशौचाभावःकर्मविशेषोपस्थाप
कपदाभावान्मातापितृजकर्मणीत्यादिवद्वचनाभावाच्चसर्वविषयइत्यभिप्रेत्योक्तंसदेति
। सर्वाशौचपदेनचात्रसपिंडसोदकदौहित्रभागिनेयत्र्यंघनापाद्यनिमित्तकाशौचमेवग्राह्य
तेनत्वापाद्य[redacted]दाहनिर्हारादिनिमित्तं। तस्येवदार्ढ्यार्थत्वेननिषेधार्थमनुवादोवि
स्मात्। किंवह्न्यादिभुनावदनापाद्यनिमित्तकाशौचविषयएवनिषेधः। तत्रतस्यतत्क

त्रि·टी ६७ र्माधिकारप्रतिपादनार्थत्वादापाद्यनिमित्तके च तदधिकारस्याशौचस्य संसर्गादापते
रुद्दमेधिनः। क्रियास्तस्य न लुप्यंते गृह्याणां च न तद्भवेदिति वचनेन सिद्धत्वादानर्थक्या
पत्तेः। तथा च तत्समभिव्याहाराद्यस्मादिष्वपि तद्विषय एव निषेधः। तत्र न तत्कार्यविषयो
ऽत्र तु सर्वविषय इत्येतावान्विशेषः। अत एव यपि आदेर्दाहादिकर्तुर्ब्रह्मचारिणोऽप्युक्ता
नाद्व्रतभ्रंशाभावेप्याशौचमस्त्येव अन्यस्यानुतत्कर्तुर्व्रतभ्रंशोपीत्युक्तं पूर्वं। अत्र च यद्यपि
वैतानौपासनाः कार्याः क्रियाश्च श्रौतिचोदनादित्यनेनैव दीक्षितानां यज्ञियकर्माधि ६७
कारस्य सिद्धत्वात् ऋत्विजां दीक्षितानां वैतानादियोगीश्वरवचनेनाप्यदीक्षितपूर्ववचनानर्थ

क्यं याजमानेषु स्वयं कर्तृत्वसद्यःशौचपदस्य स्नानाभिधायित्वाभिप्रायावगमादिति
तत्समभिव्याहृतेषु यस्मादिष्वपि सपिंडजननादौ स्नानकालावच्छिन्नमाशौचं प्रतीयते तथा
पि शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिंडानां जननेप्येवं नैष्ठिकानां
व्रतस्थानां यतीनां ब्रह्मचारिणां। नाशौचं सूतके प्रोक्तं शावे चापि तथैव चेत्यादिगौतमो
हृदस्यत्यादिवचनेषु तेषामाशौचाभावस्यैवोक्तत्वादेतत्प्रकरणगतस्य सद्यःशौचप
दस्याशौचाभावपरत्वमेव हारलताहृद्धरादयुक्तं युक्तमुत्पश्यामः। अत एव यतीनां स
पिंडमरणादौ स्नानानुष्ठानं न दृश्यते। ब्रह्मचारिणां तु न तदनुष्ठानं शवस्पर्शानुगमनादि

Indira Gandhi National Centre for the Arts

त्रि·टी· निमित्तकत्वेनाप्यथासिद्धं। ऋत्विग्दीक्षितानां तु श्रौते कर्मणि तत्कालं स्नानं शुद्धिमवा
प्नुयादिति वचनाद्व्रतस्थवस्नानं। गौतमसूत्रे च ब्रह्मचारिग्रहणं गृहस्थादित्राश्रम्युपल
६८ क्षणमिति व्याख्यातं हरदत्तेन। ब्रह्मचारिणश्च ब्रह्मचर्यकालमृतानामाशौचाभावः
समावर्त्तनपर्यंतमेव तदनंतरं तु तेषामुदकदानं त्रिरात्राशौचं च कुर्यात्। तदाह मनुः
आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्। समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवे
दिति। आदिष्टं व्रतादेशः। सोस्यास्तीत्यादिष्टी ब्रह्मचारी १६ १७ तत्र दृष्टं। सत्रश ६८
ब्देनात्र सततानुष्ठानसाम्यादन्नसत्रमुच्यते मुख्यसत्रे त्वाशौचाभावस्य दीक्षित

ग्रहणेनैव सिद्धत्वात्। तत्कारिणः सत्रिणः। व्रतशब्देन द्वादशाब्दवनवासादिप्रायश्चि
क्षु२ त्ततपांस्यथावानुष्ठीयमानं कृच्छ्रचांद्रायणादि स्नातकव्रतानि भोजनव्यतिरेकेण जला
पानादिविषयाः सम्यक्संकल्पाश्चाश्रंते। तत्र प्रवृत्ता व्रतिनः। नृपः प्रजापालनाधि
कृतो यः कश्चित्। नृपवानमात्यादिः। दीक्षिताः क्रतुदीक्षिताः। ऋत्विजश्च आश्रवभृथस्नानात्। य
ज्ञियं कर्म कुर्वतामित्युक्तत्वात्। एकापि समसीर्विषयपेक्षा द्विघते। तेन सत्रआदिषु वि
गंते ग्रुतत्तत्तद्व्रतव्यवहारदर्शनादिमंत्रादियत्तत्तत्कार्यविषये सवशौचं नैभव
तितेन कर्मानधिकाररूपाशौचाधिकारणं न भवतीत्यर्थः। स्वदेशस्य विस्फोटादिपि

त्रि·टी· ह्युपसर्गे राजभयाद्यभ्युदये उपस्थिते विद्यमाने वा सति तदभावार्थं शांतिकर्मणि आपदि
६९ च स्वत्वाभावेन कुटुंबपोषणासमर्थे तदुपशमार्थं वृत्तिग्रहादौ आशौचं न भवति। अपि
श्राद्धे। अनेकाः श्रुतीः शाखा वेदान्वा पठतीत्यनेकश्रुतिपठनः नैघादित्वाद्युः
।३ इंचोपलक्षणमंगाध्ययनमधीतार्थज्ञानं तदर्थानुष्ठानं च इह रूपं। तस्य प्रसङ्गेन
ध्ययने विस्मरणसंभावनायामध्ययने भिषजो वैद्यस्य नाडीस्पर्शादौ कारुणां स्व
शरीरेण कर्मकराणां सूपकारनिर्णेजकादीनां शिल्पिनां चर्मसौवर्णिकादिसुवधा ६९
नेन कर्मकराणां तक्षचित्रकारादीनां तत्तत्कर्मणि आतुराणां च माद्याघभिभवेन

मुमूर्षूणां [redacted] तदुपशमार्थं दानादौ ना
शौचं। दाने च संचार श्चेतदर्थं नाशौचं। युद्धे च संचार श्चेदुपस्थिते तदुपयोगिनि संग्रा
मे सद्यःपोतो राजानं सेवा इत्येतदित्याश्वलायनोक्त विधया। क्रियमाणे संनहनादौ
प्रास्थानिके शांतिहोमादौ च नाशौचं। प्रतिष्ठा देवप्रतिष्ठा। चूडाचौलकर्म। तीर्थया
त्राश्चर्थयात्रा च। जपः पुरश्चरणादिः। परिणयनं विवाहः तदादयउत्सवा श्च अनेको
संस्कारास्तडागोत्सर्गादयश्च। एतेषु च प्रारब्धेष्वेतदर्थे नाशौचं। तथा च याज्ञवल्क्यः।
ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां। सत्रिव्रति ब्रह्मचारिदातृब्रह्मविदां तथा।

Indira Gandhi National Centre for the Arts

त्रि·टी
७०

दाने विवाहे यज्ञे च संग्रामे देशविप्लवे। आपद्यपि च कष्टायां सद्यः शौचं विधीयत इति। विष्णु
ः। आशौचं न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां कारुकर्मणि न रा
जाज्ञाकारिणां तदिच्छया न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोरिति। दक्षः। ग्रंथार्थतो
विज्ञाना निवेदमंगैः समन्वितः। सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकमिति। प्रचेताः।
कारवः शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिता
इति। लघुविष्णुः। व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूत ७०
कमिति। आरंभश्चात्र नैवोक्तः। आरंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः। नांदीश्राद्धं विवाहा

दौ श्राद्धे पाकपरिक्रियेति। अत्र सत्रपदेन पुण्यमेव सत्रं तत्र वरणाभावात्। आदिपदेन नां
दीश्राद्धवत्कर्ममात्र ग्रहणं। तदभिप्रायेणोद्योपनयनादिग्रहणं मूले। गृहीतमधुपर्कस्य
यजमानस्य ऋत्विजः। पश्चादशौचे पतिते न भवेदिति निश्चयः। तद्वद्दीनदीक्षस्य चैवविद्यस्य म
हामखे। स्नानं त्ववभृथे यावत्तावत्तस्य न विद्यते। नित्यमन्नप्रदस्यापि कृच्छ्रचांद्रायणादिषु।
निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने। गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित्। निम
न्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि। निमंत्रितस्य विप्रस्य स्वाध्यायादिरतस्य च। देहे पितृषु ति
ष्ठत्सु नाशौचं विद्यते क्वचित्। प्रायश्चित्तप्रवृत्तानां दातृब्रह्मविदां तथेति। ब्रह्मपुराणवचने

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ पित्रिमंत्रणादिकः श्राद्धकर्मारंभः पाकरूप एव विवक्षितः। इदं च श्राद्धकर्तुः। भोक्तुस्तु निमंत्र
७१ णादेवाशौचाभावः। पैठीनसिः। विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि। न तत्र सूतकं तद्वत्क
र्मयज्ञादिकारयेदिति। वैरिवेष्टितदुर्गसंरक्षणार्थो यज्ञो दुर्गयज्ञाः। शांतिकोत्सवादयः। क्र
तुः। पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यतीति। अत्र च नृपवैद्यादावाशौचसंकोचस्य तत्कार्या
वश्यकत्वात्सम्यगतिकत्वात्सम्यगतिकत्वनिबंधनत्वात् अध्यापदादौ चार्त्तिनिबंधनत्वाघद
सद्यःशौचविभागस्य भावत्रार्तिश्चनदा तद्रूपत्वं। अन्यदा तेनाद्यहादिकमपि। एवं च यस्य या ७१
वत्कालेनांतरसद्भावश्चार्तिभावश्च तस्य तावत्कालमाशौचं भवति। तथा चत्र र्वोक्तं च पनाद

स्त्र्यात्र्यहमेकाहमेव वा। एकाहाद्ब्राह्मणः शुध्येद्योग्निवेदसमन्वितः। त्र्यहात्केवलवेदस्तु द्विहीं
नो दशभिर्दिनै रित्यादिमनुदक्षादिवचनानां दशाहादित्र्यहेच्छावत्त्वाशौचकल्पप्रतिपादका
नामप्येतादृशविषयत्वमेव। सगतिकस्य राजादेः कुसूलधान्यकादेश्च पूर्णमेवेति वक्तुं संम
तः पक्षः। अत एव सामान्येनाप्यदक्षवचने स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्त्तितं। आपद्ग
तस्य सर्वस्य सूतकेपि न सूतकमिति। इदं दशद्वादशाहादिशुद्धि। आपद्गतस्य दैवसूतकं न किंतु परा आप
दुपस्थितिस्तावदेवेत्यर्थः। मम वचने वस्तुस्यहतावपंथर्मत्र्यापरित्यस्यथास्य न इति। हरद
त्तस्त्वध्ययनादिगुणनिमित्तमाशौचसंकोचो न त्वनधिकारस्यकार्यविशेषे। दशा

कोपिनसूत ३

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰
७२ ह्याद्याशौचंतु निर्गुणविषयमित्याहुस्तच्चिन्नति दीक्षितर्त्विक्कारब्धदानोत्सवादीनांतु नियत
एवतत्तत्कार्यसंघोधिकारः।तस्माल्लौकिकत्वात्स्वरूपतः आरंभतो वावश्यकत्वाच्च।अना
शौ विद्युरकर्तृत्वेच प्रमाणाभावात्।अतएववैतानोपासनाः स्मार्तैनैव दीक्षितकर्मण्यप्य
धिकारोसिद्धेपि वचनांतरबलेन तस्यस्वत्वस्यागातिरिक्तेहेतु कर्तृत्वपरत्वात्तत्रापि तथाश्रा
तेयजमानमात्रेस्वयंकर्तृकत्वसिद्धौ दीक्षितग्रहणप्रयोजनमुक्तं मिताक्षरायां।इममेव
चविशेषं द्योतयितुं दीक्षितग्रहणं कृतं मूलेनतुतदेव विवक्षितं।अग्निमन्था आस्वतत्साध्या ७२
नन्यगतिकनित्यनैमित्तिककर्मस्वधिकारस्यस्मृतिषु प्रतिपादितत्वात्।तथाच याज्ञवल्क्यः

।वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनादिति।पैठीनसिरपि नित्यानि निवर्त्तेरन् वैतानवर्ज
शालाग्नौ चैक इति।तच्चापि त्यागात्मके प्रधानएव स्वस्यकर्तृत्वं नतु होमपयेव च श्रौते कर्मणितत
त्काले स्नातः शुद्धिमवाप्नुयादिति स्नानविधानं।अत्र च श्रौतपदं गोपासनमपि गृह्यते।तस्यापि
याज्ञवल्क्येन श्रुतिचोदितत्वाभिधानात्।त्यागातिरिक्तेत्वनाशौचिप्रयुक्त्या कर्तृत्वं।अन्यएता
नि कुर्युरितिपैठीनसिवाक्यात्।अत एव वैतानान्यपि प्रकृतानीति मिताक्षरातोवगम्यते।बृहस्प
तिनापि सामान्येनैवोक्तं सूतकेनृतकेचैव अशक्तो श्राद्धभोजने प्रवासादिनिमित्तेषु हावयेन्न
तु हापयेदिति।दीक्षितस्य तु ऋत्विजां दीक्षितानां चेति दीक्षितग्रहणं बलाद्यजमानमात्रेधि

काः॥ अन्यथा तदनर्थक्यापत्तेः॥ स्नानस्य श्रौते कर्मणीत्यनेनैव सिद्धत्वात्। एवं च सततं के
नु सप्रुत्पत्ते स्मार्तकर्म कथं भवेत्। पिंडयज्ञं चरुं होमम सगोत्रेण कारयेत्। इति ज्ञातृकर्ण
वचनेपि स्मार्तग्रहणमुपलक्षणं। वैतानोपासनाः इत्यनेनैव प्राप्तत्वाधिकारवर्गत
ः स्पर्शविशेषमात्रप्रतिपादकत्वात्। तस्माद्वैतानिकोपि स्यागमात्रे स्वयं कर्तृत्वमन्यत्र
त्वन्यस्यैव स्मार्तवदिति विज्ञानेश्वरः॥ अन्ये तु सर्वकल्पसूत्रभाष्यकारादयो निबंधा
ः सर्वजनीनश्रौतस्मार्तविभागवशाद्यथाश्रुतसमस्तवचनानुसारेण वैतानिके स
र्वत्रापि स्वयं कर्तृत्वं वदंति। कर्म वैतानिकं कार्यं स्नानोपस्पर्शनात्स्वयं। जन्महानौ वि 

तानस्य कर्मत्यागो न विद्यते। शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः इत्यादीनि च हारी
तजाबालादिवचनानि विस्पष्टार्थानि लिखंति। छंदोगपरिशिष्टेप्योपि विशेषः॥ होमः श्रौ
ते तु कर्तव्यः शुष्कान्नेन फलेन वा। अकृतं हावयेत्स्मार्ते तदभावे कृताकृतं। कृतमोदनस
क्त्वादि तंडुलादि कृताकृतं। व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैरिति। एवं चाग्निसा
ध्यनित्यनैमित्तिककर्मव्यतिरिक्तकर्मस्वनधिकारस्पर्शो चाभावादेव सिद्धत्वात्प्रतिप्रसवा
भावाच्च पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोः इत्यादिवचनकदंबकमनुवाद एव॥ संध्या
वंदनं त्वनग्निसाध्यत्वेपि सध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत्सूतके वापि त्य

Indira Gandhi National
Centre for the Arts

त्रि·टी जन्माद्वे द्विधो द्विज इति पुलस्त्यवचनात्कार्यमेव। तत्र सूतके मृतके चैव संध्याकर्म समाचरेत्।
७४ मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विज इति तदुक्तप्रकारेणैव कार्यं। प्राणायाममृत इति
न मानसत्वे पर्युदासः मुखनासिकासंचारिवायुनिरोधेन तन्मंत्रे तस्य सिद्धत्वात्। किंतु मंत्रे
ष्वेव तथा वा मंत्रकः प्राणायामः कार्य इत्युक्तं भवति। अत्र च यद्यपि प्राणायामपर्यंतनिरि
क्तसर्वं मानसमंत्रैः कर्तव्यमित्युक्तं तथापि अर्घ्यदाने मंत्रोच्चारस्तदुं कर्मलोपश्चेद् त३
दृष्टत्वः॥ सूतके सावित्र्याचांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति ७४
गीतासिस्मरणात्। सावित्र्याः जपतत्वात्पुलस्त्योक्तमानसत्वनिवृत्त्यर्थमेवात्र सावि

त्रीग्रहणं। भरद्वाजेनाप्ययमेवार्थः स्पष्टीकृतः। सूतके मृतके कुर्यात्प्राणायाममंत्रकं। तथा
मार्जनमंत्रांस्तु मनसोच्चार्य मार्जयेत्। गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत्। मार्जनं तु
नवा कार्यमुपस्थानं नचैव हि॥ इति। सूतके कर्मणां त्यागः संध्यादीनां विधीयते इति तु समंत्रो
च्चारसंपूर्णसंध्याभिप्रायं। वैश्वदेवस्य त्वग्निसाध्यत्वेन अत्र तु हेत्वाग्निशुद्धिक्रिया इति मनु
वचनात्कर्तव्यत्वप्राप्तावपि विप्रो दशाहमासीत वैश्वदेवविवर्जित इति संवर्तवचनान्निवृ
त्तिः। यद्यपि च पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरिति संवर्तवचनेनैव वैश्वदेवस्या
पि निषेधः सिद्धस्तथापि येषां तैत्तिरीयादीनां पंचयज्ञाभिन्नो वैश्वदेवस्तदर्थः पृथङ्निषे

Indira Gandhi National
Centre for the Arts

त्रि टी धः। कन्यापाञ्चधार्यत्वेपुद्भूर्त्तौतयभावेचकूष्माण्डहोमादिः सर्वेकविवाहद्वारंभोयुक्तो
७५ विरमृतं। अनारब्धविशुद्ध्यर्थकूश्मांडैर्जुहुयाद्घृतं। गांरघात्संचगव्याशीततः शुद्ध्यति हरः
स्तलकीति। इदंवचनमेतद्दशाविषयएवसार्थकमितिनसर्वविषयं। अत्रचसर्वत्रके
वलस्ततकृयहुणामारोचमात्रपरं १८ नाशौ। तेषुपतिताः महापातकातिपातकानुपा
तकिनः। तद्वन्तोअपिब्रह्महत्यागुरुतल्पगमात्पितृपो निसंयद्धागस्तेननास्तिक
निंदितकर्माभ्यासिपतितात्यागपतितत्यागिनःपतिताःपातकसंयोजकाश्चेतिगोतम ७५
स्त्रोक्ताश्चकोथिताः। पतितस्तुतब्रह्मविद्घातिभ्यः पतिः परिलोताश्च ब्राह्मणोपि। सुतःपुत्र

उत्पन्नोगर्भश्छिन्नश्चाब्राह्मणोपि। ब्रह्मा ब्राह्मणः। विदुद्दिहिता। दोहित्रंविद्धतिमितिमत्
वचनेनतद्वचनस्यविटशाहूस्यदर्शनात्तत्तुवेश्यः। तत्रमूलाभावात्तसाबोलत्रागर्भश्छि
ताबाएतेषांहंत्रः। पाषंडोनरशिरःकपालादिश्रुतिस्मृतिबाह्यलिंगधारिणः। चौराः
सुवर्णेतरस्तेयहारिणः। आश्रमरहिताः। अधिकारसत्वेप्याश्रमविशेषपरिग्रहाः
। त्वस्यनिषिद्धासुरापेयायेषांतेसुरापेयाः। स्वापेक्षयाहीनजात्याउपगच्छंतितनाहीनो
पगाः प्रतिलोमाश्रिताः। इदंचशिष्यगुरुणामुपलक्षणं। सर्पः विप्रः क्षितिपः पशवो
गवादयः। दिवाकीर्त्यएवदिवाकीर्तिकाश्चांत्यजाः। आघयहणाद्धाघनेकादयः सर्वे

Indira Gandhi National
Centre for the Arts

त्रि·टी·
७६

तिर्यंचश्चोरवैद्युतवृक्षाघातो हस्त्यादयश्च सर्पोपतनविपत्तिहेतवो गृह्यंते। एतैः
संदर्पात् एतद्ग्रहणं स्वनाशसामर्थ्यगर्वेण। अयमाशय इति तितिक्षाभावे पिपासितकस्यापि
स्नानादरणात् नक्रग्रहणादौ प्रवृत्ता हताः। शस्त्रं खड्गासिपुत्र्यादि। त्वक्नोभौमाग्निः जलं
विषं। अनाशकमभोजनं। आद्यग्रहणाद्गुद्बंधनप्रपातादयो गृह्यंते। प्राणविपत्तिहेतवो
नेनाहमात्मानं व्यापादयामीति बुद्धिपूर्वं प्रवृत्त एतैः कृत्वा स्वस्यैव नतु विधिप्रयोज्यापा
इच्छा जलतरंगाभीर्यादिज्ञानानंतरं स्वव्यापादनेऽप्यसाधनताभ्रमवतस्तत्प्रवृत्तिकारण ७६
मनेनाहमात्मानं व्यापादयामीत्याभिलाषस्तात्त्विकोऽभीषणमात्रार्थं तद्विपरीतो वा

तत्सर्वं मृताः आत्मानं व्यापादितवंतः एतेषु सर्वेषु पतितादिषूक्तेषु सपिंडादिष्वपि सत्सु
ज्ञातयः सपिंडसमानोदकाः इदं चोपलक्षणं शिष्यदौहित्राद्यनाथसंबंधिनोऽपि तद्विघ्ने
शौचं कर्माधिकारो येषां ते तथा तत्त्वनिबंधकातिशयविशेषवंत इति यावत्। नाहृशा
नस्फः। पतितादिमरणे तत्सपिंडादीनामाशौचं न भवतीत्यर्थः। उदकदानादिनिषेधम
पितेभ्यो वक्ष्यति कस्मात् दोषात्पतितादीनामनशनादिमृतानां दोषवत्त्वात्। एवं
द्वैकानां तत्तन्निषेधातिक्रमाद्दोषवत्त्वं प्रसिद्धमेव। उत्तरार्धं ज्ञानामपि तत्संशयमप्या
मघे तत्स्मादुद्गतपुरायुषः स्वः कोऽपीच्छयादि स्मार्तनिषेधशास्त्रातिक्रमाद्दोषवत्त्वं। अव

Indira Gandhi National
Centre for the Arts.

त्रि·टी· हिंस्रमरणाननुकूलव्यापारमात्रं निषिध्यते । भवति च सर्पादीनां ग्रहणादिप्रयत्नः राज्ञादी
७१ नां शक्यार्थानतिक्रमादिकं तत्संकीर्णनौकाधिष्ठानादि च तथा । तथा च राजभिर्निह
तानां च शृंगिदंष्ट्रिसरीसृपैः । आत्मनस्त्यागिनां चैव आशौचं न कल्पयेदिति वचने आ
त्मत्यागिनां पृथगुपादानाच्चंडालादित्यागविशेषस्मरणाच्च पशुजलवैद्युताग्निभिः प्र
मादहतानामप्याशौचाद्यभावोऽप्यपि प्रतीयते तथापि ब्राह्मणात् शक शस्त्राग्निविषो
दकोद्बंधनप्रपतनैश्चेच्छयापि निगोतमस्त्वेतावदिच्छतामिति विशेषणाद्बुद्धिपूर्वशस्त्रादि ७७
मृतविषयत्वमेव तस्य प्रतीयते । तदेकवाक्यतया च चंडालादुदकादिमत्राणुदकेच्छासं

वं धावश्यकत्वे न तत्साहचर्यात् चंडालादिष्वपि तत्प्रतीतेः । चंडालादिभिर्येषां मरणं तेषां पा
पकर्मणामिति वचनस्य तत्राचंडालादिहेतुकमरणस्य पापहेतुत्वप्रतीतेः । पापस्य च निषे
धातिक्रमहेतुकत्वान्निषेधस्य च पुरुषव्यापारगोचरत्वात्स्वमारमृते च मरणानुकूलतद
भावात्तत्पापकर्मणामिति विशेषणाद्रपि तथा । अन्यथा पूर्वजन्मनि पापकर्मणां येषां चंडा
लादिभिर्मरणमिति व्याख्याने तस्यानर्थक्यात् । भ्रादिदंशवज्जन्मांतरीयपापानुमानेपि
निषेधे विशेषानाधायकत्वात् । उद्देश्यविशेषणविवक्षाप्रयुक्तवाक्यभेदस्तु अभ्युदितेष्टि
वाक्यभावनापात्र्यभेदपक्षेम्नतक्षोदिष्ठाघ्नहेश्यदुपप्रयुक्तवाक्यभेदवदानर्थक्यभि

त्रि·ती थागोणत्वा क्ष। तिरस्कृतापि वाक्यभेदेन वास्तवं विरोधमाश्रयत्यर्थको ऽनुतं प्रतिकूलयेदि
७८ तिस्थापेनानोक्षिप्त एव। गोतमस्त्वेवावश्यकः। पौरुषेयत्वात्प्राधिकत्वाच्च नातीव दोषः।
सुराप्यादिपुंस्त्रीलिंगस्य तु भर्तृघ्रीकामगासमभिव्याहारेण प्रयोगोपपत्तेर्ब्राह्मणः सुरां
न पिबेदित्यादिनिषेधेषु वनजी। कोक्तलिंगाविवक्षाद्योतनेन तारतम्याद्धि जातिभार्यायाश्च द्रो
पसंग्रहद्योतनेन च सार्थक्यान्न द्वैकत्ववदविवक्षा युक्ता। तस्मान्मरणोभिसंधिना दर्पेणाति
दृष्टा रोगेणाथवा स्वाभ्यनुज्ञां विना चंडालजलादिभिर्ये मृतास्ते पापमेवापुः सर्वत एवात्मा ७८
नेगोपायदित्तिविधेः पूर्वोक्तनिषेधस्य चातिक्रमजनितदोषनिमित्तश्चाशौचोर्ध्वदैहिक

प्रतिषेधः। सकलविधिनिषेधातिक्रमजदोषस्य न तन्निमित्तत्वं किंतु कस्यचिदेवेति तु
शास्त्रैकसमधिगम्यत्वाद्यथाशास्त्रमित्येतत्सर्वमभिसंधायोक्तं दोषादिति। तथा च ब्रह्म
पुराणे। शृंगिदंष्ट्रिनखिव्यालविषवह्निस्त्रियाजलैः। सुदूरात्परिहर्तव्यः कुर्वन्क्रीडां मृत
स्तु यः। नागानां विप्रियं कुर्वन्दग्धश्चाप्यथ विद्युता। निगृहीताः स्वयं राज्ञा चौर्यदोषेण कुत्रचि
त्। परदाररताश्चैव द्वेषात्तत्पतिभिर्हताः। असमानैश्च संकीर्णैश्चंडालाद्यैश्च विग्रहं। कृत्वा तै
र्निहतास्तांश्च चंडालादीन्समाश्रिताः। शस्त्राग्निगरदाश्चैव पाषंडाः क्रूरबुद्धयः। क्रोधात्प्राय
विषं वह्निं शस्त्रमुद्बंधनं जलं। गिरिवृक्षप्रपातं च ये कुर्वंति नराधमाः। कुशिल्पजीविनो ये तु

Indira Gandhi National Centre for the Arts

त्रि॰टी

७९ नालंकारधारिणः।मुखेभगास्तुयेकेचित्क्लीबप्रायानपुंसकाः।ब्रह्मदंडहतायेचयेचापिब्रा
ह्मणैर्हताः।महापातकिनोयेचपतितास्तेप्रकीर्त्तिताः।पतितानांनदाहःस्यान्नांत्येष्टिर्नास्थि
संचयः।नाश्रुपातश्चपिंडोवाकार्यंश्राद्धादिकंक्वचित्।एतानिपतितानांतुयःकरोतिविमो
हितः।तप्तकृच्छ्रद्वयेनैवतस्यशुद्धिर्नचान्यथेति।व्यालोदुष्टगजः।नागाःसर्पाः।चौर्येतिसा
हसादेरुपलक्षणं।रमेनोरमयंतः।क्रोधादितिशोकादेरुपलक्षणं।मरणाभिसंध्यभावेविषा
दिभिर्मरणंसर्वमुक्तंअधुनातत्सद्भावेउच्यते।जिनपोनरुक्तं।कुशिल्पजीविनः।आपद्यपिनि ७९
षिद्धचर्मकारादिशिल्पोपजीविनः।सूनाप्राणिवधस्थानं।तदलंकारांस्तदुपकरणानिशस्त्रा

दीनिधारयंतितदर्हास्तेवाधिक्षिताइतियावत्।मुखेभगास्त्वयोनौरेतःसेकनिषेधात्।क्ली
बःपतितत्वोक्तिर्भूम्ना।षष्ठोर्ध्वदैहिकदेवतात्वायोग्यत्वरूपंपातित्यंवक्ष्यतेमरणोत्तरकाली
नंविवक्षितं।नतुद्विजातिकर्महान्यापादकपापवत्वरूपंसर्वकालीनं।ब्रह्मदंडःशापहत्या
दिः।उत्पादितहतक्रोधास्तेनहताः।येचब्राह्मणैःसाक्षाद्धताः।महापातकिग्रहणंगोत
मोक्तानामतिपातक्यादीनांचतत्स्वस्तुपीत्याज्याः।शिष्टगणग्रहणाचेषा।यतिघ्नीचविशेष
णाद्युगितोपगताचयेस्कन्नानांचपतितानांनथाक्रियेति।मनुरपि।वृथासंकरजातानांप्र
व्रज्यासुचतिष्ठतां।आत्मनस्त्यागिनांचैवनिवर्त्ततोदकक्रिया।पाषंडमाश्रितानांचचरंती

Indira Gandhi National
Centre for the Arts

त्रि-टी नां च कामतः। गर्भभर्तृद्रुहां चैव सुरापीनां च योषितां। इति। वृथाजाता अनाश्रमिणः। दं
८० पतिसाधकर्मानधिकारात्। संकरजाता भिन्नवर्णस्त्रीपुरुषजाताः। ते च प्रतिलोमजा
एव निंदितवृथाजातेः सहृदंहात्। प्रव्रज्यासु तिष्ठतां सन्यासिनां। यत्तु बाह्यप्रव्रज्यानां का
पालिकदिगंबरादिदर्शनभेदेन वक्तृत्वाद्युक्तवचनोपपत्तेरत्र ग्रहणमित्युक्तं मेधातिथिनात
त्यने३ मास्तु एवं माश्रितानां चैव नैषेन तत्प्राप्तेरूपेष्यं। वक्तृवचनेन तु दर्शनभेदाभावे पि हंसपरमहंसे ८०
कदंडत्रिदंडादिभेदाद्वैदिकी ध पक्षपपन्नं। अत एव त्रिदंडग्रहणाद्वैषतत्वेनैव जापत इति
त्रिदंडग्रहणमुपलक्षणं। वेदिनसाहचर्यमात्रं तु क्वचिद्विरोधेः किंचित्करं। अत एव दध्या

शब्दान्वयेन तस्मात्त्वं वा च स्त्याघात्कमथ पुत्रां। आत्मत्यागस्य तु वाक्यांतरबलाद्शास्त्री
यस्य ग्रहणं न तु दृथा शब्दान्वयात्। अपापान्तानु बन्धेते तिन्यायात्। अत्र च सर्वत्र दाहा
दिनिषेधेनाशौचनिषेधोप्युपलक्षितो द्रष्टव्यः। नाशौचं नोदकं नाश्रु न दाहाद्यंतकर्म च।
ब्रह्मदंडहतानां च न कुर्यात्कटधारणमिति यम स्मरणात्। लोहादिना एषां दाहादिकर
णे। एतानीतिस्मरणात्। विमोहितः इति तु स्नेहाद्यभिप्रायं न तु विषपाद्यन्तानाभिप्रायं स्व
त एव विमोहित इति णिच्प्रयोगः। अबुद्धिपूर्वं तु तस्मिन्कृत्वा पि मुदकं स्नानं स्पर्शनं
व हनं कर्याऽरज्जुच्छेदाश्रुपातं च न मक्तच्छेण शुध्यतीति द्रष्टव्यं। च शब्दाद्दस्यापि समुदित
तु बन्धान्निमित्तं पूर्वोक्तमाशौचं प्रायश्चित्तं च कर्तव्यं। तत्र ब्रह्मपुराणोक्तं तप्तकृच्छ्रद्वयं बुद्धिपूर्वे तु
मुदितकरणे। ३

Indira Gandhi National Centre for the Arts

त्रि.टी. विषयत्वं तत्स्नानं शावस्नापनं । उक्तहेत्वन्तराभ्युपगमाद्विल्लकः । तत्र कृच्छ्रं प्राजापत्यं द्वादशाद्
८२ साध्यः । स्पर्शाभ्युपातव्यतिरिक्तदोषेष्वप्येकैककरणे तु वृद्धिः पूर्ववदेवामन्त्रितमंत्रे तयोर्देहतद्
हेतवा । कठोरकक्रियां कृत्वा कृच्छ्रं सांतपनं चोदितं संवर्तोक्तं द्रष्टव्यं । सांतपनं चा
त्र जाबालोक्तं समाहसाध्यं । अत्र वृद्धिः पूर्ववत् उवंधने केचिदेतेनेवाप्रासमेष्याहाशस्त्रि
षवर्णं चेति स्मृतं तत्क्तं । स्पर्शाभ्युपातयोस्तु प्रत्येककरणे तेष्वेकैकवदेव स्पर्शमभ्युपा
पातितं यदि । पूर्वोक्ता नामकारी चेदेकरात्रमभोजनमिति द्रष्टव्यं । वचनत्रयस्यापि वा ८२
शाहश्चरणास्त्रेकविषयत्वं मिताक्षरोक्ताव्यवस्था वचनानानुगुणा पानुपेक्षिता

च१ । यद्यपि चैवं शाहृबाशाद्यघ्नकसापेक्षत्वं निरपेक्षत्वमुद्देश्यविशेषणत्वादविवक्षि
तं तथापि स्वावस्थापेक्षायां घोतकं भवत्येव । प्रमादमृतानां त्वाशौचादिकं भवत्येव त
था चांगिराः । अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः । तस्याशौचं विधातव्यं क
र्तव्या चोदकक्रियेति तच्छ्राशौचं प्रत्यक्षशवदाहेष्वेव विशेषानुक्तेः । प्रतिस्मृति
दाहे तु पूर्वोक्तं उदकग्रहणं चोपलक्षणं । तेषां च दाहादि प्रमादमरणास्य दुर्मरणत्वा
त्त्रिमितप्रायश्चित्तपूर्वकं कर्तव्यं । तानि च प्रायश्चित्तानि व्याघ्रेण निहते प्रेते परक
र्मा विवाह्येरिमादिना एवं कृते विधाने च विदध्यादौर्ध्वदैहिकमित्यन्तेन शातातपीये

Indira Gandhi National
Centre for the Arts

त्रि॰टी
८२

गृह्यकारिकायांचोक्तानिदेवयाज्ञिकादिनिबंधेषुद्रष्टव्या[...]नि।वृद्धत्वान्नोअंते।तथाये
वातजरावेशादिनाशौचाद्यमनाद्यावश्यकर्मानुष्ठानासमर्थाः अचिकित्स्यकुष्ठक्षयादिम
हाव्याधिगृहीताश्चभृग्वग्न्यादिभिर्बुद्धिपूर्वंम्रियंतेतेषामपिविहितमरणत्वेनदोषाभावा
न्नाशौचादिनिषेधःकिंतुतेषांत्रिरात्राशौचमौर्ध्वदैहिकंचभवत्येव।तथाचवृद्धगार्ग्यः
।वृद्धःशौचस्मृतेर्लुप्तःप्रत्याख्यातभिषक्क्रियः।आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनां
बुभिः।तस्यत्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः।तृतीयेतूदकंकृत्वाचतुर्थेश्राद्धमाचरे ८२
दिति।ब्रह्मपुराणेपि।दुश्चिकित्स्यैर्महारोगैःपीडितस्तुपुमानपि।प्रविशेज्ज्वलनंदीप्तंकरो

त्यनशनंतथा।अगाधतोयराशिंवाभृगोःपतनमेववा।गच्छेन्महापथंवापितुषारगिरिमा
दरात्।प्रयागवटशाखाग्राद्देहत्यागंकरोतिवा।स्वयंदेहविनाशस्यकालेप्राप्तेमहामतिः
।उत्तमान्प्राप्नुयाल्लोकान्नात्मघातीभवेत्क्वचित्।महापापक्षयात्स्वर्गेदिव्यान्भोगान्सम
श्नुते।एतेषामधिकारस्तुनपसांसर्वजंतुषु।नराणामथनारीणांसर्ववर्णेषुसर्वदा।इह
शंमृतकंयेषांजीवतांकुत्रकिंद्रवेत्।आशौचंस्यात्।अहर्नेषांवज्रानलहतेतथेति।वज्रा
नलहतेतद्येत्यतरपिहद्वारीनामेवनाहंशामरणांचका।विधानपूर्वकंमहाशौचविधायकं
।दर्पादिनाप्रमादेनवातथामृतानामाशौचाभावसंस्मरणंशौचयोरुक्तत्वात्।अग्निजलत्र

Indira Gandhi National
Centre for the Arts

विष्टानांभग्नसंग्रामदेशांतरमृतानांचत्रिरात्रेणशुद्धिरित्यादिकाश्यपादिवचनान्यपिद्रष्टव्यानि
विषयाण्येवदृष्टगार्ग्यआह्याद्येकवाक्यत्वात्तथैवत्वप्रमप्रयागकालान्तरेऽपिफलकामनयाप्र
यागसर्वस्वारादौविहितोपायेनम्रियंतेक्रियप्रश्वभर्तुमरणेनेषांसंस्पर्शोमेवाशौचमौर्ध्व
देहिकंच।विहितमरणत्वेननिषेधाप्रवृत्तेस्त्रिरात्रस्यचप्रमममृत्युकालविषयत्वात्।अतएव
मरणांतिकप्रायश्चित्तमृतानामप्येवं।प्रमत्तुमरणांतिकंप्रायश्चित्तंसममृतःशुध्यतिसर्वाण्ये
वतस्मिन्नुदकादीनिप्रेतकार्याणिकुर्युरितिगौतमवचनात्।यश्चप्रक्रांतप्रायश्चित्तोंतरापि
यतेतस्याप्येवं।प्रायश्चित्तेव्यवसितेकर्त्तायदिविपद्यते।पूतस्तदहरेवासाविहलोकेपरत्रचे 

तिहारीतवचनाद्दोषाभावात्।प्रवृद्धमृतानांतुवचनात्सद्यःशौचंतदहरेवचसर्वमौर्ध्वदेहिकं।ए
काचंतुप्रवृद्धस्यतेनकालांतरमृतविषयमित्युक्तं।अतएवराजक्रोधाद्वाप्रवृद्धइतिगौतमसूत्रेस
द्यःशौचविधौप्रवृद्धपर्युदासःकालांतरमृतविषयइतिउक्तंमिताक्षरायां।हारदत्तेनतुद्रवपाठस्ये
वसम्यक्त्वांगीकारेणदीर्घपाठेप्याप्रवृद्धमायोधनमित्याद्युप्रश्नेषांगीकारेणचकारमनुष्यप्रयो
गविभागेनसाख्यातोऽविवाहवृत्तानांचविघ्नतापार्थिवेनचेतिमनुस्मृत्यनुरोधात्।कारणएवच
नेसंग्राममृतस्यत्रिरात्राभिधानंतुछलकातरत्वादिरहितविषयंक्षत्रधर्मेहतस्येतिसद्यःशौचेवि
शेषणात्।प्रामृत्युकालविषयंवाभग्वादिसाहचर्यात्।सर्वंचैतद्दोषादित्यनेनसूचितं।प्रवृद्धे

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ गादिमस्य पापविशेषमात्रान्वयेन कस्यचिद्धेतुस्य व्याख्यानं। तदसमर्थसमासापत्तेर्दीवाहेतुक
८४ पापविनाशेऽशौचनिषेधानापत्तेर्मूलाभावाच्चोपेक्ष्यं। अत एवमतिवनस्थयोः सम्पाशौचनि
निषेधः चापाठः। दीवाहेतुकतदभावात्। पतितग्रहणं च गोवलीवर्दन्यायेन ब्रह्महादिव्यति
रिक्तपरं। यद्वा पतिते ब्रह्महत्त्वगुणा दोषो वर्धते इति कारं व्रतात्यानर्हत्वेन प्रतिपादितेषु हतत
योनाशौचाः स्युरित्युक्ते तत्र पंचः पतिसुतेत्यादि। ब्रह्महादिग्रहणं च गुरुतल्पगाद्युपलक्ष
णमिति आलेपः। अपंचाशौचस्य निषेधः दशाहब्रह्महादिकालावच्छिन्नस्य। उद्वाहवहता ८४
नां च विघ्नता पार्थिवेन च। हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां। गोब्राह्मणाहतानामन्व

क्षं राजक्रोधाच्च युद्धे प्रायो[redacted]नाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामित्यादि
मनुयाज्ञवल्क्यगौतमादिवचनैः स्नानमात्रापनोद्यस्य तस्य प्रतिपादितत्वात्। पतितादीनां
चात्मघातिभिः सह पाठेद्युनाश्रितादीत्याद्येकयोगनिर्देशात्। एवं चाग्निजलगोब्राह्मणा
दिभिरात्मघाते स्मृतिद्वयोक्तो वाभावस्तद्धः शौचविधिर्वैकरात्ररूपा ये पक्षाः प्रतिपादिता
स्तेषामेव व्यवस्थासंपत्त्या सद्यःशौचाशौचाभावयोरवैधात्मघातविषयत्वं त्रिरात्रस्य वैध
बुद्ध्या घात्मघातविषयत्वं। एकरात्रस्य गवादिजनितक्षते न कालांतरमृतविषयत्वमिति।
यातु वा वसत्यादिभिर्मवस्थोक्ता अप्रायश्चित्त कालानां मरणांतिके काप्यकर्पेणापरेण

Indira Gandhi National
Centre for the Arts

त्रि.टी. सघः शौचं तादृशानामेव प्रायश्चित्तरूपेण स्नानादिभिर्भवति त्रिरात्रं वस्त्रादिभिर्भवति सघः शौचं
८५ साहसेन त्वेभिर्मरणो त्राशौचाद्यभावइति। सावचनंतदनुयायदृक्सायायाभावादर्थतैवदमी
मीमांसागंधानां च तत्तत्स्य स्यात्पूर्वपक्षस्य स्यदेव। किं च नानेवानो भूह त्यार्थमेवतद्द
वलीसेतद्विषये त्वेनाप्रमाणत्वादुपेक्ष्या। तथात्र प्रपेषामाशौचादिनिषेधस्तदाल
।संवत्सरादूर्ध्वं तु सर्वेषामौर्ध्वदैहिकादिसर्वकार्यमेव। गोब्राह्मणहतानां च पतिता
नां तथैव च ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकमिति षट्त्रिंशन्मतात्। तत्र नाराय ८५
णबलिपूर्वकं कार्यं। तथा च वृद्धयाज्ञवल्क्यच्छागलेयौ। राजभिर्निहतानां च शृंगिदंष्ट्रि

सरीसृपैः। आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत्। नारायणबलिः कार्यो लोक
गर्हाभयान्नरैः। तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः। तस्मात्तेभ्योपि दातव्यमन्न
मेव सदक्षिणमिति। व्यासोपि। नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते। तस्य शुद्धिकर
कर्म तद्भवेन्नैतदन्यथेति। शिवेवेति वाशब्दश्चार्थे। द्वितीयदिने शिवोद्देशेनापि पिंडदा
नसत्वात्। तच्च सकलवैष्णवोक्तचक्रारोपलक्षणं द्रष्टव्यं। प्राच्यग्रंथेषु तु नारायणं
समुद्दिश्य पशवे घावदिति लिखितं। तदा नारायणं शिवं समुद्दिश्य विष्णुरूपं चेतं ध्यात्वे
त्यर्थः। विष्णुबुद्धौ समालंबेत्युक्तत्वात्। नारायणबलिप्रकारश्च वैष्णवे विहितः। इंद्रिये

Indira Gandhi National
Centre for the Arts

त्रि॰ही॰ रणे ऽस्मिन्कायेचमृत्वाविआदिनां घातमंतिस्वमात्मानं चांडालादिहताश्चये। तेषांपुत्राश्च
८६ पौत्राश्च स्वस्य मासमदाधिमुतः। ययाम्नाद्कुंभतन्त्वंतिविद्युनांवै प्रतिष्ठितेः। तत्सर्वं संप्रव
क्ष्यामि नमस्कृत्य स्वयंभुवे। एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिम् इत्यादिना ए
वं विस्तुमतेस्त्रि त्वाये द्याराप्तम घातिने। समुद्धरतितं क्षिप्रं नारकात्पापविचारणात्तेन।
सर्पहतेनु भाद्रपदस्य शुक्लपंचमीमारभ्य संवत्सरं मासवत्सरातिशुक्लपंचमीषु यथाक्रममनंता
दिद्वादशनामभिर्नागरूजां विधाय यथाशक्ति ब्राह्मणान्भोजयित्वा प्रतिपंचमुपवा ८६
संवत्सरमेकभक्तं श्वर्वेके पंचम्यां नक्तभोजनं वाहुल्यां नेसो वर्णनागं प्रत्यक्षांगां च

र्घादितिविशेषो भविष्यत्पुराणोक्तिः हितः। नागदष्टःऽपि तावत्स्यभ्रातावाक्षुहितापि
वा। मातापुत्रोऽथवाभ्राता पत्नी नैवं तद्वेस्वमःत्मादिनासुवर्णभारनिष्पन्नं नागं हृ
त्वा तथैव गां। आमाय दत्त्वाविधिवत्पितृणामनृणो भवतिस्तेन। अत्र च यद्यपि वैश्म
वा ४ वा दौत्म घातिनामेव नारायणवलिरुक्तस्तथापि षट्त्रिंशन्मते पतितमात्रस्य संवत्सर
द्र्ध्वमौर्ध्वदेहिकविधानान्तरं हेतासंपादनार्थं प्रायश्चित्तादीनां बल्हादीनां पिंड
दानः। तथा च बौधायनसूत्रं अथातो नारायणबलिं व्याख्यास्यामोऽपि शास्त्रपतितमुपा
त्मत्यागिनां ब्राह्मणहतानां चेत्यादि। तथा च यद्यपि पूर्वोक्तवचनपर्यालोचनयौर्ध्व

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰
८७

दैहिकयोग्यतासंपादनेनारायणबलेरेवनिरपेक्षसाधनताप्रतीयतेतथापिजलाग्न्युद्वं
धनभ्रष्टाः प्रव्रज्यानाशकस्तुताः स्मादिपमवचनेविषप्रपतनप्रायशस्त्रघातहताश्च
यइतिपाठात्तस्मादात्मघातिनांतावत्तेषुमृतेषुपितेषामात्मघातनिमित्तंतत्पुत्रादि
भिः प्रायश्चित्तमपिकर्तव्यं। नद्वपिताश्वरापपतितोऽत्रनपायमवाक्येचांद्रायणनव्रु
ध्वंतिनमकृच्छ्रद्वयेनवेतिपाठावगमात्तज्ज्ञापाघपेक्षयाचांद्रायणेनमहत्कृच्छ्रद्वयेनवात्र
नसवकृत्वाचांद्रायणांपर्वक्रियाकार्यायथाविधिनारायणबलिः कार्यालोक ८७
गर्हाभयात्त्वैः। अत्रनिषिद्धंत्रियंचैवविप्रैरघात्महसितां। पिंडोदकक्रियाः पश्चाद्वेषा

सर्गोदिकंचपत। एकोद्दिष्टानिकुर्वीनसपिंडीकरणंतथेतिहेमाद्रौदाहृतषड्त्रिंशन्मत धु १
वाक्येपिकेवलेचांद्रायणमुक्तं। स्मृतिसारादौतुद्वयेनवेतिपठित्वासमुच्चितमुक्तं। ग
घकारिकायांतुप्रमादादपिनिःशंकस्त्यकस्मादुधिवादिना। अग्न्यादिहिनविमाल
विषविद्युज्ज्वालादिभिः। चांडालेब्राह्मणोवीरे निहतोयत्रकुत्रचित। चांद्रायणंतस
कृच्छ्रद्वयंतस्यविशुद्धये। यद्वाकृच्छ्राणांचरेशकृत्वातुविधिनादहेदित्यादिपमिधायच
कृष्टेवमृतानांतुत्रिंशत्कृच्छ्रंसमाचरेदित्युक्तं। मत्स्यविशेषात्स्वप्रायश्चित्तविशेषोप्यूह्यं
। इदंचात्मघातप्रायश्चित्तंनतेत्ताविधप्रायश्चित्तसमुच्चितंकर्तव्यं। ब्रह्महादीनांचप्राय
श्चित्ताईणांतमायश्चार्थतयोग्यप्रायश्चित्तंकृत्वानारायणबलिः कार्यइतिमदनपा

Indira Gandhi National
Centre for the Arts

त्रि.टी. ८८ रिजातस्मृत्यर्थसारादावुक्तं। तत्र सर्वत्र प्रमाणं मृग्यं। पुत्रादिकर्तृक प्रायश्चित्तेन तत्पापक्षयस्य
वचनं विनाऽसंभवात्। सत्यपि च पापे नारायणबलिमाचरणं वर्नोर्ध्वदेहिकं पेए वास्तु। अत व२
त एव माधवेन जलाग्निपतने दैवप्रवृत्त्या नाशकेषु वेत्यादिपराशरवचने पर्जुमुपघम्यजीवि
तानामेवेदं प्रायश्चित्तं न तु मृतानां तत्कर्तुरेवाभावादित्युक्तं। तच्च शस्त्रघातहताश्वये इ
ति वचनबलादात्मघातप्रायश्चित्तं मन्ते ब्रुपस्तु जातिवधपापांडित्यादिनिमित्तं तु वचनं वि
ना कथं स्यादित्येवमादिकाद्दंतव प्रायश्चित्तं न पूर्वकं न दूर्ध्वकं वा नारायणबलिं कृत्वौर्ध्वदे
हिकानुष्ठानं प्रायश्चित्ताहीणां दृष्टं। तत्र ब्राह्मणं तु ब्रह्मपुराणे प्रकारांतरमुक्तं। पतितस्य ८८
तु कार्य एषा घस्तत्संकर्तुमिच्छति। सहि दासीं समाहूय सर्वगोत्रजेवेतना। अमुद्दुघटहस्ता

नां यथा प्रेतं त्रव्रीत्यपि। हे दासि गच्छ मूल्येन तिल्लानानयसत्वरं। तोयपूर्णं घटं चैवं संसतिलं द
क्षिणामुखी। उपविश्य तु वामेन चरणेन ततः क्षिपा। कीर्तयेः पातकी संज्ञां त्वं पिवेति मुहुर्वदे। न
निशाम्य तस्य वाक्यं सा लब्धमूल्याकरोति तत्। एवं कृते भवेच्छुद्धिः पतितानां न चान्यथेति। प्रेषा
मप्यौर्ध्वदेहिकं कर्तव्यं तेषामपि सपिंडीकरणं न कर्मकां। गो ब्राह्मणहतानां च पतिता
नां तथैव च। मुक्तमात्रप्रमीतानां नैव कार्या सपिंडतेति वचनात्। ब्राह्मणादिहते ताते पतिते सं
गवर्जिते। व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसाविति मिश्राद्युपकारोपदेशाच्चेति विज्ञानेश्व
रः। एवं च पतितादीनां नारायणबल्यादेर्नित्यत्वेप्याद्युपकारोपदेशवचने पतितयहणस्य प्रा

Indira Gandhi National
Centre for the Arts

त्रि·टी·

८२ यश्चित्तानर्हविषयत्वेन कथंचित्संभवेपि ब्राह्मणहनास्थिहणास्यासंभवित्वापत्तेः प्रेताभ्युदय
कामनाप्रयुक्तत्वेन पाक्षिकत्वं तस्य यत्कैश्चिदुक्तं तदयुक्तं। लोक गर्हाभयादिति च विशेषणा
न्नित्यत्वावगतेः। वीतायां फले छायां प्राप्नेवा फलेप्रारब्धसमाप्तेरावश्यकत्वं गर्हापरिहारा
र्थत्वेनैवोक्तं न्यायविद्भिः अतएव च तावत्कालं पुत्रादेर्जीवनसंदेहे हि ऋणं प्रायश्चित्तं कृत्वा
वत्सरादर्वागपि नारायणबल्यादिकरणमुक्तं स्मृतिरत्नावल्यादौ। आत्मनो घातनस्तु द्वार्थं च
रेन्नारायणाद्वयं। तमकृच्छ्रं चतुर्थं च त्रिंशत्कृच्छ्राणि वा पुनः। अर्वाक्संवत्सरात्कुर्यादिह ८२
नास्ति यथोदितं। कृत्वा नारायणबलिमनित्यत्वात्तदापुयात्मरुजीयेस्तु हेमाद्र्यादिभिः स्वलि

खितपूर्वोक्तषट्त्रिंशन्मतादिवचनबलात्मृतिनाडीनां सपिंडीकरणमपि निषेधस्य च
पित्रादिभिन्नविषयत्वमंगीक्रियते तेः श्राद्धप्रकारोपदेशकवचनबलात्तदौर्ध्वदेहिक
उष्टानस्य पाक्षिकत्वं वत्सरादर्वाक् क्रियमाणवृद्धिश्राद्धादिविषयत्वं तस्य चाश्रयेणापि
मित्यादिवचनबलात्कथंचित्सिद्धं। यत्तु हेमाद्रिणोक्तं गोब्राह्मणहतपतितानामेवसं
वत्सरादूर्ध्वं नारायणबल्यादि इतरेषां त्वर्वागपीति तदयुक्तं। षट्त्रिंशन्मतस्थपतितग्रह
५२ णस्य ब्रह्मपुराणपरिभाषितपतितपरत्वात्। गोबलीवर्दन्यायेन गोब्राह्मणहतानां पृथ
गुद्देशोपपत्तेः। तदभावेपि व्याप्यव्यापकभावनिरपेक्षप्रसिद्धधर्महेतुकाप्रसिद्धधर्म

Indira Gandhi National
Centre for the Arts

त्रि·टी· हैतुकाश्चसिद्धधर्मानुमानस्यानुमानवादेहैतुकामाधिकरणाद्दोनिषेधेपिवहूना
८० मेकधर्माणामेकस्यापिप्रयुज्यते।सर्वेषांतद्वदेत्कार्यमेकरूपाहितेस्मृताइतिव
चनाद्बाधकाभावेसर्वेषांतदेवमुक्तं।एतेषांचमरणानंतरकर्त्तव्यमुक्तंमिताक्षरोदा
हृतस्मृत्यंतरे।आत्मनस्त्यागिनांनास्तिपतितानांतथाक्रिया।तेषामपितथागंगा
तोयेसंस्थापनंहितमिति।गंगेतिसंभवाभिप्रायेण।आहिताग्नेर्विशेषस्तत्रैव।वैता
नंप्रक्षिपेदग्नावावसथ्यंचतुष्पथे।पात्राणितुदहेदग्नौयजमानेवृथामृतइति।एवं ८०
ए१ चसंवत्सरांतादीर्घशरदाहः।ग्रह्य परिशिष्टेतुप्रकारांतरमप्युक्तं।चंडालादिस्तु

घ्नस्नानसंस्कारविधिस्तेषांनैवकार्योदकक्रिया।रुदनंनैवकर्त्तव्यंसूतकंचनबंधु
भिः।दग्ध्वाशरीरंप्रेतस्यसंस्थाप्यास्थीनियत्नतः।प्रायश्चित्तंतुकर्त्तव्यंपुत्रैश्चांद्राय
णत्रयमिति १९ नाशौ।भोज्ये।मधुक्षौद्रं।आममपक्वंतंडुलादि।भोज्यंभक्ष्यंशाष्कु
लीलड्डुकादि।द्वंद्वैकवद्भावः।शेषाणिप्रसिद्धानि।क्षीरदधिभ्यांचघृतस्याप्युपल
क्षणं।तिलेष्वतैलस्य।आशौचिस्वामिकेषुप्येतेषामशौचमप्रतिग्राह्यत्वलक्षणंन
स्यात।इमेषुचाशौचमाशौचिस्वामिकत्वकृतोप्रतिग्राह्यत्वादिप्रयोजकोतिशय

Indira Gandhi National Centre for the Arts

त्रि·टी
८१

विशेषश्चेत्तन्नाशौचवत्। अन्येष्वप्यौपाधिकास्तु विशेषा एवमेवेति केचित्। तन्न तु प्रति
भाति। आशौचिस्वामिकत्वकृतं प्रतिग्रहाद्ययोग्यत्वमेव रक्ष्येष्वाशौचं कस्माज्जिना
दिवचनं त्वतिशयविशेषप्रमाणाभावात्। चेत्तेन पुत्रदानं प्रतिग्रहो होमः स्वाध्यायः
च पितृकर्म चेति पिंडक्रियावर्जमाशौचे विनिवर्त्तते इति दानाद्यनधिकारे आशौचस्य
निमित्तत्वोक्तेः कर्माधिकाररूपब्राह्मण्यादिवत्सर्वानधिकारे आशौचं किंतु। ८१
तन्निमित्तभूतो जननादिजन्योतिशयविशेषः स्वीक्रियते। ब्राह्मण्यादिजाति

नार

वत्। अन्यथा निमित्तनैमित्तिकभावानुपपत्ते रुद्रकदानाद्यधिकमस्याप्याशौचत्वा
पत्तेश्च। ननु दृष्टेषु तथा किंचिदिति प्रतिग्रहाद्ययोग्यत्वमेव तेष्वाशौचं। द्रव्यविशेष
गतमेवाशौचिस्वामिकत्वं तत्र हेतुर्न द्रव्यमात्रगतमिति शास्त्रैकसमधिगम्यत्वा
द्यथाशास्त्रं। अतिशयविशेषवादिनापि चेदृशस्यैव तत्र तस्य प्रयोजकत्वस्वीका
रात्। यत्तु वाचस्पतिना अशुचिनां विनियोजितानामनधिकारिविनियोजितत्वात्फ
लोनर्जकत्वमेव दृष्टेष्वाशौचं स्यान्नस्कन्नानिष्टुवीन्मेव। अन्यथा एकान्तेरण्या आजन

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰
८२

नारेक्षते तस्याशौचित्वात्तत्कामिकत्वेन तद्रूपाणामप्यतिशयविशेषरूपेकर्मानर्ह
त्वरूपेवाऽत्रशुद्धत्वेसतितेरेवदृष्टेरज्ञातनिमित्तत्वाशौचिवशात्तंतरेण कृतंकर्मासु
विदृष्टकृतत्वाद्व्यर्थंस्यात्। नस्याच्चनतः क्रीतद्रव्येणतेषांकर्मसिद्धिः। कथस्याशौ
चापकापकत्वेप्रमाणाभावात्। शुचीनामेवतुतेषामनधिकारिविनियोजितत्वेन फलानु
कत्वेशुचिनाभावत्तेतरेणकृताचविनियुक्तमानैः फलसिद्धिर्युक्तैवस्वकं। नरथुक्तं। तथासति त ८२
तंकथंरववप्रतिग्रहेपिनदोषःस्यात्। स्याच्च क्रीतैरिव प्रतिगृहीतैरपि कर्मसिद्धिः। अनधिकारि
त्वेनाशौचिनाविनि

युक्तानांफलाजनकत्वेपिप्रतिग्रहीतविनियुक्तानांतस्याप्रमापकत्वात्। नचानधिकारि
कृतत्वेनाशौचिकर्तृकदानस्यफलाजनकत्वान्नतःप्रतिगृहीतेस्वत्वमेवनास्तीतिवाच्यं।
शास्त्रीयफलाभावेपिस्वत्वस्यलौकिकत्वेनतदुत्पत्तौ प्रमाणाभावात्। स्वत्वस्यचलौकि
कत्वेलिप्सासूत्रेपन्नदृपेपिप्रबंधितं। यत्वेकतरोतोस्यादि। तदतिमंदं। आशौचेतरेपापरिग्र
हसंपादितासाधारणस्वत्वेद्रव्ये आशौचिधात्रुतरस्वत्वाभावेनतत्राशुचित्वाभावात्। स्वा
धारणस्वत्वाधिकरणस्यपक्षेह विनियोगानर्हत्वेनकर्मानुष्ठानार्थतस्यावश्यकत्वा
[redacted] त्। एवंवितंद्वेतस्यपंचेनमपास्तं। यच्चकथस्याशौचापनायकत्वेप्रमाणा

Indira Gandhi National
Centre for the Arts

त्रि·टी ८३ भावादिति तदपि यत्किंचित्। स्वल्पापनयद्वारेव तस्य द्रव्यशुद्ध्यपनायकत्वात्। अतस्तत्राशौ
चिवत्प्रयुक्तत्वात्। तत्रैव द्रव्ये कालस्य चेतनाशुद्ध्यपनयद्वारा तदपनायकत्ववदित्यल
मक्षतमीमांसानभिज्ञोक्तिदूषणेन अथाश्रमेण। एतेषामाशौचि हस्ताद्ग्रहणे प्राप्ते आ
ह। दद्यादिति। मेधा। इमानि शाकादीनि यानि जातानाशौचेयानेयातिः परलोकगमनं मरणमिति
यावत्। जातं जननं। तदुभयनिमित्ते आशौचे कृत्रिमे वा आपाद्यनिर्हरणादिनिमित्तके तरित
त्राणमपि स्वामिनोऽनुमनना स्वयमनाशौचादन्तरस्मै दद्यात् स्वयं वा याद्दृक्षयेत्। न त्वाशौचि हस्ता राम
दिमान्यपि गृह्णीयादित्यर्थः। शाकादिष्वेवाशौचप्रतिषेधश्चान्यापाद्यनिमित्तकाशौचविष ८३

यः। कृत्रिमे तु तद्भिन्नेष्वप्याशौचाभावः। आशौचं यस्य संसर्गादित्यादिवचनात्। अतिक्रान्ताशौ
चेप्येवमेव। अतिक्रान्ते दशाहे त्वित्यादिवाक्यात्। अत्र कृत्रिमग्रहणं तु तत्राप्याशौचि हस्ता
त्सर्वाण्यपि द्रव्याणि न ग्राह्याणीत्येतद्विधानार्थं। पणि। स्यात्। पणितमित्यादि कर्मणि क्तः
। तेन पणिते क्रयार्थं प्रसारिते अपणिते तद्विपरीते तत्सर्वं शाकादिव्यतिरिक्तमपि सुविस्रा
न्तस्वामिनो वणिजश्चाशौचेपि अप्रतिग्राह्यत्ववदक्रेयत्वं द्रव्येषु नास्ति आशौचि हस्तात्क्रक्र
येपि न दोष इत्यर्थः। तथा च मरीचिः। लवणं मधु मांसं च पुष्पमूलफलेषु च। शाककाष्ठतृ
णेष्वप्सु दधिसर्पिःपयःसुकातिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः। पण्येषु चैव सर्वेषु नाशौ

त्रिं·टी· ९४ चंमृतसूतकइति।स्वयमित्युपलक्षणं।आशौचिहस्तान्नयाद्यमित्येतावन्मात्रंविवक्षितं।पक्वं
भक्ष्यंशाकुल्मादि।अपक्वंतंडुलादि।पक्वापक्वाभ्यनुज्ञानंचात्रसत्रप्रवृत्तविषयं।अन्नसत्र
प्रवृत्तानामामयन्नमगर्हितं।भुक्त्वापक्वान्नमेतेषांत्रिरात्रंतुव्रतीभवेदित्यंगिरसैकवाक्य
त्वात्।अत्रपक्वान्नपदंभक्ष्यअतिरिक्तौदनादिविषयं।आमान्नग्रहणंचभक्ष्यस्याप्युपलक्षणं
ऐकवाक्यत्वात्।योगविभागकरणात्स्वयमपिपुनःस्वयंग्रहनियमःमृतसूतकग्रहणंचस्वयं
ग्रहविधौकृत्रिमस्याप्युपलक्षणं।आशौचंयस्यसंसर्गादित्यस्याशौचाभावमात्रप्रतिपाद राम·
कत्वेनाशौचिस्पृष्टोपादाननिषेधबाधप्रमाणाभावात्।पप्राशौचनिषेधेचकृत्रिमोपलक्ष ९४

णं।आशौचंयस्येत्यस्यपापेष्वपिग्रहणैः।शाकादिनियमार्थंतुमृतसूतकग्रहणं।ब्रह्मपुरा
णेपि।लवणंमधुमांसंचपुष्पमूलफलानिच।काष्ठं[redacted]लोष्ठंतथापर्णंदधिक्षीरंघृतंतथा
।औषधंतैलमजिनंशुष्कमन्नंचनित्यशः।आशौचिनांगृहाद्ग्राह्यंस्वयंपण्यंचमूलजमिति
।मूलजमाकरजं।एवंचान्नसत्रिणामोदनादिःतेषांतुभक्ष्यतंडुलाद्यप्यनुज्ञातमतिरिक्तं
सर्वमग्राह्यमेवानाशौचिनो।अतएवयमः।उभयत्रदशाहानिकुलस्यान्नंनभुज्यते।सूतकेतु
कुलस्यान्नमहोयंमनुरब्रवीदिति।कुलस्याशौचिकुलस्यान्नमनाशौचिभिर्नभुज्यते।तेदशा
न्तेकुलस्यसकुल्यस्यतुत्र्यहोयंभोज्यमित्यर्थः।अयंचनिषेधोदाताशौचवनिमित्तेदातेभो

Indira Gandhi National
Centre for the Arts

त्रि०टी० ८५ ज्ञात्वाज्ञातेपिदातुराशौचित्वात्तस्वामिकेन्नेप्रवर्त्तनएवात्र्यज्ञातानवृत्तत्वात्नुप्रायश्चि
त्तात्मत्वंभोक्तुः।दात्राज्ञातेपिभोक्त्राज्ञातेनतद्दूषस्याशौचिस्वामिकत्वाभावेपिवचना
त्प्रवर्त्तते।तथाचषट्त्रिंशन्मते॥ उभाभ्यामपरिज्ञातेसूतकेनैवदोषकृत्।एकेनापि
परिज्ञातेभोक्तुर्दोषमुपावहेदिति।भोक्तृग्रहणंतन्मात्रेणज्ञातेपितस्यदोषप्रतिपाद
नार्थंनपुनर्दातृमात्रेणज्ञातेतस्यदाननिषेधातिक्रमनिमित्तदोषनिवृत्त्यर्थमपि।त्र
र्थद्वयपरत्वेवाक्यभेदापत्तेः।अपिहातृग्रहीत्रोरुभयोस्सूतकेमृतकेतथा।अविज्ञातेन राम० ८५
दोषःस्याच्छ्राद्धादिषुकथंचन।विज्ञातेभोक्तुरेवस्यात्प्रायश्चित्तादिकंक्रमादितिग्रह

पुराणमपिभोक्तुःस्यादेवेतिव्याख्येयं।आदिशब्देनाशौचं।तत्रप्रायश्चित्तंचोक्तंपूर्वं।वि
वाहादौतुआशौचसंभावनयापूर्वमेववन्नाद्यणार्थंपृथक्कृतंसिद्धान्नमतउत्तानत्र्यतिरिक्त
मपिचान्यदुपादेयं।विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके॥पूर्वसंकल्पितार्थेषुनदोषः
परिकीर्तितइतिवृहस्पतिवचनात्।सिद्धान्नभोजनेविशेषःषट्त्रिंशन्मते।विवाहोत्स
वयज्ञेषुत्वंतरामृतसूतके।परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः।भुंजानेषुतुविप्रेषु
त्वंतरामृतसूतके।अन्यगेहोदकाचांताःसर्वेतेशुचयःस्मृताइति।भुंजानेषुत्विति
विवाहादिष्वप्यपृथक्कृतान्नभोजनेनेत्र्यत्रचब्राह्मणभोजनेदक्षप्रयत्नश्रवणाहर्ष्यवात्र

Indira Gandhi National Centre for the Arts

त्रि॰टी॰ ९६ त्यक्तव्यं भोजनार्हं तु संयुक्ते विषैर्दन्तुर्विपद्यते। यदि कश्चिन्नहोत्रि संयोगं तस्मात्समाहि
ताः। आचमनपरकीयेन जलेन शुद्ध्यो द्विजाः इति ब्रह्मपुराणात्। आहुतेनुक्तं २० जातानाभा
वे जाते जाते पुत्रे न तत्संबंध्यग्निसाध्यकार्यार्थं स्वशाखोक्तविधिनोपादीयमानाः गोर्जाता
रणीः। तन्मथिताग्निना पारिणायनविधिर्विवाहविधेः। इदं चोपलक्षणं गृह्याग्निस्वीकार
कालादर्वाक्तत्स्वनिखननाभावे रग्धिर्दाहः कर्त्तव्या गृह्याग्निस्वीकारादूर्ध्वं आश्रौता
धानकालात्तत्स्वगृह्येणाग्निनादग्धिः। श्रौताधानादूर्ध्वं तु विधिनाहितैः स्वताधा ताप॰
नसंस्कारैर्हुतवद्दनेरादहनीया रिपिर्दग्धिः। यद्यपि वकालोपलक्षणापायेप्यन्ततो वग ९६

तविशेषकालानपायः शंखवेलायांदोहवेलायामित्यादौ लोके [illegible] पांसुपाजमेनरा
पजनीत्यादौ वेदे चयस्तु त्वन्यस्तथाप्य आन्यभावे तत्कालमात्रे तेर्दाहासंभवात्कत्त लौकिकेनेति।
वचनेच कालानुपादानात्र कालविशेषमात्रं तिवक्षेत्यभिप्रेमाहंत्रधिकाराभावेन
तत्सत्त्वेपि गात्रालस्यादिना अग्नेरभावे स्वीकारविच्छेदे वा लौकिकेन पूर्णसंस्कृ
तेनाग्निना दग्धिः। सर्वत्र च दाहप्रकारः स्वस्वसूत्रोक्तोऽनुष्टेयः। तथा च वृद्धयाज्ञवल्क्यः
। आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः। अनाहिताग्निरे[illegible]केन लौकिके
नापरो जनः इति। लौकिकेनेति जातारणपभावे। तस्याग्निसाध्यकार्यमात्रार्थमुत्पन्ने:

Indira Gandhi National Centre for the Arts

१

त्रि॰टी
८७

।लौकिकेविशेषमाह।चंडा।नस्यात्।अमेध्यंनरास्वशहृदादि।तदिंधनोग्निरमेध्याग्निः।दो
षाःप्रसिद्धाः।एतांश्च।डालादिसंबंधिनोग्नीन्ननस्यात्।दाहार्थनोपादद्यात्।तथाचदेवलः
।चंडालाग्निरमेध्याग्निःसूतिकाग्निश्चकर्हिचित्।पतिताग्निश्चिताग्निश्चनशिष्टग्रह
णोचिताइति।शूद्रा।दाहःशूद्रेणाश्मशानंप्रत्याहृतेनइंधनदहनेनघृताधेन।आघशौ
चादस्यदपिप्रेतकर्मोपकारणंतिलकुशादिक्षादि।तेनकृतस्त्रैवर्णिकस्यदाहः।उपल
क्षणंचैतत्।प्रेतत्वनिहृत्यर्थकर्ममात्रेअदाहः।शास्त्रीयोदाहोनभवतिप्रेतत्वनिव राम॰
र्त्तकंनभवतीत्यर्थः।तेनमृतस्यप्रेतत्वनिहृत्यर्थंपुनर्यथासंभवमस्थिपर्णशरदाहः ८७

वैकंसर्वंकर्त्तव्यं।शूद्रस्यचाहर्तुःप्रत्यवायः।तथाचयमः।यस्यानयतिशूद्रोग्निंतृणं
काष्ठंहवींषिच।प्रेतत्वंहिसदातस्यसचाधर्मेणलिप्यतेइति।यस्यप्रेतस्यकृते।हवीं
षिघृतपिष्टतंडुलादीनि।शवस्यशूद्रस्पर्शंतुवक्ष्यति। २२ सर्वं।प्राक्।उपनय
नविधेःप्रागनुपनीतस्यमृतस्यदाहादिसर्वंतूष्णींमंत्रकंविदध्यात्।विशेषवि
हितमधुमस्तक्षादिजपवर्जं।एतच्चामंत्रकंऔर्ध्वदेहिकविधानंयस्यदाहःक्रियतेतस्य
।यस्यतुनिखननंतस्यौर्ध्वदेहिकमेवनास्ति।ऊनद्विवर्षंनिखनेन्नकुर्यादुदकंपित्रा
दिवचनात्।अत्रचोदकग्रहणंमाघलाम्नकलप्रेतक्रियोपलक्षणं।तथाशिष्टस

Indira Gandhi National Centre for the Arts

त्रि·टी ९८ माचारात्। अत एवोनद्विवार्षिकपित्रादिमृत्युवचने आशौचकालं समस्त्वेसमप्युक्ता
द्वा ये गृध्वं देहिकाकरणरूपो दासीनमपरत्वे नास्ति संचयनादितत्समस्य चास्थ्यादिदहि
न शुद्धस्यपिवात्तयानिरग्धुरित्यस्य च निखननार्थतया आम्नानं कृतं मेधातिथिवि
ज्ञानेश्वरादिभिः। केचित्तु सर्वस्य याभृतमेवमाम्नातं। तच्च युक्तायुक्तत्वविवेको
प्यत्र यत्कृतो द्रष्टव्यः। इदं निखननावधिं तु वक्ष्यति। अत्र च यद्यपि सर्वेषामविशे
षेणोक्तं तस्मीमेवोदकं कुर्यात्तस्मै संस्कारमेव च। सर्वेषां कृतचूडानामन्यत्रापी राम ९८
च्छया ह्यपि त्वादिलोगास्यादिवचनादुपनयनात्पूर्वं तस्मीमप्युदकदानं तदूर्ध्वं स

र्वेषोर्ध्वदेहिकं कार्यमिति संकलनपिनाक्षरात्तथाम्युदकदानमात्रं गम्यते। तथापि
असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्राचेतसगुणविधेः पिंडदानम
पि द्रष्टव्यं। अहाशौचाशौचं तत्प्रकारे वक्ष्यते। तथा द्वादशाब्दत्सरादर्वाक्योगेउ
मरणे सति। सपिंडीकरणं न स्यादेकोद्दिष्टानि कारयेदिति देवलवचनाच्च सपिंडीक
रणं विना तत्प्राप्ताविस्वेदं द्रष्टव्यं। अत्र च पूर्वावध्यपेक्षायां चूडाकर्मणि संजातेवि
पत्तिस्तु यदा भवेत्। सूतकांते प्रकर्तव्यं दृष्टस्योत्सर्जनं तदा तत्र दाहः प्रकर्तव्य उदकं
तत्र निश्चितां। आद्वादशाद्वर्षात्पितुः सपिंडीकरणं विनेति देवयाज्ञिकोक्तवचनाद्ध ९९

Indira Gandhi National
Centre for the Arts

त्रि·टी· रत्नेनौर्ध्वदैहिकोपलक्षणत्वेनव्याख्यातोदकग्रहणादुदकदानंसपिंडैः कृतचूडस्येति
८६ गौतमसूत्रास्थचूडाकरणमेवतथाप्रतीयते तथापिलौगाक्षिवचनेनात्रिवर्षस्येत्यादि
मनुवचनेचोदकदानस्यदाहसाहचर्यावगमात्तस्यचोपलक्षणत्वाद्दाहएवत्र्यब्दावधिर्द्रष्ट
व्यः।देवयाज्ञिकनिबंधेतुदंतजननानार्वाक्तेदुग्धदानंसवयोभ्यः।चौलादर्वाक्पायस
क्षीरवस्त्रादिदानंतेभ्यएव।निखननंचोभयत्र।तदूर्ध्वंपंचमवर्षसमाप्तिपर्यंतमप्युदक
पिंडदानमात्रंतेभ्यएवभोजनादिदानंच।तदूर्ध्वमोपनयनात्तु पिंडीकरणवर्जंसर्वमिति राम·
विशेषोवचनैरेवदर्शितः।तानियथा।गर्भेनष्टेक्रियानास्तिदुग्धंदेयंशिशौमृते।पंचवा ८६

यसंस्थीरंस्याहालविपत्तितः।एकादशंद्वादशाहंवृषोत्सर्गविधिंविना।महादानविहीनंच
कुमारेकृत्यमाचरेत्।तथा।यत्रप्रमीयतेबालस्तत्रप्रायःप्रदीयते।किंचित्समानवयसां
त्कृत्यान्नंयथाविधि।पं.रूपभोज्यंचदातव्यंतथाचक्षुरवभक्षिका।नष्टस्त्राणिप्रदेयानि
सोपानत्कानितत्समे।।अत्रबालग्रहणंकुमारस्याप्युपलक्षणंकुमाराणांचबालानांभो
जनंवस्त्रवेष्टनमितितत्रैवाभिधानात्।तथाभविष्येपिनिक्षेपणंबालेऽब्दावर्षद्वयमाशिखंततः
परंखगन्नैश्चदेहदाहोयथाविधि।प्रथमवर्षकृतचूडस्यापिनिखननंनिवृत्यवर्षमाशिखमपि
ति।उपनीतिकालादौकरिष्यमाणचूडस्यापितर्यंतावर्षद्वयमिति।एतच्चाग्रेविवेचयिष्य

त्रि·टी तैनथाशिशुरास्तंजननाद्बालःस्याद्यावदाशिरलंकं अनेसर्वथाह्यकुमारीयोनिबंधना
१०० त।अत्रचयघ्यामोनिबंधनारित्युक्तंतथापिपूर्वंबाल्यानिपंचमवर्षपर्यंतमेवप्रवर्त्तंते।तद्
र्ध्वंतुपंचवर्षाधिकेबालेविपन्निर्यरिजायते।वृषोत्सर्गादिकंकर्मकर्त्तव्यमपुरस्कंततः।अत्रस्म
ह निसंप्राप्तेकुर्याच्छ्राद्धानिषोडशा।पापसेनतुदेनैवपिंडंदद्याद्यथाक्रमं।उदकुंभप्रदानंतुप
ददानानियानिच।भोजनानिद्विजेभ्यश्चमहादानानिभक्तितः।दीपदानानियत्किंचित्पंच
वर्षाधिकेसदा।कर्त्तव्यंतुखगश्रेष्ठअनार्वाक्तनमये।स्वाहाकारेणवैकुर्यात्कोद्दिष्टानि राम·
षोडश।अत्रदर्भैस्तिलैःशुक्लैःप्राचीनावीतिनिष्ठितमिति।प्राचीनावीतियथास्यात्तथा।पे १००

षामपिषोडशश्राद्धपर्यंतंसर्वंक्रियतेनेषामपिसपिंडीकरणाभावात्सांवत्सरिकादीनितन्मवे
त्येव।तदभावेतदेवतात्वापादकपितृत्वाभावात्।पतिवृद्धत्वहीनेवनतत्संपत्तेप्रमाणाभावात्
।स्त्रीणांतुकृतचूडानामप्यापरिणयातुदकदानादिवैकल्पिकं।नत्वीणांवेकेपवृत्तानामि
तिगौतमस्मरणात्।शूद्राणामप्येवंस्त्रीशूद्राश्चसधर्माणइतिवचनात्।पर्।धाने।उपनय
नविधेःपरंपश्चात्तुस्ववशाखाग्रहोक्तैस्तद्विधानेरौर्ध्वदैहिकप्रकारैःसर्वंविदध्यात्।तथा
चयाज्ञव-ल्क्यः।उपेतश्चैताहितान्माहृतार्थवदिति।अर्थवत्प्रयोजनवत्।तुप्रमाक्र
तप्रयोजनंप्रत्याम्नातंचनकार्यमित्यर्थः।सकरोवा।विभक्तानामविभक्तानांवाक्रोरसा

Indira Gandhi National
Centre for the Arts

त्रि॰टी नांपुत्राणांबहुत्वेसर्वेषांसंनिधानेचसकलंदाहादिसपिंडनांतंशावस्यमृतस्यपैतृत्वनिह
१०२ त्याधिकृतत्वसामर्थ्यविशिष्टंअपतितादिज्येष्ठतःसर्वज्येष्ठएवपुत्रःकुर्यात्।ज्येष्ठस्यत्वस्ये
णाभावेःसंनिधानेपातित्यादिनाऽनधिकारित्वेवातस्यावरःकनिष्ठोवाःसदृशएवसर्वं
कुर्यादितिव्यवस्थितोविकल्पः।सर्वज्येष्ठकनीयसामपिबहुत्वेपूर्ववदिदमेवयोज्यं।तथौ
रसपौत्रिकेयादीनांसमवायेज्येष्ठःपूर्वपूर्वपठितएवकुर्यात्।तदभावेःवरोवरः।पश्चात्स
स्थितः।तथाचसुमंतुः।मातुःपितुश्चकुर्वीतमृतयोरौरसःसुतः।पैतृकेधिकसंस्कारंमंत्र राम
पूर्वकमादितः।इति।अत्रचौरसइत्येकवचनंकर्तृत्वविवक्षितंमधिकारेत्वविवक्षितं।उ १०२

मीतस्यपितुःपुत्रैःश्राद्धंदेयंपृथक्त्वतःइतिबृहस्पतिवचनेसर्वेषामधिकारप्रतिपादनात्।
त२ एवंमृतेपितरिपुत्रेणाक्रियाकार्याविधानतःइत्यादिस्मृत्यादिवचनेष्वप्येकवचनंसाक्षात्कर्तृ
त्वाभिप्रायमेव।अधिकारस्तुफलस्वाम्यात्मकःसर्वेषामपि।अविभक्तानांस्वतएवसा
धारणेनविभक्तानांचस्वस्वांशप्रदानसंपादितसाधारण्येनद्रव्येणसाक्षादेकेनकृते
पिसपिंडीकरणांतकर्मणिअनुमतिसंविधानेनकर्तृत्वात्।अन्यथासाधारण्येकेन
विनियोक्तुमशक्यत्वात्।यत्तुवाचस्पतिनाएकस्यकर्तृत्वेपिसर्वेषामधिकारोस्त्वित्याशं
क्यनह्यन्यकर्तृकेप्रयोगेन्यस्यकर्तृतासंभवतीत्युक्तंतत्कर्तृत्वाधिकारविवेकाज्ञानवि-

Indira Gandhi National
Centre for the Arts

त्रि.टी वंधनं।म्परणीतरेषां[redacted]कार्तकप्रयोगेपसंहारासामर्थ्यंतत्रकारेपुक्तंतरपिअधि ९१
९२ कारणांग्रनुमतिहारकार्तत्वस्पशंकितत्वात्साक्षात्कर्तृत्वासामर्थ्यपिचतत्रेतरेषांसा
मर्थ्यस्याविकल्पत्वात।नह्यन्यत्रासामर्थ्येनान्यत्रासामर्थ्यंभवतिहोत्रासामर्थ्येनै
वाध्वर्यवे।सपिंडीकरणोत्तरभावीनितुसांवत्सरिकार्यम्पविभक्तानामेकस्पैवाविभ
क्तानांतुपृथकपृथक्।भ्रातृणामविभक्तानामेकोधर्मःप्रवर्त्तते।विभागेसतिधर्मो
पिभवेत्तेषांपृथक्पृथ[…]गितिस्मरणात।एवंचपन्नुलपाणिनासपिंडनोत्तरभाविष्व एम·
विभक्तानामपिपरस्तुक्तंतद्रूपायरपिसपिंडीकरणोत्तानिपानिश्राद्धानिषोडशाद ९२

थर्दे·वसुनाः ऊर्ध्वः पृथगर्ब्याञ्यपिक्वचिदितिलघुहारीतवचनंपृथगब्यात्र्यपिरा
दारपृथगब्याश्चसपिंडीकरणोत्तानिपृथर्दे·वकुर्युः तदुत्तराणितुविभक्तानांपृथ
गेवञ्चविभक्तानांचपृथक्वेतिवचनमप्यंगीकारेणतत्रप्रमाणत्वेनोक्तं।तदपिवच
मक्त्रज्ञाननिवंधनं।अविभक्तानामितरवत्सपिंडीकरणोत्तान्यपृथगेवभवंति
विभक्तानांतुरतरवत्तेषपिभेदात्त्सानेप्राप्तेपृथगब्याञ्यपिसपिंडीकरणोत्तानिपृ
थर्दे·वकुर्युरितिनारायणवत्तुपृथक्कुर्युरितिहितत्रवचनमाक्रिनंतुपूर्वापृथगब्यात्र्य
पीमस्यानर्थक्यापत्तेः।एकपाकेनवसतांपितदेवद्विजार्चनं।एकंभवेद्विभक्तानांत

त्रि॰टी॰ देवस्याद्वेशात्सद्भ्रात्रादिहृद्रस्मत्रादिवचनविरोधात्त्। अथ वाक्यं वत्सरात् ज्येष्ठः श्राद्धं कु
र्यात्समेत्य चातुर्थ्ये सपिण्डीकरणात्सर्वे कुर्युः पृथक्पृथगिति आसवचनमपि विभक्ता
१०३ नां उत्तराधर्यानुवादेन सर्वार्थविधायकं। अन्यथा समेत्येत्यस्यानर्थक्यापत्तेरि
त्यलमनपित्रक्तदूषणेन। एवं बहुषु भ्रातृषु सर्वेषामधिकारित्वेपि साक्षात्कर्तृत्व
मेकस्यैवेति स्थिते तत्कस्येत्यपेक्षायां परीचिनोक्तं। मृते पितरि पुत्रेण क्रिया कार्या
विधानतः। बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव राम:
तु यत्कृतं। द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेदिति। यदा एकत्र वासिनः अविभक्ता १०३

बहवः पुत्राः स्युस्तदा सर्वानुमत्या ज्येष्ठेन यत्कृतं तत्सर्वैरेव कृतं भवेत्फललाभात्। यदा
पि विभक्तास्तदापि अविभक्तेन साधारणेन कृते न द्रव्येण सर्वेषां तु मतमित्यादि
ति पित्राविभक्तयोरुक्तं। अविभक्तमात्रविषयत्वे द्रव्येण चाविभक्तेनेत्यस्यानर्थ
क्यापत्तेः। द्रव्येण चाविभक्तेनेत्येतत्तु सपिण्डीकरणपर्यन्तक्रियाविषयं। नव श्राद्धं सं
पिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपीति वचनात्सर्वा
कहृदस्मत्रादिवचनाच्च। तस्माद्विभक्तानामविभक्तानां वानेकेषां भ्रातॄणां संनिधा
नेः पतितादिविधिमान्ज्येष्ठ एव सपिण्डीकरणपर्यन्तं कुर्यात्। तदसंनिधाने त्ववरोपि

Indira Gandhi National
Centre for the Arts

त्रि·टी· पुत्रा एव षोडशश्राद्धपर्यंतं तावत्कुर्युरेव। तस्य नियतकालकर्तव्यत्वात्। इति निधनतु
१०४ कल्पयोश्च पुत्राभावोपाधिकत्वाविशेषात्तुल्यन्यायत्वेपि पुत्रत्वमहत्त्वेनान्यस्यक
र्तृत्वं स्वत्वाभावात्संभविस्वदृष्टेन कर्तृत्वेनप्रथमधिकारापत्तिरित्येवंरूपस्य बाधि
तेस्मृते वाप्रजमाने प्राजमाने पुत्रत्वतिनिधनाभावन्यायस्य दृश्याधिकारसाधारण्यात्त
त्सामिव पुत्रेष्वपत्नेः कर्तृत्वांशेनेषामनुकल्पत्वस्यन्याय्यत्वादस्य माणपुत्राणामिति
काधिकारिणां तु पत्न्यापि न्याय्याप्राप्तेव प्राप्त्याभिवचनं च पिंडदोंशदर्शनेत्यादिस्मर्यस्व तप·
स्वरूपाभावोपाधिकमेव तेषां पंशग्रहणे स्वपिंडदानेपि कर्तृत्वं विदधाति तथापि १०४

अस्य गोत्र: सगोत्रो वेति वाक्यारंभसामर्थ्यात्त्रीविनावशिष्टेपुत्र इति वाक्यारंभसा
मर्थ्यात्पूर्व पूर्वाभावे निधनत्नादावपि तेषां नत्र कर्तृत्वमवसीयते। यदिहि तत्वल्पे प्र
पूर्व पूर्वाभाव एवोत्तरोत्तरस्य कर्तृत्वं तदेदं वचनद्वयमनर्थकं प्राप्तत्वात्तदर्थं
स्य परात्पूर्व पूर्वसंनिधानाद्यभावे पुनरोत्तरस्य कर्तृत्वं तदा तदुसंनिधानादि
ना तरस्येव प्रथमारब्धे कर्मण्यकृते पश्चात्तस्यासन्नसंनिधौ प्रवृत्तेपीति चेदिति न्याये
नउत्तरकर्मणि तस्यैव कर्तृत्वप्राप्ते पुत्रासंनिधौ च सपिंडानेपि तत्पूर्व क्रियापास्तिवधा
त्रादीनामप्यधिकारे प्राप्ते इदं वचनद्वयमर्थवद्भवति। सपिंडीकरणं तु पुत्राः सान्निका

Indira Gandhi National
Centre for the Arts

त्रि॰ दी॰ श्चेन्महाएकादशाहे द्वादशाहे वा कुर्युरेव। पिंडपितृयज्ञार्थं सांवत्सरिकस्य तत्काले तस्या
१०५ वश्यकत्वात्। निरग्निकैस्तु चरमकाले पावकत्वेपि मातुः स्थाने पत्नीश्रपणीयं। तन्मध्ये देव२
ताते ज्येष्ठेनैव कार्यो नो चेत्तु चरमकाले कनिष्ठैरपि कार्यं पूर्वकाम्याभावात्। पुत्राति
देशिनां तु विशेषो वक्ष्यते। औरसः पुत्रिकापुत्रादयो याज्ञवल्क्योक्तक्रमेण
कुर्युः। तथा च याज्ञवल्क्यः। औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः राम॰
क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। का १०५
नीनः कन्यकाजातो मातामहसुतो मतः। अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः

ता१

तः। दद्यान्मातापिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः
स्यात्स्वयं कृतः। दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सो
ऽपविद्धो भवेत्सुतः। पिंडदोंशहरश्चैषां पूर्वाभावे परः परः इति। धर्मपत्नी द्विजाती
द्विजेन वर्णस्त्राणां तु स्वस्य पत्न्यभावेपि तत्तुल्या परिणीता। तस्यां स्वस्माज्जातऔ
रसः। अत एव विप्रस्य स्वक्षेत्रे स्वयमुत्पादितः प्रथम इत्युक्तं। एवं च यन्मनुना
संस्कृतायां सवर्णायां स्वयमुत्पादयेत्तु यं। तमौरसं विजानीयात्पुत्रं प्राथमकल्पि
कमिति सवर्णग्रहणं कृतं तद्द्विजेतु द्विजत्वाभिप्रायेण द्रष्टव्यं। यदपि योगीश्व

Indira Gandhi National Centre for the Arts

१४

त्रि·टी रेणांतेउक्तौसजातीयेष्वयंप्रोक्तस्तनयेषु मयाविधिरितिनद्ध्यौरस अतिरिक्तविषयं।विधि
१०६ रित्युक्तेः तस्यचपिंडरिक्थभागित्वेनात्राविधेयत्वात्।तेनब्राह्मणात्क्षत्रियोत्पादितयोः क्षत्रि
यावैश्यापुत्रयोरप्यौरसत्वंद्रष्टव्यं।अतएवब्रह्मपुराणेपुत्राः कुर्वंति विप्रायक्षत्रविट्स्
द्रयोनयद्इतिक्षत्रियावैश्यापुत्रयोरपिपितृक्रियाकारित्वमुक्तं।शूद्रापुत्रस्यतुतद्द्वादश
विधपुत्राभावेतच्चोत्तरमेववक्ष्यते।औरसाभावेपुत्रिकासुतः।सचद्विविधः।पुत्रिकैवसु
तइत्येकः तथाचमनुः।अकृतावाकृतावापियंविंदेत्सदृशात्सुतं।पौत्रीमातामहस्तेनद राम·
द्यात्पिंडंहरेद्धनमिति।पुत्रिकायाःसुतइत्यपरः।तथाचवसिष्ठः।अभ्रातृकांप्रदास्यामितु १०६

भ्यंकन्यामलंकृतां।अस्यांयोजायतेपुत्रःसमेपुत्रोभवेदिति।सचौरससमोदायग्रहे
अयंचयानामह्यस्यैवपुत्रः।संविदानुवीजिनोपि।अतएवयमः।कुर्यान्मातामहश्राद्धं
नियमात्पुत्रिकासुतः।उभयोरथसंबद्धःसकुर्यादुभयोरपीति।संविद्दर्शितावसिष्ठेन।
अपुत्रोहंप्रदास्यामितुभ्यंकन्यांभवानपि।पुत्रार्थंचोदितोह्यस्मिन्नःसनोपुत्रोभवेदिति।
तदभावेक्षेत्रजः।सचवाग्दत्तविधवायामपुत्रांगुर्वनुज्ञातइतियाज्ञवल्क्योक्तविधिनाजातः
।यस्याम्रियेतकन्यायावाचासत्येकृतेपतिः।तामनेनविधानेननिजोविंदेतदेवरइतिवच
नादितिविश्वरूप[redacted]विज्ञानेश्वराद्याः।मनुनातुपुत्रजननात्समर्थस्यजीवतोपिपत्युः

Indira Gandhi National Centre for the Arts

त्रि·टी· क्षेत्रेतन्नियोगेनसवर्णात्जातःक्षेत्रजः। यस्तल्पजःप्रमीतस्यक्लीवस्यव्याधितस्यच। स्वध
१०७ र्मेणनियुक्तायांसहेयःक्षेत्रजःसुतइति। अयंचक्षेत्रिणः अनेनविधिनाजातःक्षेत्रस्यभजो
वेत्सुतइत्युक्तत्वात्। बीजिनोपिपुत्रेच्छायांतस्यापि। तथाचयाज्ञवल्क्यः अपुत्रेणपरक्षेत्रेनि
योगोत्पादितःसुतः उभयोरप्यसौरिक्थीपिंडदाताचधर्मतइति। तदभावेगूढजः। सचसवर्णज
त्वनिश्चयेपिपुरुषविशेषजत्वानिश्चयात्प्रच्छन्नोत्पन्नःगृहेसवर्णादुत्पन्नः। अयंचक्षेत्रिणए
व। तथाचमनुः उत्पद्यतेगृहेयस्यनचज्ञायेतकस्यसः। सगृहेगूढउत्पन्नस्तस्यस्याद्यस्यतल्प राम·
जइति। अत्रानंतरपूर्वोक्तंद्रष्टव्यं। तदभावेकानीनः। सचसवर्णादेवापरिणीतायामुत्पन्नोमा १०७

तामहस्सुतः। वसिष्ठोपि। अप्रत्ताद्दुहितायस्यपुत्रंविंदेततुल्यतः। पुत्रामातामहस्तेनदद्या
त्पिंडंहरेद्धनमिति। मनुनाप्युपरिणेतुःपुत्रइत्युक्तंपितृवेश्मनिकन्यातुयंपुत्रंजनयेद्रहः
। तंकानीनंवदेन्नाम्नावोढुःकन्यासमुद्भवमिति। अत्रैकस्यैवापुत्रत्वेतस्यैवउभयोरपित
थात्वेउभयोरपीतिद्रष्टव्यं। तदभावेपौनर्भवः। सचपत्याभुक्तायामभुक्तायांवाजीवताप
त्यातेक्तायांविधवायांवासवर्णादेवजातः। विष्णुरपि। यातुपत्यापरित्यक्ताविधवावास्व
च्छयाथवा। उत्पादयेत्पुनर्भूत्वासपौनर्भवउच्यतइति। अयंचबीजिनएव। परित्यागेनमरणे
नचभर्तुःक्षेत्रस्वत्वाभावात्। नियोगस्यचाभावात्। स्वेच्छाग्रहणाच्च। तदभावेदत्तकः।

Indira Gandhi National Centre for the Arts

वि·टी· १०८ स च मात्रा पित्रा वान्यतराभावेऽन्यतरेण वा त्यं तद्दुर्गत्याभरणासामर्थ्ये न विधिपूर्वकं दत्तः
प्रतिग्रहीतृसवर्णः प्रतिग्रहीतुरेव पुत्रः। तथा च मनुः। माता पिता वा दद्यातां यमद्भिः
पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः इति। अद्भिरिति वसिष्ठोक्तविध्यु
पलक्षणं। आपद्ग्रहणादनापदि दातुर्दाने निषेधः। अत एव वाचस्पतिनाप्यापदि ग्रहीतुः
पुत्राभाव इति व्याख्यातं तदाज्ञं विना पत्न्यापि तेन सद्भिः प्रतिनिधिः स्मृतः। तथैकादश पु
त्राः स्युः पुत्रिकौरसयोर्विनेति बृहस्पतिवचनात् क्षेत्रजादीनपुत्राणामेतानेकादश यथोदि १०८
तान् पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिण इति क्रियालोपहेतुकौरसप्रतिनि

धित्वोक्तेश्चैतावदत्तकस्याप्यौरसपुत्राभावविषयत्वसिद्धेरानर्थक्यात्समपि आहारवि
रोधाद्युपेक्ष्यं। सदृशं प्रतिग्रहीतृसवर्णं। प्रीतिसंयुक्तमिति द्वेष्यपुत्रविशेषणं। विक्रये चै
व दाने च न नेयाः स्युर्निर्धनाः इति वचनात्। मातापित्रोश्चायं विशेषः। उभयोर्जीवतोः प
त्युरपि पत्न्यनुमत्यैव दातृत्वं कथंचिदपि तदनुमत्यभावेऽपि तत्पक्षः स्यात् तं ममापि। प
त्न्यास्तु पत्यौ जीवति संदिग्निते प्रोषिते वा तदनुमत्यैव दातृत्वम्। तेन तु स्वातन्त्र्यमपि। तथा
च वसिष्ठः। शुक्रशोणितसंभवः पुत्रो मातापितृनिमित्तकः। तस्य प्रदानविक्रयत्यागे
षु मातापितरौ प्रभवतः। न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा स हि संतानाय पूर्वेषां। न स्त्री

Indira Gandhi National Centre for the Arts

त्रि॰टी पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः। पुत्रं प्रतिगृह्णीष्यन्बंधूनाहूय राजनिवा
१०६ वेद्यनिवेशनस्य मध्ये व्याहृतिभिर्हुत्वा ऽदूरबांधवं बंधुसंनिकृष्टमेव प्रतिगृह्णीया
त्संदेहे चोत्पन्ने दूरेबांधवं शूद्रमिव स्थापयेत्। विज्ञायते ह्येकेन बहूंस्त्रायत इति। एकं पुत्रमि
त्युपलक्षणं ज्येष्ठोपि न देयस्तस्य पुत्रकार्यकरणे मुख्यत्वात्। स्त्रीग्रहणात्पत्युः
रपीजाए वविषयेस्यातं अयं घोत्सतेनतु सर्वदा। उपक्रमविरोधात्। विशेषणे निषे राम॰
धसंक्रमादानरवप्रतिग्रहेपि स्त्रिया अधिकारः। होमस्तु न भवति। सति संभवे बंधु १०६
संनिकृष्टमात्पुत्रादिकं तदभावे दूरबांधवसंनिकृष्टेन देशवर्त्तिपित्रादिकं ज्ञातकु

लशीलमप्यमपि। परीक्षितस्यापि कथंचिद्दूराश्लपापादिसंदेहे उत्पन्नेऽयावज्जन्मिवृत्ति
शूद्रस्थापयेत्तेन न जमवहरेत्। अपुत्रस्य पुत्रकरणावश्यकत्वे प्रतिनाप कृत्याकर्षः
विज्ञायत इति। अस्यायमर्थः। एकेनापि रसेनापि पुत्रेण बहूनपि ज्ञातीन्नरकात्त्राय
त इति। अत्र च होमादिरिक्तः सर्वोपि ग्रहणापादानग्रहीतमो वरो नियमः क्रीत
स्वयंदत्तकृत्रिमापविद्धेष्वपि यथासंभवं द्रष्टव्योऽदृष्टार्थत्वात्। वसिष्ठेन विक्र
यस्यागोपास्ना अ। स्वयंदत्तेतु होमोपि न तत्रापि प्रतिग्रहसत्त्वात्। दत्तकाभावे क्रीतो
मातापितृभ्यां पूर्ववत्। यत्तु क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमंतिकात्। स क्री

Indira Gandhi National Centre for the Arts

त्रि·टी· नकः। सुतस्तस्य सदृशो सदृशोऽपि चेति मानवे यसदृशग्रहणं तु गुणासादृश्यपरं। सजाती
१९० येष्वयं प्रोक्तस्त्रप संहारात। तदभावे कृत्रिमः स च मातापितृविहीनश्चोदोषनादिभिर्लो
भनेन स्वयं पुत्रार्थिना पुत्रीकृतः। इत्येवं त। मनुरपि। सदृशं यं प्रकुर्यात्तु गुणदोषविचक्ष
णं। पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः इति। तदभावे स्वयंदत्तः। स च मा[redacted]तापितृवि
हीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रोऽस्मीति स्वयमात्मानं दत्तवान् इत्येवं गृहीतः। मनुरपि।
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्। आत्मानं स्पर्शयेद्यस्तु स्वयंदत्तस्तु स लप·
स्मृत इति। तदभावे सहोढजः। स च सवर्णात् संभूतो गर्भे स्थितो गर्भिण्यां परिणीतायां स्त्री १९०

कृतः। पश्चादुत्पन्नो वोढुः पुत्रः। तथा च मनुः। या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा स
ती। वोढुः स गर्भो भवति सहोढ इति चोच्यत इति। ननु कन्या सुपपद्यते इति कन्याया एव विवा
हविधानात् कथं गर्भिण्याः संस्कारः। अत्र केचित्तावदाहुः। नपुरुषसंबंधेन कन्यात्वप
येति किं तु मंत्रवत्संस्कारेणैव। पाणिग्रहणिका मंत्रा नियतं दारलक्षणं। तेषां निष्ठा
तु विज्ञेया विद्वद्भिः सप्तमे पदे इति मनुवचनात्। अत एव मनुनाप्यवापपूर्वकत्वे नोक्तो
ऽपि गांधर्वपैशाचविवाहयोरल्पे वपाणिग्रहणहोमादिः संस्कारः। तथा च देवलः। गां
धर्वादिविवाहेषु पुनर्वैवाहिको विधिः। कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः।

Indira Gandhi National Centre for the Arts

त्रि·टी· ति।तत्रोपगतेव संस्कृतागर्भि।ण्यास्त्वन्यः स्यमेव न।अतएव च नियुक्तागमनानि विवा
११४ हब्रह्मचर्यमात्रं तत्र होमादिः।ननु भार्यात्वलक्षणो लोकिकातिशयजनकं संस्कारकर्म
।संस्कारकर्म विवाह एव च कन्यामुपयच्छेतेति विधिर्द्वितीयानिर्देशादित्यस्मिन्नांगीक
र्तव्यं।क्षतयोनित्वेपि संस्काराभावेन कन्यात्वानपगमादत्रापि तद्विधिप्रवृत्तौ बाधका
भावात्।प्रथमसमवायेन स्त्रीपुरुषयोः कन्यापत्यन्यगमननिषेधातिक्रमनिमित्त प्रत्य
वायसंभवेपि क्षत्रेगांधर्वाद्दोनस्यैव पुरुषस्य गर्भिणीपरिणयने स्यस्याः स्त्रियाश्चोभय राम·
त्रतत्परिहारार्थं गांधर्वगर्भिणीपरिणयनादेरपि भार्यापतिभावसंपादकत्वेन संस्का ११४

रकर्मत्वात्।अत एव गांधर्वोढायां गर्भिण्यां च जातः पुत्रो वोढुरेव तस्यां भार्यात्वेन स्व
त्वात्।नियुक्तायास्तु संस्कृतत्वेनाकन्यात्वाद्देवरादिपरिणयनं धर्ममात्रमेव।यद्यपि च
नियोगो वाग्दत्ताविषयस्तथापि वाग्दान संप्रदानस्य पतित्वोक्तेर्नियुक्तोजस्य क्षेत्री पुत्र
त्वोक्तेश्च संस्कारभार्यात्वाभावेपि वाग्दानमात्रेणोढस्येश्वरत्वं कन्यात्वापगमश्च द्रष्टव्यः
।कन्योक्तिस्तु संस्कारसंस्काराभावाभिप्रायेण संस्कारसंस्कृताया नियोगं प्रति विधान
त्तु नायस्या म्रियेतेत्यादुक्तेः अन्यथा पाणिग्रहणिका मंत्राः कन्यास्वेव प्रतिष्ठिताः।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः इति निषेधाप्रवृत्तेः स्त्र्युद्वाहविधि वैयर्थ्य

Indira Gandhi National Centre for the Arts

ॐ

त्रि·टी ११२ प्रसंगात्। अत एवाश्रमत्वेनानेकगुणोपादानेन च विधेयत्वाद्भिन्नेष्विन्विवाहे प्रजार्थं वि
वाहाच्चोरकत्रासाम्यपूर्वापर्युदासापवादत्वेनापुत्रांगुर्वनुज्ञातः स्मादिस्मादस्मात विज्ञानेष्व
रेण। अनन्यपूर्वाशब्दश्च कन्याशब्दसमानार्थत्वादन्यादृत्तापर एव। नत्वन्यानुपभुक्तपरो
पिगर्भिणीसंस्कारानुपपत्तिप्रसंगात्। नचात्रसंस्कारो विधीयते येन नियुक्तावद्वाच्चनिक
धर्ममात्रापेक्षेत। बलादपहृता कन्या मंत्रैर्यदि नसंस्कृता। अन्यस्मै विधिवद्देया यथाक राम·
न्या तथैव सेत्यनेनापि वाचो युक्तिविशेषेणापहृतेन कन्यात्वनिहन्ति शं कापिशाचीनि ११२
रासमात्रं क्रियते न तु कन्यापाए व तस्याः कन्यातुल्यत्वेनान्यस्मै दानं विधीयते वचनभार

कल्पनापत्तेरकन्यात्वेबीजाभावाच्च। अत एव च कानीनः कर्णादिष्वपि युज्यते। अक्षत
योनिवचनं त्वेकस्यापुनर्भूरिति व्याख्यातो हे। व्यर्पत्वेवशकुंतलोपाख्यानादाविति
हासपुराणेषु क्षतयोनीनामपि विवाहः॥ एवं च सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनि
ष्वानुलोम्येन संभूता जात्या ज्ञेयास्त एव त इति मनुवचनेऽक्षतयोनिषु वृद्धुपक्षत्वत्रा
नां तज्जातीयत्वनिषेधार्थमक्षतयोनिग्रहणं पृथग्युक्तं। अन्यथा तासां विवाहसंस्का
राभावेन मुख्यपत्नीत्वाभावात्तद्द्वारा नैव तत्प्रयोजनत्वाभावात्तद्वैयर्थ्यप्रसंगात्। न चा
तासां विवाहसत्वेपि कर्माधिकारापादकसंयोगनिमित्तं पत्नीत्वं नास्त्येवेति वाच्यं। वि

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ ११२ वाहरूपपत्नसंयोगादेवतदुपपत्तेः। तस्यापि शूद्रवद्दर्शादियागरूपत्वात्। पाणिग्रहणीका
मंत्रास्त्वादिनिषेधोपि संस्कृताविषय एव नक्षतयोनिविषयः। मंत्रलिंगस्य हतुत्वाभि
धानात्। मंत्राणां चगार्हपत्याय भार्यापतिभावाय देवा मह्यमेव त्वांऽदुरित्येवं तोनत्व
स्य सेमे च्यहमेवत्वापि नः पितृकुलात्प्रमुंचामि नत्वमे नत्वं तथा कृता। अर्यमादयो
देवाः दत्तानाभिमामितः प्रमुंचंतनतु श्वशुर्यं प्रमुक्तवंतः। तावावापि हविवहावेहैनतु पू राम॰
र्वमूढा विस्पादिप्रकारेणासंस्कृता परत्वात्। नत्वक्षतयोनिपरत्वे किंचिन्मंत्रलिंगं ११२
पश्यामः। संभोगमात्रेण नत्वतापनपरूपपितृकुलप्रमोकासंभवात्। कानीनपौ

त्रिकेयमयोर्नाम महापुत्रत्वाद्यनुपपत्तिप्रसंगात्। यत्वैदिकत्वान्मंत्रार्थमज्ञानानैः सा
हसिकैः कुत्सकवावस्य त्यादिभिः कन्याऽग्निप्रयस्त इति मंत्रलिंगमुदाहृतं तदप्यक्ष
तेति वऊवचनात् अतनिर्देशसमभिव्याहाराद्दृष्टिति पाठाच्च वऊवचनांतदेव कन्यापर
कन्याशब्देन संस्क्रियमाणकन्याप्रकाशनाभावात्संस्कृताक्षतयोनिपरत्वेन तस्यसं
दिग्धत्वाद्वापेक्ष्यं। अत एवार्यमणमित्यादिमंत्राणां पत्याहोत्वत्वेपि पतिप्रयोज्यत्वसु
के इति कृता। तस्मादतपुरुषसंप्रयोगयाच्यपि संस्कारणभावेन कन्यां [redacted] संपाद
नेनचकेवलदृष्टार्थत्वात् द्वैवनिषेधः। अत एव गांधर्वादीनां मैथुनमात्र हितत्व न ग्रहणा

२ तानयायद्यु ज्यत एव गांधर्वादिविद्विणया अपि परिणयः केवलं निषेधातिक्रमपूर्वकत्वात्कन्यागमन २
निषेधाप्रवृत्तिर २

Indira Gandhi National
Centre for the Arts

त्रि·टी मैथुन्यत्वं तज्जातपुत्राणां च संतानावर्धनत्वमुक्तं स्मृतिषु। शर्वीपगं तु वैदुष्यान्यत्वेन निंद्य
११४ तमत्वाच्च विवाहेषु गर्हितो परिणयस्यापादकं इति। मे ध्वांते थि ब्रुम. तयस्का। कन्याकुमारी
शब्दे प्रथमवयो वचनावनुपयुक्तसर्वस्त्रीवचनौ च। कोशात्प्रयोगाच्च। नत्वसंस्कृतमात्र
वचनौ तदभावात्। वेशजीविनानामसंस्कृतानां गमनेऽकन्यागमनदोषापत्तेश्च। विवाहप्र
करणे तु अनुपयुक्तवचनावेव लोकेपि तत्प्रसंगे अप्रतानात्। क्षतयोनिपरिणेतु कामस्या
प्येनैषाकुमारी नेह यस्यां कौमारमित्यादिबोधनादिव्यवहारस्येतद्विषयत्वात्। अन्यत्रा राम
पि प्राचुर्येण तत्रैव प्रयोगाच्च। क्षतयोनेरपि परिणये च गर्भाधानादिसंस्कारांगमंत्राणां ११४

विप्लुयोनिकन्यात्विस्मादानामसमवेतार्थत्वापत्तिः मैथुनक्षमात्वरूपस्य योनिक
ल्पनस्य प्रथममेव कृतत्वेन प्रार्थनायाः संभवात्। न च गांधर्वादिविवाहाविषयत्वं वेषां यु
क्तमविशेषश्रवणात्। तथा च कन्या सुपपद्येते स्मक्षतयोनेरेव विवाहविधानाद्बाध
वेलक्षणार्थः दृष्टयान्योन्यसंयोगः कन्यायाश्च वरस्य चेति मनुवचने संयोग एकत्र देशे
संभवतयोरन्योन्येच्छया त्वं मे पतिर्भव त्वं मे भार्या भवेति समयरूपो द्रष्टव्यः। पैशाचल
क्षणार्थे च सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छतीत्यत्रोपगच्छतिरालिंगनोपगूहनचु
बनाद्युपगमनार्थमापारपरो द्रष्टव्यः। अत एवाभिलापन सत्त्वयातवत्कपस्यत्यादौ

Indira Gandhi National Centre for the Arts

त्रि॰टी॰ मिथःसमयक्षतापहरणमात्रं तयोर्लक्षणमुक्तं एवं च विवाहविधौ कन्याशब्दस्याक्षतयोनि
२९५ वचनत्वेन गर्भिण्यास्तदप्राप्तेर्या गर्भिणीत्यत्र संस्कारस्यानुवादप्रतीतावप्यनुपपत्त्या विधि
रेव द्रष्टव्यः। स च संस्कारः कन्यासंस्कारवन्न भार्यापतिभावसंपादकः प्रमाणाभावात् किंतु
तद्गर्भकं धर्ममात्रं नियुक्तासंस्कारवत्। तस्य च प्रयोजनं तस्याः कन्यात्वपरभार्यात्वविधवा
त्वाभावात् तद्गमने द्वितीयोपगंतुः कन्यादिगमननिमित्तदोषाभावेपि स्वभार्यात्वस्याप्यभा राम॰
वात्स्वदारनिरतः सदेति नियमातिरिक्तमनिमित्तप्रसक्तदोषपरिहारो भार्यात्वासंपादने २९५
पि तद्बुद्ध्यैव अन्यथा नर्थक्यापत्तेः वोढुरित्यनेनापि न विवाहप्रत्यभिज्ञानं तस्यास्वीकर्तृमात्रवच

त्वात्। इत्थंउक्तरीत्या गर्भिण्या विवाहाभावात्। तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भव
मित्यत्राप्येवमेव यद्यनूढा तदा मातामहस्य यद्यूढा तदा वोढुरिति मिताक्षरा। रागिप्रकपगंत्रे
दीयते तदा तस्या न चेत् मातामहस्येत्येवं मात्रम्येया विवाहासंभवात्। तत्रोपगंतैव स्त्रीकर्त्ता
गर्भिण्याश्चेत्यत्र निर्विशेषः। एवं च सा चेदक्षतयोनिःस्यात् गतप्रत्यागतापि वा। पौनर्भवेन भ
र्त्रा सा पुनःसंस्कारमर्हतीति पक्षवचनेक्षतयोनेः पुनर्भ्वाः संस्कार इत्यौक्तिः संगच्छते।
अन्यथा तस्याः संस्कृतत्वे न तदनुपपत्तिप्रसंगात्। धर्ममात्रत्वे च पुनःशब्दानुपपत्तेः। गत
प्रत्यागतायामप्यक्षतयोनित्वमपेक्षितमेव। इत्थं तु पत्यान्यत्राविधवा वा इयं तु स्वयमेव स्त्री

Indira Gandhi National
Centre for the Arts

तें

त्रि॰टी॰ वैश्वदेवपतित्यक्ताङ्गनेतिभेदः। अतएव वर्णभिन्नपादिपरिणायस्य विवाहेऽपवादः। यत्तु स
१९६ देवर्णासिद्धित्यादिवर्णलक्षणार्थमनुवचनेऽसवर्णायोनिग्रहणं तल्लोके संकृतास्वपि लक्षणा
यारजकस्यपत्नीत्यादिपत्नीशब्दप्रयोगदर्शनादेवचलाक्षणिकार्थग्रहणेप्रमाणाभावेपि
पेरम त्याशंकानिवृत्यर्थमितिप्रपंचेनोक्तं मेधातिथिनात द्याख्यानावसरे। पाणिग्रहणि
कामंत्राइत्याद्यपित्वसवर्णायोनिपरमेव। कन्यासुप्रपद्येतेति नियमविधिः पूर्वोक्तयुक्त्यातत्य
रत्वात्। नत्विद्वार्थानुवादत्वाच्चेनेष्य। मंत्रगतानां चतेत्वात्वमिमामित्यादीनां संनिहितवाचि राम॰
प्रहानां विधिपरतंत्रत्वेन विधिविषयाभूतनत्परत्वात्। नियमादिगर्भत्वेचप्रमाणाभावेनमग्रे १९६

त्वादुरित्यादीनामौदासीन्यात्। यथाकथंचिद्यानः असम्यमेवतुरुदिक्षपातेविहरणोति
विवाहावेदेनतःपश्चादेवप्रजांप्रजनयावहेप्रज्ञोत्पत्त्यनुकूलंम्यवायलक्षणांव्यापारंकरवा
वहेहेनतुस्वर्वहलतवंनावित्यादिप्रकारेणासवर्णायोनिपरत्वस्यापिदर्शयितुंशक्यत्वात्। अतए
वमेधातिथिनाकन्यासासवर्णायोनिवचनत्वात्कन्यास्त्वग्निमयक्षतेतिमंत्रगतेप्रथक
वमेकन्यानां विवाहयागेकर्तृत्वनिर्देशाद्धार्मिनयपूर्वपक्षानुसारेणमंत्रबलादेवाक्षत
योनीनां विवाहस्तुल्कातत्रापरितोषात्परमार्थतस्तुकन्यासुप्रपद्येतेतिविधिबलादेव
नासांविवाहः मंत्राःपुनर्विहितमेवार्थमभिवदंतिनपुनर्मंत्रेषुकन्याशब्दश्रवणात्कन्या

Indira Gandhi National Centre for the Arts

त्रि·टी
११८

नोविवाहइत्युक्तं।प्राच्येऽक्तमीमांसानध्ययनान्नदुक्ततात्पर्यमज्ञानात्तैःसंस्क्रियमाणाक
न्याप्रकाशकत्वेनैवकन्याश्रिमयक्षतेतिमेनोदाहृतमितिभ्रमेणाकन्याविवाहेतस्यास
मवेतार्थत्वापत्तिरित्युक्तंतदुपेक्ष्यमित्युक्तं।कानीनःकर्णइत्यादौतुअक्षतायाःसंक्लि
तायात्वंकन्याशब्दस्येति।अत्रेदंतत्वं।कन्याशब्दस्यानन्यपूर्वाशब्दपर्यायत्वात्सर्वजा
तीनप्रयोगात्तुदानोपभोगोभयाभावःप्रवृत्तिनिमित्तं।एवंचान्यतरसत्वेऽभयाभावाभा
वेनकन्यात्वाभावान्मुख्यविवाहाप्राप्तेःस्वविषक्तःपुनर्भूसंस्कारःउपभुक्तासंस्का
रश्चद्वयमपिवाचनिकंधर्ममात्रप्रयोजनंचतस्यपूर्वोक्तमेव।अतएवचद्वयस्यापि

या॰
११८

विवाहेप्रपातः।तथाचमिताक्षरायांदानेनोपभोगेनवादूषणांतरापरिगृहीतापिन्यन
न्यपूर्वापरंव्याख्यातं।अन्यपूर्वानपरिणेयेत्यक्तंकासान्यपूर्वेत्यपेक्षायांचतत्व
रूपप्रतिपादकत्वेनाक्षताचक्षताचेत्यादिव्याख्यातं।अन्यत्तुपूर्वोक्तमेवेत्यलंप्र
संगागतेन।सहोढजाभावेपविद्धः।सचमातापितृभ्यांतदन्यतरेणवादोषाभावेपिभ
रणासामर्थ्येनमूलजातत्वादिनावात्यक्तोज्ञातपित्रादिसवर्णःपुत्रत्वेनपरिगृहीतः
।मनुरपिमातापितृभ्यामुत्सृष्टंतयोरन्यतरेणवा।यंपुत्रंप्रतिगृह्णीयादपविद्धस्तुस
स्मृतइति।एतेचद्वादशपुत्रायद्यपिऔरसःक्षेत्रजश्चैवपुत्रिकापुत्रएवच।कानीन

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ ११९ श्च सहोढश्च गूढोत्पन्नस्तथैव च। पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा। स्वयं चोपगतः
पुत्रा द्वादश एते प्रकीर्त्तिताः इति नारदस्मृतौ मन्वादिस्मृतौ च क्रमान्तरेणोक्तास्तथापि तत्र परि
गणनमात्रदर्शनात् क्रमो योगीश्वरोक्त एव ग्राह्यः पूर्वाभावे परः पर इति क्रमविधानात्। विष्णु
स्मृतौ तु क्षेत्रजः सक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढोत्पन्नसहोढदत्तकक्रीतस्वयमुप
गतापविद्धयत्रक्वचनोत्पादितानां प्रथमद्वितीयादित्वेनाभिधानादेतेषां पूर्वः पूर्वः श्रेया
न् स एव दायहर इत्युक्तेः पूर्वपूर्वाभावे क्रमो विहितः एवं तथापि विज्ञानेश्वरादिभिर्योगीश्वरो राम॰
१ क्तक्रमस्यैवादृतत्वात्तस्यैवोक्तः। प्राच्यानां तु पाठदर्शनात् क्याधकर्केर्वैधक्रमातिक्रमेण नारदी ११९

म॰१ यपाठक्रमाङ्गीकारेण क्वचित्प्रमाणस्वरूपं तद्बलाबलाज्ञाननिबन्धनं। अत्र च यं पुत्रं प्राणास्तु म
द्रायां कामादुत्पादयेत्सुतं। स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः। तत्स्तुक्काक्षेत्रजतादीन्सुता
नेतानेकादशपथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः इति मनुनोक्तत्वाद
त्रैक्वचनोत्पादितस्तद्वादश इति विष्णुवचनाद्ब्राह्मणेन न कर्त्तव्यं शूद्रस्यैवौर्ध्वदैहिकं शूद्रे
णा वा ब्राह्मणस्यापि नापारशवात्मकं विदितिपारस्करवचनात्सर्वोक्तद्वादशविधपुत्राभावेऽशू
द्रापुत्रस्यापि द्विजातिपुत्रौर्ध्वदैहिकेऽधिकार इति प्रतीयते। विज्ञानेश्वरादिभिस्तु याज्ञवल्क्या
दिभिरुक्तत्वाद्यद्यपि स्यात्तु सत्पुत्रोऽप्यसत्पुत्रोऽपि वा भवेत्। नाधिकं दशमाद्दद्याच्छूद्रापुत्राय

Indira Gandhi National Centre for the Arts

त्रि॰टी धर्मतरतिचमनुनाप्पुत्राभावेपितस्सकलन्लदायालाभोक्तेर्यच्छार्थेहरः सपिंडदायीतिच
११९ विप्रश्चापस्तंबाभ्यामुत्सर्गतोऽङ्गीकृयहणस्यश्राद्धाद्यधिकारप्रयोजकत्वोक्तेः पंढस्याप
नधिकारादल्पमात्राधिकारिष्वपरिगणितः। यद्यभ्रातॄणामेकजातानामेकश्चेत्सुतवा
न्भवेत्। सर्वांस्तांस्तेनपुत्रेणपुत्रिणोमनुरब्रवीदितिमनुवचनंतद्भ्रातृपुत्रस्यपुत्रीकरण
संभवेन्येषांपुत्रीकरणनिषेधार्थंनतुतस्यपुत्रत्वप्रतिपादनार्थं। श्राद्धादौङ्कृयहणे
चभ्रातृनेतरंतस्याधिकारस्मरणात्। सपत्नीपुत्रस्यतुगौणपुत्रत्वमप्यस्त्येवाति [redacted] राम॰
नम्भ्राश्राद्धेऔरसस्तदभावेपौत्रिकेयस्तदभावेसपत्नीपुत्रस्तदभावेक्षेत्रजाद्याइत्यधि ११९

कारिक्रमः। बह्वीनामेकपत्नीनामेकाचेत्पुत्रिणीभवेत्। सर्वास्तास्तेनपुत्रेणप्राहपुत्र
रव्या २ वतीर्मनुरितितस्यएवंबह्वीनांसंभवेपिविद्धमादौरसःपुत्रोजनन्याश्चौर्ध्वदेहिकंत
दभावेसपत्नीजःक्षेत्रजाद्यास्तथावृता। तेषामभावेतुपतिस्तदभावेसपिंडकाइतिकात्या
यनवचनात्। एवंचपुत्राभावेदुहितानदभावेसपत्नीपुत्रइतिशूलपाण्युक्तःक्रमोहेयः
पुत्रस्यचानुपनीतस्याप्यधिकारः नह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात्। ना
भिव्याहारयेद्ब्रह्मस्वधानिनयनादृतेइतिमनुवचनात्। सचकृतचूडस्यैवत्रिवर्षादूर्ध्व
त्वकृतचूडस्यापि। तथाचसुमंतुः। अनुपेतोपिकुर्वीतमंत्रवत्पैतृमेधिकंयद्यसौकृ

त्रि॰टी तदूर्ध्वः स्याद्यदि स्याच्चत्रिवत्सरः इति। यत्तुहरिदीपकलिकायां कृतचूडस्तु कुर्वीत उदकं पिंडमेव च। स्वधा
१३० कारं प्रयुंजीत वेदोच्चारं न कारयेदिति व्याघ्रनाम्ना लिखितं वचनं तदप्यनुस्मृतिविरोधादनादेयं।
यदपि देवयाज्ञिकेनास्य प्रथमवर्षकृतचूडविषयत्वमुक्तं तदपि सुमंतुवचने यद्विसाच्चत्रिवत्स
र इति पृथगुपादानात्सर्वमपि कृतचूडस्य मंत्रवदधिकारावगमादयुक्तं। अथाग्नौ वाग्निदा
नपात्रं समंत्रकं तेन कर्त्तव्यं मंत्रस्याम्नेन। असंस्कृतेन पत्न्या च यदग्निदानं स मंत्रकं। कर्त्तव्यमपि
तरत्सर्वकार्ये स्यादेव हीति कात्यायनवचनात्। यत्तु देवयाज्ञिकेन शक्तेनाप्यनुपनीतेनाग्निदा ताय·
नमेव कर्त्तव्यमित्युक्तं। तत्तु पौरनुपनीतोपि श्राद्धमेकस्तु यः सुतः। पितृयज्ञाहुतिपात्रोज १३०

उपाद्ब्राह्मणस्य सदृशिवहृदनुवचनात्कुंडेष्वधिकारावगमादयुक्तं। एतेनौरसविषयमेवान्य
न्येनुपनीतानामनधिकारिणा इति कालादर्शो। पुत्रः। पौत्रः। पुत्राणां दौहित्राणां गौणमुख्यानां
मभावे स्वकुलजाः पौत्रप्रपौत्रौरस्य सपिंडाः सोदकाश्च जननीवंश्या मातुलास्तु चास्य सपि
डाः सोदकाश्च शिष्यः ऋत्विग्वाचार्यो वा क्रमेण पूर्वपूर्वाभावे उत्तरोत्तरास्त्वेवं सकलशवव
ह्निं कुर्युः। तत्र पुत्राभावे पौत्रस्तदभावे प्रपौत्रः। पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातसंततिः। स
कुल्यसंततिश्चैव क्रियार्हा नृप जायते इति विष्णुपुराणात्। अत्र च पुत्रपदं जात्यभिप्रायेकवच
नांतं गौणमुख्यपुत्रपरं। पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्स्वधामिति कात्यायनवचनात्।

Indira Gandhi National Centre for the Arts

त्रि·टी· नैतत्पौत्रेणकर्त्तव्यंपुत्रवांश्चेत्पितामहइतिकात्यायनवचनाच्च।क्षेत्रजादिपुत्रत्वोक्तेश्चेदमेवप्र
१३१ योजनंयत्पुत्रग्रहणेनतेषामपिग्रहणमिति।तथात्वपौत्रश्चपुत्रिकापुत्रःस्वर्गप्राप्तिकरावुभौ
।रिक्थेचपिंडदानेचसमौतौपरिकीर्त्तिताविति बृहस्पतिवचनंनपौत्रगौणपुत्रयोर्विक
ल्पार्थंकिंत्वधिकारमात्रप्रतिपादनार्थंद्रष्टव्यं।कालादर्शेतुऔरसाभावेपौत्रःप्र
पौत्रश्च।तदभावेक्रमेणपुत्रिकापुत्रक्षेत्रजदत्तककक्रीतकृत्रिमस्वयंदत्तापवि राम·
द्धाइत्युक्तं।पुत्रःपौत्रःप्रपौत्रश्चपुत्रिकासुतएवचेतिचस्मृतिसंग्रहवचनंतत्रप्र १३१
माणत्वेनलिखितं।प्रपौत्राभावेपत्युःपत्नीपत्न्याश्चपतिः।तथाचशंखः।पितुःपु

त्रेणकर्त्तव्याःपिंडदानोदकक्रियाः।पुत्राभावेचपत्नीस्यात्पत्न्यभावेचसोदरः।भार्यापिंडंप
तिर्दद्याद्भर्त्रेभार्यातथैवच।श्वश्र्वादेश्चस्नुषाचैवतदभावेसपिंडकाइति।नभार्यायाःप
तिर्दद्यात्स्नेभार्यातथैवचेतिछंदोगपरिशिष्टंप्रपौत्रपर्यंतसद्भावविषयं।सर्वाभावेस्त्रि
यः।कुर्युःस्वभर्तॄणाममंत्रकमितिमार्कंडेयपुराणंकुलद्वयेऽपिचोत्सन्नेस्त्रीभिःका
र्याक्रियानृपेतिविष्णुपुराणंचासुरादिविवाहोढाविषयं।स्त्रीग्रहणात्।तथाचशा
तातपः।धर्म्यविवाहेरूढायासापत्नीपरिकीर्त्तिता।सहाधिकारिणीश्रौबापगदे
धर्मकर्माणि।क्रयक्रीतातुयानारीसानपत्न्यभिधीयते।नसादैवेनसापित्र्येदासीतां

Indira Gandhi National Centre for the Arts

त्रि॰टी॰ पुनर्यो अगुणीति। असवर्णाविषयमिति शूलपाणिः। अत्र च पदपिण्डपुत्रादाय नं भर्तुः
१३२ पालयंतीव्रते स्थिता। पत्नेव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेति हद्दमनुवचने सह निर्देशा
द्विभक्तासंसृष्टस्य पत्नीन द्युनयहणाधिकारात्।। अविभक्तसंसृष्टस्य तु सोदरस्तत्सुता
दभावादिति प्रतीयते तथापि वचनात्सर्वत्रौर्ध्वदेहिकाद्यधिकारिणी भार्यैवा एक
योगनिर्दिष्टयोरपि वचनांतरवशाद्भिन्नभिन्नविषयत्वे न दोषः। यच्चार्थहरः सपिंडदा
यीतितत्सर्गः दुहित्रादिसत्वे पुत्रादीनां मात्रधनग्रहणाधिकाराभावे पितृदौर्ध्वदेहिका रामः
राद्यधिकारात्। सर्वसंबंधाभावे यं ग्राहिणोधिकारज्ञापकं वा। कालादर्शेतु पूर्वोक्ता १३२

प्रपितृपर्यंतपुत्राभावे पत्नी तदभावे गूढजकानीनपौनर्भवे सहोढादयः प्रक्तं। कानीनगूढस
हजपुनर्भूतनयाश्चये। पत्न्यभावे तु कर्त्तारस्ते अप्रशस्तायतः स्मृता इति स्मृतिसंग्रहवचने च
तत्र प्रमाणत्वेनोक्तं। आशास्य च स्मृतौ विष्णुना। अप्रशस्तास्तु कानीनगूढोत्पन्नस
होढजाः। पौनर्भवश्च नैवैते पिंडार्हाः कांशभागिन इति। मूलस्मृतिसंग्रहविरुद्धकमा
भिधानं च न च वचनांतरवलात्पक्षे पौनर्भवादीनां क्रमनिर्देशात्प्रतीयमानमपक्षवधा
नमात्रं वा धर्मपौर्वापर्यं तु योगीश्वरो क्रमेव व्याख्यामित्यभिप्रायेण। पत्न्यभावे पुत्राभावे तु
पत्नी स्यात्तदभावे सहोदर इत्यादिवचने भ्रातुरधिकारः प्रतीयते। पुत्रेषु विद्यमानेषु ना

Indira Gandhi National Centre for the Arts

संवेकारयेत्स्वधां। अपुत्रस्य तु या पुत्री सापि पिंडप्रदा भवेदित्यादिवचनैश्च दुहितुः अ
कृता वा कृता वा पिंडविधेस्सदृशान्नतं पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमित्यादि
भिश्च दौहित्रस्यानंतरं व्यवस्था। विभक्तासंसृष्टस्य पत्न्यभावे दुहिता पुत्रेष्विष्याद्यष्टा
ष्टांगवचनात्। तद्धनग्रहणे तस्या एवाधिकारात्। तथा च बृहस्पतिः। भर्तुर्धनहरा पत्नी
तां विना दुहिता स्मृता। अंगादंगात्संभवति पुत्रवद्दुहिता नृणां। तस्मात्पितृधनं त्वन्यः क राम
थं गृह्णीत मानव इति। धनग्रहणस्य चोपकारार्थत्वात्। यश्चार्थहरः स पिंडदायी त १९२
स्य च विरोधे व्यवस्थापनमपि प्रयोजनं संभवत्येवाधनग्रहणं च यद्यप्यनूढायास्तथापि

तथापि पिंडदानादौ संस्कृतैवाधिकारिणी। दुहिता पुत्रवत्कुर्यान्मातापित्रोस्तु संस्कृ
ता। आशौचमुदकं पिंडमेकोद्दिष्टं सदा तयोरिति भरद्वाजस्मरणात्। तस्यैव दुहित्र
भावे दौहित्रः। तदभावे तस्यैव तद्धनग्रहणेऽधिकारात्। अकृता वेत्यादिमनुवचने
अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः। पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रकाम
ना इति विष्णुवचने च तेन सह निर्देशात्। तस्यैव दौहित्राभावे भ्राता। पत्नी दुहितरश्चै
व पितरौ भ्रातरस्तथेत्यत्र चशब्दोक्तदौहित्रानंतरं तस्य तद्धनग्रहणाधिकारप्रतिपा
दनात्। स्मृतिसंग्रहे पदं स्पष्टमुक्तं। सुतः कुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ। धन

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ १२४

दार्थश्चेद्दौहित्रस्ततो भ्रातास्य तत्सुत इति। पत्नी चेति चशब्दाद्दुहिता। अविभक्तसंसृष्ट
।स्येतु पत्न्यभावे भ्रातैव तत्र पत्न्यभावे तु सोदर इत्यादिक्रमोक्तौ प्रकृतेनेर प्रसक्तत्वात्। आ
दित्यपुराणेपि। भ्रातुर्भ्रातास्वयं कुर्यात् द्भार्या चेन्न विद्यते। तस्य भ्रातसुतः कुर्याद
सत्याप्तिसहोदर इति। तत्र सोदरासोदरसमवाये सोदर एव। संनिकर्षात्। तत्रापि ज्ये
ष्ठकनिष्ठसमवाये कनिष्ठः। नानुजस्य तथाग्रज इति छंदोगपरिशिष्टस्य भ्रातृत्वाद
विशेषेणाधिकारप्राप्तौ कनिष्ठसद्भावे ज्येष्ठस्य तन्निषेधकत्वात्। तत्समभिव्याहृतस्य
नयोषित:पतिर्दद्यात् न पुत्रस्य पिता कुर्यादित्यस्य वचनोत्तरविरोधापाधिकार्यंतरा राम १२४

प१ भावविषयत्वात्। कनिष्ठवक्रत्वे प्रथमं मृतानंतरः। तदभावे तदनंतरः। संनिकर्षात्। कनि
ष्ठाभावे ज्येष्ठः। भ्रातृत्वान्निषेधाप्रवृत्तेश्च। यदि स्नेहेन कुर्यात्तां सपिंडीकरणं विना। गया
यां तु विशेषेण ज्यायानपि समाचरेदिति छंदोगपरिशिष्टाच्च। ज्येष्ठवक्रत्वे च मृतानंतर
क्रमेण। सोदराभावे भिन्नोदरः एवं वह्वा तस्यापि भ्रातृत्वात्। केचित्तु दौहित्रदौहित्रयोर्भि
न्नगोत्रत्वान्न कदाचित्सगोत्रापश्चाद्दुकार्यमगोत्रेजेरिति च सगोत्रसद्भावे भिन्नगोत्र
स्य भ्रातुर्द्वाघनधिकारोक्तेर्विभक्तासंसृष्टस्यापि भ्रातैव कुर्यादिति निवर्हितं। तदभावे भ्रात
पुत्रः। भ्राता वा भ्रातृसंततिरिति विष्णुपुराणात्। आदित्यपुराणे सहोदरग्रहणं भ्रातृमा

Indira Gandhi National
Centre for the Arts

३३

त्रि॰टी॰ त्रोपलक्षणांश्र्वसामान्ये नोक्तेः। सोदरासोदरभ्रातृपुत्रादिसमवाये पूर्ववत्। भ्रातृपुत्राभा पिंते
वे पिता। पुत्रो भ्राता पिता वापीति प्रचेतःस्मरणात्। दत्तानामथ दत्तानां कन्यानां कुरुतेति ब्र
१२५ ह्मपुराणाच्च। तदभावे माता धनग्रहणेऽपि तरावितिनिर्देशात्। असमासप्रतस्यापि कर्तव्यं
ब्रह्मचारिणः। आद्वादिमातापितृभ्यो निर्नतु तेषां करोति स्मृतिशास्त्राच्च। नच माता नच पि
ता कुर्यात्पुत्रस्यैव तु कपितृकान्यापि नवचनं तु भ्रातृपुत्रपर्यंतसद्भावे द्रष्टव्यं। पात्रभा
वे श्वशुरयोः स्नुषा। श्वश्रूश्वशुरौ स्नुषायाश्चैव तदभावे सपिंडका इति शंखवचनात्। स्नुषा राम
भावे भगिनी। तत्रानुजाग्रजासोदरासोदरासमवाये भ्रातृवत्। तदभावे तत्पुत्रः। समवा १२५

ये तद्वदेव। तथा च कात्यायनः। अनुजा वाग्रजा वापि भ्रातुः कुर्वीत संस्क्रियां। ततस्त्व
सोदरा तद्वत्क्रमेण तनयस्तयोरिति। स्मृतिसंग्रहेऽपि। पत्नी भ्राता च तज्जश्च पिता मा
ता स्नुषा तथा। भगिनी भागिनेयश्च सपिंडः सोदकस्तथा। असंनिधाने पूर्वेषामुत्त
रे पिंडदाः स्मृताः इति तदभावे पितृव्यतत्पुत्रादयः सपिंडाः प्रत्यासत्तिक्रमेण। तदभा
वे सोदकास्तथैव। तदभावे मातामहमातुलतत्पुत्रादयो मातृसपिंडाः प्रत्यासत्तिक्रमे
ण। तदभावे तत्सोदकास्तथैव। तथा च विष्णुपुराणे। पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रा
तृसंततिः। सपिंडसंततिश्चैव क्रियार्हा नृप जायते। एषामभावे सर्वेषां समानोदक



Indira Gandhi National Centre for the Arts

त्रि॰टी॰ संततिः। पातपक्षस्य पिंडेन संबद्धा ये जलेन वेति। तदभावे त्रिविधा बांधवाः। गोत्रजानंत
१२६ रं शिष्यादिभ्यः पूर्वं तेषां धनग्रहणाधिकारश्रुतिपाठनात्। तत्रापि प्रत्यासत्तेः प्रथमं स्वबं
धवः पश्चात्पितृबंधवः पश्चान्मातृबंधव इति क्रमः। तदभावे स्त्री। तत्रापि प्रथममासु
रादिविवाहोढा सवर्णा। तदभावे परिणीता। सवर्णा। तदभावे वरूढापि शूद्रा। स्वातिरिक्ते
तिक्रमः। तथा च तंत्रे च। कुलद्वयेपि चोत्सन्ने स्त्रीभिः कार्याः क्रिया नृप इति। कुलद्वयप
देन च बांधवा अपि गृह्यंते। तेषामपि तत्संबंधात्। तदभावे गुरोः शिष्यः। तदभावे यजमानस्य राम
ऋत्विक्। तदभावे शिष्यस्याचार्यः। स ब्रह्मचारी वा। पुत्राभावे सपिंडा मातृसपिंडाः शि १२६

ष्या श्च एकस्तदभावे ऋत्विगाचार्यावि ति गौतमवचनात्। शिष्यानंतरं सब्रह्मचारिणो धनग्र
हीतृत्वोक्तेश्च। तत्र च पुरोहितो नामं त्री भृत्य श्च क्रमेण। मृतेराज्ञः सपिंडेपि निरपत्ये पुरोहितः।
मंत्री वा तदशौचं गती त्वा पश्चात्करोति संस्तिः ब्रह्मपुराणात्। प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं
प्रयत्नतः। ज्ञातिबंधुसुहृच्छिष्यैर्ऋत्विग्भृत्य पुरोहितैरिति बृहस्पतिवचनाच्च। तदभावे जामा
ता श्वशुरस्य श्वशुरश्च जामातुः तदभावे सखा सखा। तथा च मार्कंडेयपुराणे। सख्युरंत्य
त्रबंधोश्च सखा पि श्वशुरस्य च। जामाता स्नेहतः कुर्यादखिलं पैतृमेधिकमिति। अत्रेपिंजा
माता च स्नेहतः कुर्यादखिलं पैतृमेधिकमिति। यद्यपि च मार्कंडेयपुराणे सख्युः पश्चाज्जामा
मातुः श्वशुरश्च कैतेषां नैवापि संघता इति।

त्रि॰टी
१२७

तानिर्दिष्टस्तथापितस्याधिकारमात्रप्रतिपादनपरत्वात्संबंधविशेषाज्ञानमात्रेरेवप्राथम्यंयु
क्तमित्यपिप्रायेणकालादर्शेतथोक्तं।तदभावेसंघातांतर्गताःप्रत्यासत्तिविशेषक्रमेण
।संघातांतर्गतैर्वापिकार्याप्रेतस्यसत्क्रियेतिविष्णुपुराणात्।तदभावेब्राह्मणधनग्रहणेरा
ज्ञोधिकाराभावाद्ब्राह्मणस्यधनग्राहीयःकश्चिद्ब्राह्मणः।यश्चार्थहरःसपिंडदायीतिविष्णू
क्तेः।ब्राह्मणव्यतिरिक्तानांतुराजाधनंगृहीत्वातेनधनेनान्येनकारयेत्।तस्यचबंधुरिक्ताहा राम॰
कार्येरवनीपतिरितिविष्णुपुराणात्।एतस्यचब्राह्मणव्यतिरिक्तविषयत्वंतत्रैवराज्ञावाध १२७
नहारिणाक्रियाकर्तव्यतेराज्ञाब्राह्मणधनग्रहणानधिकारात्।पुमर्जुणावासंनिहिताधिका

र्यभावेधर्मपुत्रःकार्यःसचतस्यमतस्यसर्वंकुर्यात्।अपुत्रेणसुतःकार्योयादृक्तादृक्प्रयत्न
तः।पिंडोदकक्रियाहेतोर्नामसंकीर्तनायचेतिवचनात्।अत्रचापुत्रग्रहणंसंनिहिताधिका
रिमात्राभावपरं।पिंडोदकक्रियाहेतोरित्युक्तत्वात्।स्त्रीश्राद्धेत्वधिकारिक्रमेविशेषः।अ
नूढायाःपितातदभावेभ्रात्रादिः।ऊढायास्त्वौरसः।पुत्रिकापुत्राभावेसपत्नीपुत्रःतदभावेक्षे
त्रजाद्याःप्रपौत्रांताःतदभावेपतिःतदभावेदुहितृदौहित्रौ।पुंवत्।तदभावेपत्न्याभ्रातातदभावे
तत्पुत्रःतदभावेस्नुषा।तदभावेपितृमातृभ्रातृतत्पुत्रादयःपूर्वोक्ताःविवाहेनतस्याःपितृगोत्र
हानेनपतिगोत्राप्तेःनकदाचित्सगोत्रायश्राद्धंकार्यमगोत्रजैरितिचनिषेधादिति।एतेषुबाधि

त्रि·टी· कारिणुकेषां किमावश्यकं कर्त्तव्यमित्यपेक्षायां विष्णुपुराणेऽभिहितं। पूर्वाः क्रिया मध्यमाश्च त
१२८ थान्यैवोत्तराः क्रियाः। त्रिप्रकाराः क्रिया ह्येताः तासां तां भेदान् शृणुष्व मे। आदाहाद्वार्यायु
धादिस्पर्शाद्यंताश्च याः क्रियाः। ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः। प्रेते पितृत्वमा
पन्ने सपिंडीकरणादनु। क्रियंते याः क्रियाः पित्र्याः प्रोच्यंते ता नृपोत्तराः। पितृमातृसपिंडैस्तु
समानसलिलैस्तथा। संघातांतर्गतैर्वापि राज्ञा वा धनहारिणा। पूर्वाः क्रियास्तु कर्त्तव्याः पुत्रा
द्यैरेव चोत्तराः। दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा। मृताहनि च कर्त्तव्याः स्त्रीणामप्युत्तराः राम·
क्रियाः। प्रतिसंवत्सरं राजन्नेकोद्दिष्टविधानतः इति। अस्यार्थः। जेलादिस्पर्शादेराशौचांत्यदि १२९

नेविहितत्वाद्दाहमारभ्याशौचमध्यकर्त्तव्याः क्रियाः पूर्वाः। एकादशाहकृत्यमारभ्य सपिंडी
करणपर्यंता मध्यमाः। तदूर्ध्वाः सांवत्सरिकाद्या उत्तराः। तत्र सपिंडादिभिरपि नृपांतैः पू
र्वाः क्रियाः कार्या एव उत्तरास्तु न कर्त्तव्याः। मध्यमासु तु नियमः पुत्राद्यैर्भ्रातृसंतत्यंतैः
दौहित्रतत्तनयैश्चोत्तराः अवश्यं कर्त्तव्याः। मातादीनां पूर्वमध्यमावत्सर्वोत्तराः क्रिया या
प्योपरि संख्या प्रतिसंवत्सरं मृताहन्येव स्त्रीणामप्युत्तराः क्रियाः कार्याः। न तु दर्शादौ तत्र तु प
साद्यं शभागित्वमेव तासां। तत्र चैकोद्दिष्टविधानत इति पाक्षिके कोद्दिष्टानुवादः। इत्थं वृद्धा
त्वष्टकादिरप्यपलक्षणं। तत्रापि स्त्रीणां पृथक्छ्राद्धविधानात्। नयोषिद्भ्यः पृथग्दद्याद्

Indira Gandhi National
Centre for the Arts

त्रि॰टी वसानदिनादृते। स्वभर्तृपिंडमात्राभ्यस्तृप्तिरासांपतस्मृता। तेनिपरिशिष्टवत्। सर्वमध्यमा
१२९ स्तुपृथक्कृभवंत्येव। अत्रचराजअतिरिक्तानांतदीयधनाभावेपिस्वद्रव्येणार्थवृत्ति
यास्वाधिकारः। राज्ञस्तुतदीयधनस्तत्वएव। राज्ञावाधनहारिणोस्तुक्तत्वात्। सर्वाभावे
थ ४ तुनृपतिःकारयेत्तस्यक्रियांइतिमार्कंडेयपुराणात्। स्वयंतदीयधनग्रहणेतुसपिंडा
दीनामपिनृपांतानांमध्येमोलराज्ञ्यावश्यकाः। तथाचस्कंदपुराणे। मलमेतन्म
नुष्याणांद्रविणंयत्प्रकीर्तितं। तद्गृह्णन्मलमादत्ते। ज्ञातिनांज्ञातिनामपि। अग्निभि राम॰
स्तस्यनिर्दिष्टानिष्कृतिःपावनीपरा। आरोहपतनात्तापात्पिंडदानोदकक्रियाः। इति। १२९

पुत्रपौत्रप्रपौत्रपत्नीभ्रातृतत्सुतमातापितृदौहित्रसकुल्याशिष्याणांतुतदीयधनाभा
वेपितत्क्रियापर्यंतमावश्यकं। पुत्राभावेचतत्सुतः पत्नीमातातथापिता। विता
भावेचसच्छिष्यःकुर्यात्तस्यौर्ध्वदैहिकमितिमार्कंडेयपुराणात्। अतस्त्वोपियथा
पुत्रःपितुःकुर्यात्क्रियांतथा। तथामातामहस्यापिदौहित्रःकर्तुमर्हतीतिभविष्यत्पु
राणाच्च। स्त्रीणामप्येवमेवपूर्वोदितक्रियाभेदेनाधिकारिव्यवस्था। सपिंडीकरणंतुता
सांपुत्राभावेनभवतीत्युक्तंमार्कंडेयपुराणे। स्त्रीणामप्येवमेवतरेकोदिष्टमुदाहृ
तं। सपिंडीकरणंतासांपुत्राभावेनविद्यतइति। हारीतोपि। पुत्रेणैवतुकर्तव्यंसपि

Indira Gandhi National Centre for the Arts

त्रि॰टि॰ ड्डीकरणं स्त्रियाः। पुरुषस्य पुनः पत्न्या भ्रातृपुत्रादयोऽपि इति। पुत्रग्रहणं पत्न्यः फल
१२० श्रुतं। अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनं। श्वश्र्वादिभिः सहैवास्याः सपिंडीकर
णं भवेदिति पैठीनसिवचनात्। सपिंडीकरणाभावे च पितृत्वाभावादपि पुत्राणां सगो
त्रक्रियालोपप्रसक्तेः पितृत्वाभावेऽपि एकोद्दिष्टविधिना सांवत्सरिकं कार्यमित्युक्तं
मार्कंडेयपुराणे प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः। मृताहनि यथान्यायं सपि अत्रशोधपत्र
ण्डीनां तु पुत्राद्यभावे सन्निधाने वा मध्यमास्त्वियमः इत्यलमित्यधिकारे बहुविचारणी एम॰
यमपि विस्तरभयादुपरम्यते २२ आना। थात्। नामकरणकालादाशौचोत्तरदिनादाग १२०

शौचदिनमध्ये इति [redacted] यावत्। उपनेत्वा लेखननैरवानस्त्वन्मात्रं कर्तव्यं न
जलकुंभवहोदाताद्यौ। जलादिग्रहणं पिंडदानादेरप्युपलक्षणं वस्त्वर्थः। नामत्व वर्षत्रयं
चतुर्थावतावत्सर्वमितृतीयवर्षपूर्तिरिति यावत्। अनयोरंतर्मध्ये आशौचोत्तरदिनादारभ्य
तृतीयवर्षसमाप्तिपर्यंतं तु उपरते जलकुंभवहो कामं पाक्षिकत्वेन दातव्यो न तु पूर्ववत्
प्रयोनिषेधः। जलादिग्रहणस्योपलक्षणत्वात्पिंडादिकमपि। तच्च कल्पकृद्भिरित्यादि
सर्वं पूर्वमुक्तं। वर्षत्रयादूर्ध्वं तु उपनीतस्य सहैव पनइत्यादिपक्षाश्रयणादचौलकोऽप्युपरते
जलकुंभहोमित्योदातव्यो भवतः। चौलयुक्तेतृपरते कालाविशेषादूर्ध्वं त्रयमध्येऽपि नित्यो

Indira Gandhi National Centre for the Arts

त्रि॰टी॰ भवतः। तथा च मनुः। नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया। जातदंतस्य वा कुर्युर्नाम्नि
१३१ वापि कृते सतीति। लौगाक्षिरपि। तस्मै एवोदकं कुर्यात्तस्मै संस्कारमेव च। सर्वेषां कृतचूडा
नामन्यत्रापीच्छया द्वयमिति। अत्र चोनद्विवर्षनिखनने इत्यनेन सामान्यप्राप्तदाहापवादत्वे
नोनद्विवर्षस्य निखनने विहिते तृतीयवर्षमा[redacted]स्य दाहस्यैव प्राप्तौ तृतीयेपि वर्षे
मनुवचनेन वैकल्पिकेन निषेधद्वारा निखनने विहिते तद्धर्ममकृतचूडस्यापि सामान्यप्रा
प्तो दाह एव भवति। लौगाक्षिवचनेन च सर्वग्रहणादूनद्विवर्षस्यापि कृतचूडस्य निखननबाधे राम॰
न दाह एव भवति। यत्तु प्राच्यैरत्रिवर्षस्याप्रविष्टतृतीयवर्षस्येत्यर्थमंगीकारेणोनद्विवर्ष १३१

विषयत्वमेव नात्रिवर्षस्येत्यादेरुक्तं तदयुक्तं। अनुशासनात्प्रयोगाच्च। भूतत्रिवर्षस्येव त्रिवर्ष
पदात्प्रतीतेः। नास्य कार्योग्निसंस्कारो नापि कार्योदकक्रियेत्यनेनैवोनद्विवर्षस्य दाहादिनिषे
धादानर्थक्यप्रसंगाच्च। अनेनैवाधिकप्राप्तेरुक्तं मेधातिथिना। अतः तृतीयाद्वर्षादर्वाक्प्रतिषे
धार्थ इति। न च तथापि सर्वनिषेधानर्थक्यमपि इति वाच्यं। ऊनद्विवर्षस्य तदितरस्य च सत्यपि पक्ष
द्वये ऊनद्विवर्षस्य निखननपक्षो मुख्यः। तदितरस्य च दाहपक्षो मुख्य इति मुख्यानुकल्प
त्ववैषम्यद्योतनार्थत्वात्। अत एव यद्यपि मूले नामवर्षत्रयांतः कामपि इति विकल्पमात्रमु
क्तं तथापीदृशं मुख्यानुकल्पत्वविभागेन द्रष्टव्यं तुल्यवद्विकल्पे क्लेशाधिक्येन वोनद्वि

Indira Gandhi National Centre for the Arts

त्रि.टी नर्षस्यापिदाहस्येष्टत्वेसर्वस्मृतिषुनिखननविधानादूनद्विवर्षग्रहणवैयर्थ्यापत्तेः।अ
१२२ स्मत्पुराणेचस्पष्टमेवोनद्विवर्षदाहस्यानुकल्पत्वमुक्तं।अनतीतद्विवर्षस्तुप्रेतोयत्रापि
दह्यते।अतिमोहाभिभूतैस्तुदेशस्याधर्ममार्दवात्।आशौचंब्राह्मणानांतुत्रिरात्रंतत्रवि
द्यतइति।अत्रवचमानवेपिज्ञातदंतस्यवाकुर्युर्नोग्निवापिकृतेसतीतिप्रतिप्रसवविधि
द्वयंज्ञातदंतस्यदाहोनुकल्पःस्मृतत्वात्त्वस्यतानुकल्पइतिद्योतनार्थत्वेनसार्थकं।अ ना
न्यथाज्ञातदंतस्यतेत्यस्यानर्थक्यात्।यत्तुसर्वत्तेनस्त्रीपुंविषयत्वंप्रतिप्रसवद्वयस्योक्तं राम.
तन्मानाभावात्सुलिंगविरोधाच्चोपेक्ष्यं।तस्मान्निखननविधौदाहादिनिषेधेचोनद्वि १२२

र्षग्रहणस्यनात्रिवर्षस्येत्यतद्वचनबलात्प्रयोजनांतरार्थत्वात्पूर्णद्विवर्षस्यापितृतीयव
र्षसमाप्तिपर्यंतंनिखननपक्षोस्त्येवेत्यभिप्रेत्यनामवर्षत्रयांतरित्युक्तं।एकाहाशौचवि
१२३ धावप्यूनद्विवर्षइत्यविशेषेणत्रिभिर्वर्षैरित्येतद्वचनविरोधात्त्वविशेषकंकिंतुपूर्वोक्त
प्रयोजनार्थमेवेत्युक्तंतृतीयश्लोके।अथाप्रेतापितृपुरुषाःपिशाचाःमनेपुन्नादिस्ना
पयित्वाञ्जवरस्रग्गंधैराच्छाद्यपत्तुगंधिचूर्णादिभिश्चशोभयित्वादेहशुद्धिविशेषः।पु
त्राणांमुख्याधिकारित्वाद्दाहस्यायांचतत्संभवात्तुत्रप्रवराइतिवाच्येपितृग्रहणंबाला
पक्रमाद्युत्तरत्रचतत्संभवात्।तथाचयमः।प्रेतंदहेच्छुभैर्गंधैःस्नापितंस्रग्विभूषितमिति।

Indira Gandhi National Centre for the Arts

त्रि॰टी प्रचेता अपि। स्नानं प्रेतस्य पुत्राद्यैर्वस्त्राद्यैः खननं ततः। नग्नदेहं दहेन्नैव किंचिद्देयं परित्यजे
१२३ दिति। किंचिद्देयमिति शववस्त्रैकदेशं श्मशानवास्यर्थं देयं परित्यजेदित्यर्थः। ब्रह्मपुरा
णेपि। दरिद्रोपि न दग्धव्यो नग्नः कस्यांचिदापदि। केनापि वस्त्रखंडेन छादितव्यः प्रयत्नतः
। यत्र त्वचमवेदुःखी यदि नग्नस्तु दह्यते। निःशेषस्तु न दग्धव्यः शेषं किंचित्त्यजेत्ततः। इति न
तः शवक्षालनवस्त्रादिनमनस्य वेदाहोरात्रौ न कार्यः। तथा च निगमः। संध्यायां वा न
ध्यारात्रौ दाहः पाथेयकर्म च। नवश्राद्धं च नो कुर्यात्कृतं निःफलतां व्रजेदिति। रात्रिमृत राम॰
स्य तावेव दाहादि वपनं तु प्रातः। तदुक्तं स्मृतिसंग्रहे। रात्रौ दग्ध्वा तु पिंडांतं कृत्वा वपनव १२३

र्जितं। वपनं नेष्यते रात्रौ श्वस्तना वपनक्रियेति। अथ ॥ क्षिया॥ खननं योग्यं यस्य खननं
करिष्यते तं आज्येन विलिप्य पितृमुखरा निखनेत् पुरीति शेषः। तथा च यमः। ऊनद्विवार्षि
कं प्रेतं घृताक्तं निखनेद्भुवि। यमगाथां गायमानो यमसूक्तमनुस्मरन्निति। गाथासूक्त
जपस्तु यमसूक्तेन यमगाथा जपेद्द्विजो लौकिकाग्निना। स दग्धव्य उपेतश्चेदाहिताग्न्या
वृतार्थवदिति दाहयोग्येपि विधानात्खननं योग्यमात्रविषयत्वाभावान्मूलेनो
क्तः। यद्यपि च घृततैलसमायुक्तं कृत्वा वै देहशोधनं। तेनाभ्युक्ष्य गृहं ज्ञाप्यते येन
येन खननमिति वराहपुराणे दाहस्यापि घृतसाध्या क्रियाविहिता तथापि तत्र घृ

Indira Gandhi National
Centre for the Arts

त्रि·टी तस्यनिरपेक्षसाधनत्वाभावाद्विलेपनाभावाच्च घृतविलेपनस्य निरवनयोग्यमात्रवि
१२४ षयत्वात्तत्रतदुक्तं २३ प्रसु। याम:। अवनिसुं ब्राह्मणं प्रेतं नगर्याः प्रत्यग्द्वारात्पश्चिम
द्वारेण क्षत्रियं तु तोरणनगर्या द्वारेण वैश्यं प्राग्द्वारेण वृषलं च पितृदिशि दक्षिणस्यां
द्वारेण पुत्रादिभिर्नाययित्वा बहिर्निःसार्य सर्वसपिंडसगोत्रा वर्षीयः सर्वहृद्दतमहृद्द
नरहृद्वास्क्रमेणोनद्विवर्षातिरिक्तं प्रेतं नियमेनानुयायुरनुगच्छेयुः। ऊनद्विवारर इत्र
दृणद्विवर्षस्य तत्परतो अनुयाने नियामो नियमोवश्यकर्तव्यता नास्ति प्रेतान्स्पृश्य वा याम·
मनायां कर्तव्यं अकरणे प्रत्यवायो नास्ति। प्राग्द्वारेणेति समस्तमपि द्वारपदं तु भ्यानिष्ठ १२५

व्यान्तरेण पितृदिशीत्यत्र च संबंधनीयं। तथा च मनुः। दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्ह
रेत्। पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजातयः इत्यत्र च यथायोगमित्यनेनोक्तस्य क्र
मस्यानुलोमप्रतिलोमविशेषापेक्षायामुपस्थितिक्रमनिबंधनस्यानुलोमक्रमस्यै
वौत्सर्गिकत्वात्सर्वाधोपस्थितमत्रैणाचाव्यवधानाद्वैश्यस्य च वर्णावधित्वसादृश्याद
न्त्यावधिभूतेन शूद्रावधिभूतब्राह्मणस्यापि प्रथमोपस्थितिसंभवेन शूद्रोपक्रमस्य प्र
तिलोमक्रमनियामकत्वाद्ब्राह्मणादिक्रमेणैव पश्चिमाद्यन्वयाभिप्रेतमूलतया
कं। विशेषानुक्तेर्विज्ञानेश्वरस्यापीदमेवाभिमतं लक्ष्यते। मेधातिथिप्रभृतयस्तु शूद्रो



Indira Gandhi National Centre for the Arts

त्रि॰टी॰ क्रमेणाभिधानादुद्देश्यस्यैव प्रथमोपस्थितत्वादन्यथाप्युद्देशोपक्रमाभिधानस्य निरभिप्रा
१२५ यत्वापत्तेर्मंगलत्वेन तदभिधाने चापि प्रातिलोम्यस्यैव युक्तत्वादुद्देश्यादिक्रमेण पाश्चिमा
घन्वयमाह ॥ देवदासप्रकाशोत्तु प्रागुदक्पश्चिमद्वारैरिति पाठः ॥ तदा प्रतिलोमान्वयेऽपि
मूलाविरोधः ॥ पुरनगरीग्रहणं च संभवद्द्वारग्राममात्रोपलक्षणं । यत्र तु द्वाराभावस्तत्रादि
ष्टात्र नियमः ॥ संभवतस्त्याग्यायोगात् । यत्र त्वेकद्वारता तत्रासंभवात्क्रमोपि हसीतेनवि
शेषांतरस्यप्यक्तं । नग्रामाभिमुखं प्रेतं हरेयुरिति ॥ जीवतश्च नयनेन दिग्गादिनियमः ॥ मृत राम॰
ग्रहणात् ॥ याज्ञवल्क्यः ॥ ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ॥ आश्मशानादनुव्रज्य १२५

इतरो ज्ञातिभिर्वृत इति ॥ तत ऊनद्विवर्षादितरोनुव्रज्य इति नियमादूनद्विवर्षस्यानियमः ॥ आश्व
लायनः ॥ अन्वंचो मात्याः अधोनिवीताः प्रवृत्तशिखा ज्येष्ठप्रथमाः कनिष्ठजघन्या इति ॥ ग
ह्येषु रितिशेषः ॥ अधः कृतं निवीतमुपरि वस्त्रमुपवीतं वा येस्ता दृशाः ॥ प्रवृत्तशिखा मुक्तशि
खाः ॥ यो यो ज्येष्ठः स पुरतो गच्छेद्यो यः कनिष्ठः स पश्चादित्यानुपूर्व्यो सिद्ध्यर्थमुभयवचनं ॥ इत
रथा सर्वज्येष्ठमात्रप्राथम्यं स्यात् ॥ निर्हरणं सर्वकृत्यं निर्हरणप्रकारश्च वाराहपुराणोक्तस्व
स्वसूत्रेषु च द्रष्टव्यः ॥ स्मृत्यैः ॥ युक्तिः ॥ मृतं हन्ते वर्णिकः शूद्रैः स शोधयेद्वापि रिभवतिन दान
स्य प्रेतभावात् ॥ क्षुत्तृष्णोपजनितास्य तदुःखानुभवावस्थानो मुक्तिर्न भवतीत्यर्थवादः ॥ ते

Indira Gandhi National
Centre for the Arts

मि॰टी॰ शूद्रस्पर्शानिर्दिष्टं प्रायश्चित्तं कर्तव्यमित्यर्थः। तथा च मनुः। न विप्रं स्वेषु तिष्ठत्सु मृ
१२६ तं शूद्रेण हारयेत्। अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषितेति। अत्र स्वेषु तिष्ठत्स्वित्यनेन तु
असत्स्वपि तेष्वादिदोषस्मरणात्। विप्रग्रहणं च द्विजोपलक्षणं। तथा च विष्णुः। मृतं द्विजं न शूद्रेण
हारयेन्न शूद्रं द्विजेनेति। स्थापयंत्यन्नपि प्रेतमेकाग्निं च कारादिषु। शिबिकायां विमाने वा प्रवे
नो वचनादिहेति शिबिकादिनापि वहनविधानात् न स च साक्षात्स्पर्शं विनापि संभवाद्वहनस्य
पृथगुक्तिः। तेन साक्षात्संस्पर्शासाक्षात्स्पर्शयोः दोषत्वमुक्तं भवति। प्रायश्चित्तं चात्र शूद्रसं याज॰
स्पा॰ स्पर्शदूषितेतित्यस्पर्शदोषस्येव द्वेतुल्याभिधानात्तदेव नयनमेवात्र च सूतिकायामपि ता १२६

यां तु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमादाय पंचगव्यं तथैव च। पुण्याभिर्मंत्र आपो वा वाग्बुद्धिं र॰लि॰१
लभेत्ततः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधीति सूतिकामरणोक्तप्रकारेणैव। इदमेवा
भिधायोदक्यासूतिकावापि यदि प्रेतं स्पृशंति हि। तस्मैव विधि[illegible]रादिष्टो वा स्वेनापि महात्मने
ति गृह्यकारिकायामभिधानात्। यद्यपि चात्र शूद्रग्रहणं नास्ति तथापि तस्याप्यस्पृश्यत्वात्त
त्स्पर्शे पीदमेव द्रष्टव्यं। शूद्रेण द्विजदाहे तु शूद्रेण दग्धो यो विप्रो न लभेत्स्वर्गतिं। प्राय
श्चित्तं प्रकुर्वीत बांधवः पापशुद्धये। चांद्रायणं पराकं च प्राजापत्यं विशोधनं। विप्रेभ्यो दक्षिणां
दद्यात्ततः स्यादौर्ध्वदेहिकमिति जाबालस्मृतेर्द्रष्टव्यं। और्ध्वदेहिकं च पंचगव्यप्रक्षालितानां

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ मस्थ्यां पलाशहृतानां वा दाहमारभ्य सर्वं दूषणं। अस्पृश्यस्पर्शस्य मरणेनुकर्षो ज्ञिप्त भवे
१३७ द्विशेषभयोक्तिस्तेनत्थेवच। अस्पृश्यस्पर्शनि चैव कन्तरात लमनोनया। खड्गपामरणे चैवत_
यानिगडवंधने। सप्तस्वेतेषु कृच्छ्रास्त्रीन्षट्न वद्वादशक्रमात। पंचदशक्रमेणैव यथासंख्य
प्रकल्पयेदिति गृह्यकारिकोक्तं दृष्टव्यं। यथासंख्यं प्रकल्पयेदिति पंचसु क्रमेव द्वयोरष्टा
दशैकविंशतिं च कल्पयेदित्यर्थः॥ रजकाद्यस्पृश्यस्पृष्टमरणे विशेषस्तत्रैव। समांत्यस्पृष्टो
परमेपरिदेवात कथंचन। एवं त्रिंशताकृच्छ्रैस्तत्र शुद्धिरुक्ता मनीषिभिरिति शारे धर्दग्धेवि सप॰
नेत्स्पृश्यस्पर्शेपि नैव। कुणपेत्व धदग्धे चैविता स्पृष्टान्यजादिभिः। नत्स्पर्शजं दूषणं च त्रि १३७

---

भिः कृच्छ्रैर्विशुध्यतीति। अन्यानि चतुर्मरणप्रायश्चित्तानि स्मृतिकौस्तुभादिस्मरणकर्त्तव्यानि
वशानाते पीयगृह्यकारिकाद्युक्तानि दैक्यान्निकदेवदासादिनिबंधे शुद्धदृष्टव्यानि २४ हूली
॥म॰ ज्ञातीनां सपिंडसमानोदकानां पित्रादीनां मातुः पितरौ माता महीमाता महौ नयोः पर
मगुरोराचार्यस्य अपि श्वशुरपत्न्योश्च दुहितृभगिन्योर्नित्यमवश्यमंभसि तिलोदकं वह्न्यमा
णप्रकारेण देयमिति शेषः। षष्ठीत्वसंबंधसामान्यविवक्षया। तेन न तात्पर्यादिम्यो ह्यात्मादिरवश्य
मुदकं दद्यात्। अत्रापि प्रत्येकेनीत्यर्थः॥ तथा आदपातदवं कुयः॥ समप्ताद्रशमाद्वापि तत्तयोर्न्य
पर्यन्तपः॥ अथ नः सोमुचरघमनेनापि तदिवस्युवाद इति अस्यार्थः। वा अपि अपीति छेदः॥ तां

Indira Gandhi National
Centre for the Arts

त्रि॰टी तपः। सप्तमाद्दशमाद्‌पि वा दिनादीत्यर्थः। तं अपोभ्फपयंति अपोभ्फपाभ्योदकं दद
तीत्यजहत्स्वार्थलक्षणायार्थः। अन्यथा एवंभूतानामहादार्यप्रेतानामुदकक्रियेत्यति
१२८ देशानुपपत्तेः। अतएवावभ्फपगमप्रयोजनत्वाविशेषे स्नानं लक्ष्यते उदकदा
नलक्षणाया आवश्यकत्वात्तावतैव चानुपपत्तिशांतेः। स्नानरूपाणामुक्तौ श्वपा
धे णाद्युक्तिवदुपपत्तेः। अतएवेदं वाक्यं व्याख्यातं स्नानानंतरं कार्यमित्युदकाख्यं
तरं तन्मूलत्वेन दर्शितं मिताक्षरायां। तेनापनः शोशुचदघमिति मंत्रस्य पितृदिङ्मु राम-
खत्वस्य चोदकदाने नैव सहान्वयः। अपेति मंत्रानंतरं चामुकनामामुकगोत्रः प्रेत १२८

स्तृप्यत्वित्यपि मंत्रः पठनीयस्तस्यापि सकृत्प्रसिंचेत्युदकं नामगोत्रेण वाग्यतादिति वि
धानात्। स्नानलक्षणायामपि प्रधानत्वादुदकदाने नैव मंत्रस्यान्वयो न तु स्नाने न त
स्य गुणत्वादुदकाभ्फपगमने नैव। एवं चापनः शोशुचदघमिति दक्षिणामुखो निमज्जंती
ति पारस्करवचनात्मंत्रे शेषि विकल्पः समुच्चयो वास्तु न तु तदनुरोधादत्र स्नानान्वयो
युक्तस्तस्य। पितृदिङ्मुखत्वं चोदकदाने ब्राह्मणाभिप्रायेण। तेनोदङ्मुखाः प्राङ्मुखा
श्च राजन्यवैश्ययोरित्यनेन न विरोधः। केचित्तु सप्तमाद्दशमाद्वा पूर्वमाद्वांगात्तयोपो
भ्फपयंति उदकसमीपं गत्वा तत्र स्नात्वोदकं प्रयच्छंतीत्यर्थः भ्रात्ने च मंत्र पितृदिङ्मुख

त्रि·टी त्वान्वयः उदकदानेनुनामादिप्रयुक्त एवमंत्रोवर्णभेदेन द्विप्रयमश्च। अतोनविरोधइतिभा
१२९ वश्यते। संवदतिचैतमर्थंपारस्करः। संयुक्तेमैथुनंप्राप्तेचोदकंकाश्यामहइतिकुरुध्वं
मावैवंपुनरिस्मशतवर्षेभ्येनेकुरुध्वमेवंतरास्मिः न्सर्वेज्ञातयोपोभ्कपर्यन्तासप्तमात्पु
रुषाद्दशमाद्वासमानग्राममवासेयावत्तंवंधमनुस्मरेयुरेकवस्त्राःप्राचीनावीतिनः
सव्यानामिकयापनोद्यापनःशोशुचदघमितिदक्षिणामुखानिमज्जन्तिप्रेतायोद
कंसकृत्प्रसिंचंत्यंजलिनासावेतत्तउदकमिति। संयुक्तंविद्यादिनाप्राप्तंसंवद्धमिथुन राम·
मेवमैथुनंस्त्रीपुरुषयुग्मं। विद्यासंयुक्तपुत्रदानाभिहंमैथुनंस्यालकमितिकवेः। १२९

शतन्यूनवर्षेभ्येनेकुरुध्वंमावैवंपुनरितियाविंनस्पोत्तरंन्तरस्मिंछतवर्षेकुरुध्वमित्ये
कसप्तमदशमग्रहणमविवक्षितंजन्मनामहानपर्यंतेविवक्षितं। एतदेवविवृतंयाव
त्संवंधमिति। एकवासस्त्वंचात्रोक्तंवैजवापोक्तंच। ब्राह्मणविषयंत्रपसव्यपहो
पवीतवाससइतिप्राचेतससमपसव्योत्तरीयत्वंचक्षत्रियवैश्यविषयं। राजन्यवैश्यावं
प्यपसव्येवासोयज्ञोपवीतेकृत्वेतिशातववचनात्।। अतोनविरोधः। अपनोद्यत्यचोद
कमित्यनुषंगः। अत्रसावित्यत्रसंवुद्ध्यतपेतनामनिर्देशः। आचार्यादीनांचोदकदाना
वश्यकत्वमुक्तंतेनैव। आचार्येचैवंमातामहयोश्चस्त्रीणांचोपरतानांकुर्वीरंस्ताश्च

Indira Gandhi National
Centre for the Arts

त्रिंशी तेषामिति। स्त्रीणां च मंत्रो न भवति। अमंत्रा हि स्त्रियो मता इति बौधायनवचनात्। एवं चै
१४० वं मातामहस्य अभीगीम्यरवचने एकशेषेण मातामह्यपि दृष्टव्या। अथ पुत्राग्रहणाच्चा
पुत्रा अपि। अथ पाथेयं। पुत्राद्दुहितृभगिन्यादयः। गुरुः पाध्यायः। सुहृत्संबंधी मातुल
मातृष्वस्रीयादिः। अन्ये प्रसिद्धाः। एतेषामित्यादीनां एतेभ्य इति यावत्। यथेष्टं प्रेता
भ्यः स्वकामनायां सम्प्रदानत्वं मंभः अत्र गमे प्रमवायोना स्त्रीत्यर्थः। तथा च याज्ञवल्क्यः
। कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजामिति। स्वेशं लिखितौ। उदकं क्रियाकामं एम
श्वशुरमातुलयोः शिष्ये सहाध्यायिनि राजनि चेति। नग्ना रक्षः। व्रात्याः यथाकालम १५०



तुपनीताः। व्रतिनः प्रक्रांतप्रायश्चित्ताः। चौराः सुवर्णस्तेन मद्यापहारिणः। अन्ये प्रसि
द्धाः। एते व्रात्यादयः स्वहात्मादिभ्य उदकं न दद्युः। इदं चोपलक्षणं। दाहपिंडदानादिकमपि
न कुर्युः। तथा च याज्ञवल्क्यः। न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथेति। हरेर्मनुरपि।
कं४ क्लीवाद्याने रकं कुर्युः स्तेना व्रात्या विधर्मिणः। गर्भभर्तृद्रुहश्चैव सुरापश्चैव योषित इति व्रा
त्यादिभ्यो वर्जयेद्ब्रह्महादयः। विधर्मिणः पाषंडिनः। मनुरपि। आदिष्टी नोदकं कुर्यादा व्रतस्य समा
पनात्। समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेदिति। मनुः। यत्नैः किंचित्र कर्तव्यं न चान्येषां
करोति स इति। ब्रह्मचारिविषयो विशेषः पूर्वमुक्तः। मूले चौरग्रहणं गोवलीवर्दन्यायेन। ये

त्रि॰टी॰ त्वा सक्ताः पिंडानलजलशौचे स्तद्दानं लक्ष्यते। येतु पिंडानलजलदाने किं बहुना कथनेपि किं
१ पुनः स्पर्शनवहनादौ अनर्हकाः अयोग्यास्ते अत्रैव नाशो वाज्ञानयः स्मृतिश्लोके मुष्ट
काः येषां शेषाद्दाशौचं न कार्यमित्युक्तं तेभ्य उदकदानाद्यौर्ध्वदैहिकमपि न कर्तव्यमित्य
र्थः। अत्र च वक्तव्यं सर्वशर्वमेवोक्तं। तथाप्येतेभ्य उदकदानादिकं न कर्तव्यं। तथा च ब्राह्मे।
त्रयाणामाश्रमाणां च कुर्याद्दाहादिकाः क्रियाः। यतेः किंचिन्न कर्तव्यं न चान्येषां करोति स
इति। दत्तात्रेयोपि। कर्मनिष्ठं तु संन्यस्तोपि तपुपरते सुतैः। दहनं तस्य कर्तव्यं श्राद्धपिंडोद एप
कक्रियाः। एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रिया। न कुर्याद्वार्षिकादन्यद्ब्रह्मभूताय १७

भिक्षवे इति। वार्षिकादन्यदित्यसपिंडीकरणांतक्रियाणां निषेधः। न तु दर्शादिश्राद्धस्या
पि। संन्यासिनोप्याब्दिकादि पुत्रः कुर्यात्पृथग्विधि। महालये तु यच्छ्राद्धं द्वादश्यामेव तद्भवेदि
ति वायुपुराणात्। यतिसंस्कारविधिश्च बोधायनीयादौ द्रष्टव्यः। तस्य च कर्तव्यमुक्तं दत्ता
त्रेयेण। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते। सपिंडीकरणं तस्य न कर्तव्यं सुतादिभिः। त्रि
दंडग्रहणादेव प्रेतत्वं नैव जायते। एकोद्दिष्टं न कर्तव्यं संन्यस्तानां कदाचन। नारायणबलि
श्चास्य कर्तव्यो द्वादशेहनीति। तत्प्रकारश्चोक्तस्तेनैव। कृत्वा विष्णोर्महापूजां पायसं च नि
वेदयेत्। अग्नौ हुत्वा तु तच्छेषं बाह्नित्रिभिः समाहितः। पत्ती रहस्य साधुत्वाद्गृही। त्वाद्वादशा

Indira Gandhi National Centre for the Arts

त्रि॰टी॰ वात्।अभ्यर्च्यपुष्पगंधाद्यैर्मंत्रैर्द्वादशनामभिः।संभोज्य ह्यनेनान्नेन दक्षिणां च निवेदयेत्।
१४२ त्रयोदशं द्विजश्रेष्ठं मात्मानं संयतेंद्रियं।विष्णुं प्रध्यायतं चाभ्यर्च्य पाद्याद्यैस्तु विधानतः।दद्यात्पुरु
षसूक्तेन गंधपुष्पादिकं क्रमात्।वस्त्रालंकरणाद्यानि यथाशक्ति प्रदापयेत्।उच्छिष्टसंनिधौ
स्वः ४ तस्य दर्भानास्तीर्य भूतले।भूर्भुवः स्वधा पुक्तेस्त्वस्मै दद्याद्बलित्रयं।एवं यः कुरुते विद्वान्नारा
यणबलिं द्विजः।विष्णुलोकमवाप्नोति पुरुषो नात्र संशयः।अश्वमेधसहस्रस्य वाजपेयस्य
तस्य ।ततोऽधिकं लभेद्विद्वान्यः करोति यतिक्रियामिति।कृत्वा तच्छेषं पायसं निवेदयेदिति राम॰
न्वयः।अत्र त्रयोदश्यां द्विजश्रेष्ठमिति पाठः प्राच्यग्रंथेषु लिखितः सप्रामादिकः।बलित्रय १४२

दानात्मकस्य नारायणबलेरुपक्रमे द्वादशोऽहनि कर्तव्यत्वाभिधानात् २५ तदुदकदानमित्थं
कर्तव्यमित्याह संस्कृतात्र।येषामनुगमनाद्यकृते सकलाः कुलभुवः सगोत्राः सपिंडाः सोद
काश्च साक्षात्परंपराया च येतं संस्कृत्य संस्कारस्थानमनीक्षमाणाः संतो बालपूर्वका निष्पु
रः सरःपयः समीपं व्रजित्वा नादेयपयसि सवसना एकवारं ह्रदपूर्वं ज्येष्ठपुरःसरं निमज्ज्य
स्नात्वा तीरसमीपमागत्य कंचन पाषाणमादाय तस्मिन्प्रतिदिनं यावद्दशाश्च दिनत्रिः
सकृद्वा प्रेतनामगोत्रोच्चारपूर्वकं तिलमिश्रमुदकं दद्युरिति।एतावत्सर्ववर्णेषु समानं।व
र्णभेदेन त्वयं विशेषः ब्राह्मणो मृतवति दक्षिणास्याः स्त्रैतवति उदङ्मुखाः विधिं वेरयेतु

Indira Gandhi National Centre for the Arts

त्रि.टी. मृतवति प्राङ्मुखो दक्षिणेन । अग्रे इत्यनियमः । तत्र अप्रक्रकदशाने कृते भूयः पुनरपि स्नात्वा पुनः स्ना[illegible]नं कु
१४३ र्युः । भूयः शब्दात्प्रथमस्नानधर्मातिदेशः । अत एव तत्र नादेयेप्सीति आख्यानमप्युक्तं
। तथा च वैजवापः । प्रेतमरण्यं हृत्वा यथोक्तमग्निं गमयित्वा नवेक्षमाणा आपोऽभ्येकवा
ससो ऽन्तीभूताः कनिष्ठपूर्वा इति । अरण्यं श्मशानं । अन्तीभूताः उद्विग्नाः । रीतीभूता इति
पाठे श्रेणीभूताः पश्चेतास्त्वपि । प्रेतस्य बान्धवा यथावृद्धमुदकमवतीर्य नो द्वर्षयेयुरुदकां
ते प्रविश्य च पुरएव समयज्ञोपवीतवाससो दक्षिणामुखाः प्राङ्मुखा वा प्राङ्मुखाश्च राम.
राजन्य वैश्ययोरिति । नोद्धर्षयेयुरंगं । मस्य । नदीकूलं ततो गत्वा शौचं कृत्वा यथार्थवत् । व १४३

स्त्रं संशोधयेद्धीमान् ततः स्नानं समाचरेत् । सचेलस्तु ततः स्नात्वा शुचिः प्रयतमानसः । प्रा
णान् तत्र आदाय विप्रेन्द्र घाद्रशांजलीन् । द्वादश क्षत्रियेद्द्या वैश्ये पंच दश स्मृताः । त्रिं
शत्शूद्राय दातव्या स्ततः संप्रविशेद्गृहं । ततः स्नानं पुनः कार्यं गृहशौचं च कारयेदिति । द
शद्वादशाद्यंजलिदानं चात्र प्रथमदिन एव न विधीयते । किंतु सर्वाशौचदिनान्यपि मिलित्वा
। एवं प्रत्यहमेकांजलिदानमप्युक्तं भवति । गृहप्रवेशस्तु प्रथमदिन एव वक्ष्यमाणकाले
। केचित्तु प्रथमदिन एव दशाद्यंजलिदानविधिमाहुः । स्नानगृहप्रवेशयोश्च पाठक्रमबा
धेनार्थाद्विपरीतक्रमो द्रष्टव्यः । पुनः शावेन सकलपूर्वस्नानधर्मातिदेशो न नदीरूपाधिक

Indira Gandhi National
Centre for the Arts

५२

श्रि-श्री। रणप्राप्तेः गृहप्रवेशोक्तावंचतदसंभवात्। पुनर्नदीगमनकल्पनेगौरवान्तथैवशिष्टसमा
१५४ चाराच्च। गृहेशौचेचकारेपदित्याशौचात्परिदिने। अत्रवचनदीकूलपिसुक्तात्वान्मूलेना
देपदस्युक्तंतच्चपत्रभागीरथ्यादिनदीतट्टिषयंद्रष्टव्यं। धर्म्यास्त्वपितिवंजवापोक्तः।
यत्रतुनतादृशीनदीतत्रतडागादौस्थिरजलएववस्नानादिकर्त्तव्यं। पत्रोदकमवहद्द्रवति
नत्वाप्यसकृदुन्मज्जेयकांजलिमुत्सृज्यनस्यगोत्रनामग्रहीत्वातोतीर्यवासांसिपरिधाय
सकृदन्यान्यापीड्योदगृहाणिविसृज्यासततत्रानक्षत्रदर्शनादिमाश्वलायनसूत्रात् गप: १५४
ग। ।संस्कारोनंतरंचचितामपरदक्षिणापावर्त्यजलसमीपंगंतव्यं। तथाचविष्णुः। निर्हृत्यबां

धवाः प्रेतंसंस्कृत्यापसव्यदक्षिणेनचितामभिगम्याप्सुसवाससोनिमज्जनंकुर्युरिति। आश्व
लायनोपि। अव्याहृतोव्रजेत्पनीक्षमाणाइति। यद्यपिचात्रोदकमित्येवोक्तंतथापिकु
शतिलसहितंदेयं। दक्षिणाग्रान्कुशान्कृत्वासतिलंतुपृथक्पृथगितिकात्यायनवचना
स४ त्। कुशानांचसत्वम्पर्यंत्वेद्विगुणभुग्नानकार्या। सपिंडीकरणांस्यावदृतुदर्भैःपित
क्रिया। सपिंडीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेदितिविष्णुपुराणात्। यद्यपिचगौतमेन
प्रथमतृतीयपंचमसप्तमनवमेषूदकचियेतिविषमदिनेष्वेवोदकदानमुक्तंयोगीश्वरेण
चसप्तमादशमाहात्पीतिसप्तमदिनपर्यंतमप्युक्तंतथापिपावदाशौचंप्रेतस्योदकंपिंडं

Indira Gandhi National Centre for the Arts

त्रि॰टी॰ १४५ चरद्धरितिविसृष्टवचनेनसर्वलिखितप्रचेतोवचनेचदशाहादशेत्याद्यन्तमोक्तः सर्वोयोचदिनप
क्षएवप्रेतायैकस्यहेतुत्वाद्विष्टाहतत्वाच्चमूलेउक्तः। अंजलिसंख्यापक्षास्तुत्रयः स्मृतिषु
दर्शिताः। योगीश्वरेणतावत्सकृत् प्रसिञ्चेत्। उक्तः सकृत्प्रसिंचेत्तुदकमिति। आश्वलायनेना
पिसएवोक्तः एकांजलिमिति। प्रचेतसातुपक्षत्रयमप्युक्तं। तत्रनदीकूलमित्यादिवा
क्यदशाहादशेत्याद्युक्तसकृत्पक्षउक्तः। त्रिः प्रसेकं कुर्युः प्रेतस्तृप्यतीति त्रयपक्षउक्तः
दिनेदिनेजलानवृत्तीन्यवदधात्येनकारणात्। तावद्वृद्धिस्त्वकर्तव्या यावत्पिंडः समाप्यत इति। राम॰
यदिप्रथमदिनेत्रयोदत्तास्तदाद्वितीयदिनेषट् तृतीयदिने नवेत्यादिक्रमेण। यद्येकस्तदा १४५

द्वितीयदिनेद्वौतृतीयदिनेत्रयइत्यादिक्रमेणदिनसंख्ययापिद्विगुणत्रिगुणतादि द्विपक्षोप्यु
क्तः। तत्रान्यतरानुष्ठानेनशास्त्रार्थसिद्धावपिगुरुपक्षानुष्ठानेनप्रेतोपकारातिशयः कल्प
नीयः। अन्यथातदाम्नानानर्थक्यप्रसंगात्। उदकदानमंत्रास्तुनानाविधाउक्ताः प्रचेतसा
प्रेतस्तृप्यत्विति। वैजवापेनामुष्मैस्वधेति। पारस्करेणासावेतत्तउदकमिति। हारीतेनासौ
तृप्यतामिति। कात्यायनेनगोत्रनामपदांतेचतर्पयामीत्यहंवदेदिति। रामायणेइदं पुरुषव्या
घ्रविमलं दिव्यमक्षयं। पितृलोकेषुपानीयंमद्दत्तमुपतिष्ठतामिति। एतेषांचविकल्पोद्रष्टव्यः
। एतस्यचोदकदानस्यतर्पणत्वेनान्वाएवसव्येनापिपक्षेप्राप्तौ अंजलिनियमार्थमुक्तंवसि

Indira Gandhi National
Centre for the Arts

त्रि·टी श्वेन।सद्योनराम्मांपाणिभ्यामुदकंक्षिपांकुर्वीरन्निति।अन्यदप्यंगजातंस्पृशुक्तंयथास्तं
१५८ भवंदृष्टव्यमिति २६ मरणाशौचिनांविधि प्रतिवेधहृपान्धर्मानाह।त्रिनि।शायां।ता
नपः।त्रिनिशामहर्निशंवाअनशनाउपवासिनः।क।ततदानीमिवापणाहानीतंउपचमया
चितलब्धंवाअशनंयेषामेवंभूतावानावदेवभवेयुरितिशेषः।तत्रैवविशेषः।पयोंतो
सां ३ दृहैकवद्भावः।आमिषंसंलवणांसैंधवसामुद्रादिपयोदुग्धंवक्षारंचगोधूममुद्गाघन्नभ
क्ष्यंभोजनेत्यजेयुः।स्त्रीसंगमैथुनंमंगलाभ्यादर्शादर्शनादीनिव्यसनानिघृतादीनिहस्तं राम·
हास्यंमुदंसंतोषावस्थानंरोदनमुत्थासनंचमचाहित्यजेयुरित्यनुषंगः।तागांतिगानिर्मिते १५८

---

कटादितेनैवास्त्रीणांमांक्षितौतेहातयोतिनियताःम्नचपुरीषादौकृतेविहितशौचेनशु
चयःसंतोनिशायांरात्रावेवपृथक्पृथक्एकाकिनःसंविशेयुःशयीरन।इदंचोपलक्षणं।दिवा
प्यपवेशनेतासांस्त्रीणांक्षितावेवदृष्टव्यं।तथाचवसिष्ठः।गृहाद्बुद्धित्वाअधस्तत्रै
अहमनश्नंतआसीरन्क्रीतोत्पन्नेनवावर्तेरन्निति।अधःतःशयनासनार्थंनिर्मित
स्तृणमयःकटादिरधस्त्रस्तराः।आश्वलायनः।नैतस्यांरात्र्यामन्नंपचेरन्क्रीतोत्पन्नेन
वावर्तेरन्निति।मनुः।अक्षारलवणान्नाःस्युर्निमज्जेयुश्चतेत्र्यहं।मांसाशनंचनाश्नीयुः
शयीरंश्चपृथक्क्षितौइति।क्षितिग्रहणात्खट्वाकंबलादिनिषेधोनतुकटस्य।भूमौश

Indira Gandhi National Centre for the Arts

त्रि॰टी स्नाशायिन इति विष्णुपुराणात्।क्षारलवणमुक्तोग्निपुराणे।तिलमुद्गादृते शैंब्यं सस्यं गोधू
१८७ मकोद्रवौ।धान्याकं देवधान्यं च शमीधान्यं तथैव च।स्वित्र धान्यं तथा पण्यं मूलं क्षारगणाः
स्मृत इति।क्षारो यवक्षारादिः।लवणविशेषणं वा क्षारग्रहणं तेन सैंधवादेरनिषेध इति मे
धातिथिः।निमज्जेयुरिति मार्जनादिहितं मज्जनमात्रं कुर्युरित्यर्थः।तथा च गोतमः।अधः
शय्यासनिनो ब्रह्मचारिणः सर्वे न मार्जयीरन्मांसं न भक्षयेयुरा प्रदानादिति।सर्वे ता नपः
सहस्ताः पुरित्यर्थः।त्वमसे।प्रदानमेकादशाहिकं श्राद्धं तत्पर्यंतमिति मांसभक्षणनिषेधनून्क राम॰
ग्रहणविकल्पः।विष्णुपुराणे त्वस्थिसंचयनमवधित्वेनोक्तं।शय्यासनोपभोगस्तु सपिं १८७

डानामपीष्यते।अस्थिसंचयनादूर्ध्वं संभोगस्तु न योषितामिति।योषितां संयोगो मैथुनं तु
[redacted] पावदाशौचमेव नेष्यत इत्यर्थः।सपिंडग्रहणं पुत्रव्यतिरिक्तपरं।पुत्राणां तु यावदाशौच
मेवादशाहं कटमुपासीरन्नानापि चोरेवमरणा इति बोधायनवचनात्।वृद्धस्मृतिरपि।अ
धःशय्यासनाः सर्वे नामलिनाभोगवर्जिताः।अक्षारलवणान्नाः स्युर्यावन्नीता दिनास्त
दोति।दीना इति हर्षहास्यादिनिषेधः।मलिना इति मार्जनवस्त्रक्षालनादिनिषेधः।अ
नएव क्षालनार्थनिर्णेजकादिहस्ते दानरूपो वासस्त्यागस्तेनैवाशौचापगमदिने विहितः
।नवं मेवासम्यक्तोत्पागोनरवशापगमानंतरं कार्य इति।ब्रह्मपुराणे तोत्वतिमदिने वस्त्रशुद्धिर्वि

Indira Gandhi National
Centre for the Arts

त्रि॰ती॰ हिता।यस्ययस्यतुवर्णस्ययद्यत्स्यात्तस्यशौचमंत्यहः।एतत्त्रगृहशुद्धिंचवस्त्रशुद्धिंकरोत्यपी
१४८ ति।अथतृतीयपंचमसप्तमनवमेषूदकक्रियावाससांचत्यागोनेत्यंत्यानामितिगौतमो
क्तस्तुवाससस्त्यागः परिवर्त्तनमात्रं।पिंडदानादौर्ध्वदैहिककालधृतयोस्तत्त्यागएव।
यामाटुहरिस्तेनोगत्वाप्रतस्यमेतुवाससी।अंत्यानामाश्रितानांचत्यक्त्वास्नानंकरोति
चेतिब्राह्मात।यस्तुवाचस्पतिनागौतमेनांत्यानांशूद्राणामनेवाससस्त्यागविधानाद्दा
हस्यस्यवाससस्त्यागस्यद्विजविषयत्वेनसंकोचःकृतःसपिंडविषयत्वादयुक्तः।भोग राम॰
वर्जिता।इतिसूत्रकृंदनाख्याणामसनोद्वासनादिनिषेधः।वेनतैलाभ्यंगतांबूलचर्वणा १४८

दिकंसर्वंभोगसाधनंमूलेउपलक्षितंद्रष्टव्यं।यत्तुमार्कंडेयपुराणे तैलाभ्यंगोबांधवा
नामंगसंवाहनंचयत।तेनचाप्यायतेजंतुर्यच्चाश्नंतिस्वबांधवाः।इतितैलाभ्यंगोविहि
तःसोंतिमदिनेयामाति।क्रम्यशोचांतेकृतश्मश्रुकर्माणःतिलकल्कैःसर्षप
कल्कैर्वास्नानविपरिवर्जितवाससोगृहंप्रविशेयुरितिविरूक्तितिलकल्कस्ना
नविकल्पितोद्रष्टव्यः।रोदनंचनिषिद्धंयाज्ञवल्क्येनाश्रु"श्लेष्मबांधवैर्मुक्तंप्रे
तोभुंक्तेयतोवशः।अतोनरोदितव्यंहिक्रियाःकार्याःस्वशक्तितः।इति।क्रीतलब्धं
वाएकान्नमेवभोक्तव्यं।क्रीतालब्धावाप्यगृहादेकालमपलवणमेकांतश्चिंभुंजीर

त्रि.टी
१४९

त्रिति वेजवापसत्रात। आशौचमध्ये भोजनं चत्ताति भिः सहकर्तव्यं। आशौचम
ध्येपत्नेन भोज्यमन्नसगोत्रजानामिति ब्रह्मपुराणात्। महाभारतेप्युक्तं। तिलान्नं तत्पा
नीयं दीपं तत्तन्न जायत। ज्ञातिभिः सह मोर ध्वमेतत्त्वन्नेषु दुर्लभमिति। मरीचिनापु
ऽन्नविशेषे सह भोजनमुक्तं। प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा। ज्ञातिभिः स
ह भोक्तव्यमेतत्प्रेतेषु दुर्लभमिति। तच्च भोजनं रिक्ते वक्तव्यं। दिवा च भक्तं भोक्त
व्यममांसं मनुजर्षभेति विष्णुपुराणात्। भोजनपात्राणि चोक्तानि हारीतेन। पाणि.
पुमन्नमेपत्रपर्णपुटेषु वाश्नीरन्निति। अत्र विशेषनिषेधश्च गरुडकारिकायां ल राम:
१४९

वणं क्षीरमाषान्नां प्रथमोऽशा निपायसं। वर्जयेदाहूतान्नेषु बालवृद्धातुरैर्विनेति। एवम
न्येप्याशौचविधर्माः स्मृतिनिबंधेषु द्रष्टव्याः। एतेषु च धर्मेषु देशकालविशेषाणामव
धिः अपवैकल्पिकमुक्तं २७ संस्क्रि। येन। संस्कर्तादाहकर्तानिपश्चाद्गतः पुत्रादिः स
निहितो विप्रमावैवनतु जलदानवस्माषाणे। आशौचे तु तेषु पुंस्त्वम् च्युपथा भवति तथा
दहनतः हर्हदिनादारभ्य दशाहं एकं पिंडपावेपतरघात। अपर्याप्तिस्नमिति साधार
णेप्येनोक्तं तेन सर्वेषां यावद्दशौचेऽपूरणं पिंडदानावगमात् द्वादशाहं दशपिंडाः स्त्रिय
स्यद्वादशौ वेगपस्यपवदशाम्हरस्य त्रिंशादिनिर्णाभेदेनापिंडसंख्याभेदः पतीपिते। पारस्क

Indira Gandhi National
Centre for the Arts

त्रि॰स्थ॰ रेणापितथोक्तंग्रा स्लोराह्रशपिंडः स्फः स्वविंयेहा दशास्वताः।वैस्वपेपंचदशाश्रोक्ताःस्व
१५० द्वेत्रिंशात्मकीर्तिताइति।तथापिजाम्बुकाशौचतुल्यांस्तुवर्णानांक्वचिद्दिवहि।दशाधूर्मो
मुरास्तृतत्मयेनपिंडान्वपंत्सर्पीतिप्रलोकसं।आधार्दशाविशेषविश्वपत्वमभिधायपेते
म्यःसर्ववर्णेभ्यःपिंडान्दद्यादिशोवत्यिनिवह्मपुराणाभिधानात्सर्वस्मृतिपुराणेषुचद
शानापेवपिंडानांशिरःप्रभृत्यवयवनिष्पत्तिरूपप्रयोजनाभिधानाद्ब्राह्मणस्यापि
द्वेदैनेवदशपिंडदानंस्वत्रियादीनांनवदिनपर्यंतमविछेदेननवपिंडदानेदशमपिंड
दानेत्वाशौचांत्यदिनइतिद्रष्टव्यं।तथाचब्रह्मपुराणेदिवसेदिवसेदेयःपिंडएवंक्र राम॰ १५०

---

मेणातिस्पुपक्रम्योक्तं।देयस्तुदशमःपिंडोरात्रौदेहाद्हरोहनि।वैश्यानांवैपंचदशेदेयस्तुदश
मस्तथा।भूद्रस्यदशमःपिंडोमासेपूर्णेह्विदीयतइति।पिंडदानप्रकारोपितत्रैवापनस्यपंभांडमा
दायनवंस्नातःसुसंयतः।लकुटंसर्वदोषघ्नंगृहीत्वातोयमानयेत्।ततश्चोत्तरपूर्वस्यामग्निंप्र
ज्वालयेद्दिशि।तंडुलप्रसृतीतत्रप्रक्षाल्यद्विःपचेत्स्वयं।सपविचैस्तिलैर्मिश्रंकेशकीटविव
र्जितं।द्वारोपांतेततःक्षिप्त्वासुशुद्धंगोरसृत्तिका।तत्रस्थेसंस्तरेदर्भान्याम्याग्रान्दशसंभवान्।न
तोवनेजनंदद्यात्संस्मरेद्गोत्रनामनी।।तिलसर्पिर्मधुक्षीरैःसंसिक्तंतत्समेवहि।दद्यात्प्रेतायपिंडं
तुदक्षिणाभिमुखःस्थितः।फलमूलगुडक्षीरतिलमिश्रंतकुत्रचित्।अर्घैःपुष्पैःस्तथाधूपैर्दी

Indira Gandhi National Centre for the Arts

त्रि॰टी॰ पेस्तोयैश्च शीतलैः उर्णातंतुमयैः शुद्धैर्वासोभिः पिंडमर्चयेत् । यावन्तियावद्दाकाशं पिंडाद्वाष्पमयी
१५२ शिखा ।तावत्तत्संमुखस्तिष्ठेत्सर्वं तोये क्षिपेत्ततः ।दिवसे दिवसे देयः पिंड एवं क्रमेण तु ।स्कंतो
यांजलिस्त्वेवं पात्रमेकं च दापयेत् ।द्वितीये द्वौ तृतीये त्रींश्चतुर्थे चतुरस्तथा ।पंचमे पंच षष्ठे
षट् सप्तमे सप्त चैव हि ।अष्टमे ष्टौ च नवमे नवैव दशमे दश ।एवं स्फः पंच पंचाशत्तोयस्यांज
लयः क्रमात् ।तावंति तोयपात्राणि संयुक्तानि तिलादिभिरिति ।तंडुले तिमुख्यः कल्पः ।अ
नुकल्पस्त्वितत्वन्यदपि द्रव्यं द्रष्टव्यं [redacted] तथा चमुनः पुलः ।फलमूलेश्च पयसा शा राम॰
केन च गुडेन वा ।तिलमिश्रं तु रमेत्पिंडं दक्षिणतो हरेदिति ।शालिना सक्तुभिर्वापि शाकेर्वाप्य १५१

श्च निर्वपेदिति च ।द्वारोपांते देशाश्च न नियतः ।यामाहुहिश्च कर्त्तव्यं जलाशयसमीपतः ।पिं
उरानंदशाहानि चेतायारण्यमाश्रितैरिति ब्रह्मपुराणएव देशांतरस्यापिविधानात् ।पुनः
पुलस्त्योपि ।द्वारदेशे प्रदातव्यो देवतायेतनेपुचेति ।मत्तिकाक्षेपश्च स्थंडिलनिर्माणार्थः ।स्थंडि
ले अन्नभागं तु दद्यात्सर्वदलमेव तु ।कृत्वानुपिंडसंकल्पं नामगोत्रेण सुंदरीति वाराहपुराणात् २४
दर्भास्तरणं चोपनीतविषयं प्रेतपिंडवद्दिर्दद्याद्दर्भमंत्रविवर्जितमिति परीचिवचनं चानुप
नीतविषयं ।तथा च प्रचेताः असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति ।मूले च पाषा
णानिहत्यर्थमेव कारकरणं सर्वस्मृतिपुराणेषु कुशास्तीर्णभूमेरेवाधिकरणत्वाभिधानाद्

Indira Gandhi National
Centre for the Arts

त्रि·टी· द्दद्यारितस्मैप्रेतायपिंडनिर्वपेद्भूमौमाल्यंपानीयंचोपलिप्तायांदद्युरिपुच्चेत्रोवचनानुसा
१५२ राच्चभूमौमाल्यमित्यादिशंखवचनेप्युपलिप्तायामित्येवपाठस्तसंमतिप्रदर्शनाय।उप
लेवादद्युरितिपाठेपिपाषाणमयेदेशाइतिकश्चित्।पिंडदानेचयद्यपियोगीश्वरेणपिंडयत्ता
दृतादेयंप्रेताय।[redacted]त्रंदिनत्रयमितिपिंडपितृयज्ञप्रकारोतिदिष्टस्तथापिस्वधाशब्दादे
र्मंत्राणांचपर्युदासः।तथाचमरीचिः।पितृशब्दंस्वधांचैवनप्रयुंजीतकर्हिचित्।अनुरा
दृतंपावेद्दप्रयत्नेनविवर्जयेत्।उपतिष्ठतामयंपिंडः प्रेतायेतिसमुच्चरेत्।तत्समीपसेकपु गप·
ष्पंचधूपंदीपंतथैवचेति।मूलेचमधुग्रहणंतिलघृतादेरुपलक्षणं।अत्रचसंख्याविकल्पे १५२

४ प्रेतस्यात्क्रियतेतथा।द्वितीयेनतुकर्णाक्षि नासिकास्तुसमासतः।गलांसभुजवक्षांसितृतीये ४
४ नतथाक्रमात्।चतुर्थेनतुपिंडेन ४

फलतारतम्यंकल्प्यं।एतेचपंचाशन्निततोयांजलयः।पिंडोपरिद्वितीयतृतीयादिपादैः सं
निहितपिंडानामेवाभिधानात्पिंडानामवयवपरकत्वमुक्त्वासपानांजलीनामिंद्रिय
शरकत्वाभिधानाच्च।सर्वतोयांजलीनांचतापोपशमनार्थत्वात्।तथाचब्रह्मपुराणएव।
शिरस्त्वाद्येनपिंडेनैनाभिलिंगगुदानिच।जानूजंघेतथापादौपंचमेनतुसर्वदा।सर्वमर्मा
णिषष्ठेनसप्तमेनतुनाडयः।दंतलोमान्यष्टमेनवीर्यंतुनवमेनवै।दशमेनतुपूर्णत्वंत
प्ततास्तुद्विपर्ययः।एकादशोद्दियवधाः संतुबुद्धिवधैः सदा।सर्वेषामेवभूतानांपरलो
कसमागमे।प्रेतभावगतानांतुरौरवादिषुवर्जनं।पंचभिःपंचभिस्त्वेभिःपात्रेरंजलिभि

Indira Gandhi National
Centre for the Arts

त्रि·टी १५३ स्तथा।एकादशेऽवैद्रियाणि सर्वतेयाम्यदर्शनादिति वैशंपायनऋष्यशृंगादिभिस्तत्वन्यथो
क्तंतद्विस्तरभयात्त्वयोजनाभावाच्च नप्रदर्श्यते।यत्रतु सद्यस्त्वादेवादशपिंडदानमुक्तंपुडु
मृतप्रामम्रत्युकालभृग्वादिमरणादौ तत्रतत्प्रकारो ब्रह्मपुराणे।सद्यःशौचेप्रदानव्यास्त
वेदेपियुगपत्तथा।त्र्यहाशौचे प्रदातव्याः प्रथमेत्वेकएवहि।द्वितीये द्विचत्वारस्तृती
येपंचतथैवहि।एकस्तोयांजलिस्तद्वत्पात्रमेकंप्रदीयतइतिप्रथमदिनेमेकस्तोयांजलिरेकं
चपात्रमित्यर्थः।त्र्यहाशौचप्रकारांतरमप्युक्तं पारस्करेण।प्रथमेदिवसेदेयास्त्रयः १५३
पिंडाःसमाहितैः।द्वितीये चतुरोदद्यादस्थिसंचयनंतथा।त्रीस्तुदद्यात्तृतीयेह्निवस्त्रादि

क्षालयेत्तथेति।प्रथमेह्नि योदद्यादित्यस्यायमिदंद्यादित्यर्थमभिप्रेत्य संस्कर्तेत्युक्तं।तथा
न्यदपिकर्तव्यमुक्तं पारस्करेण।मृन्मयेतांरात्रौ क्षीरोदकेविहायसि निरध्यक्षः प्रेतात्रस्ना
हिपिबचेदमिति।विहायसिशिक्यादौ गरुडपुराणेतु एष्य कूष्माण्डयोर्घटेकाह्नंक्षीरमंबु
चेत्यस्मात्रिरात्रपक्षोप्युक्तः।अपक्वेमृन्मयेपात्रेदुग्धंदद्याद्दिनत्रयं।काष्ठत्रयेगुणेर्वद्ध्वा
प्रीत्येरात्रौ चतुष्पथइति।मत्स्यपुराणेतु यावदाशौचं तन्निधानमुक्तं।तस्मान्निधेयमाका
शेदशरात्रंपयस्तथा।सर्वतापोपशांत्यर्थमध्वश्रमविनाशनमिति।अन्यदप्युक्तंगृह्यका
रिकायां।तत्रप्रेतोपहतयेदशरात्रमखंडितं।कुर्यात्प्रदीपंतैलेनवारिपात्रंचमार्तिकं।भो

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ ज्याड्यो जनकाले सभक्तमुष्टिं च निर्वपेत्। नामगोत्रेण संबुध्याधारिन्यां पितृयत्नवदिति। ए
१५४ वमन्यदपि स्मृतिभ्यो वगन्तव्यं। प्रथा। रिस्नात। प्रथमदिने पञ्चवर्षं तंदुलनीवारादिद्रव्यं गृ
हीतं उपरिस्नाद्यावर्तिं उदानं तदेवग्राह्यं। तथा च मनुः। प्रथमेह्नि यद्द्रव्यं तदेवस्या
दृशाह्निकमिति। स्वस्य हृणा त्रस्य मुख्यत्वं सक्तुगुडादिकं तु पाकासंभवे ग्राह्यमिति दर्शयं
ति। कर्तृदेशाविपर्ययश्च सर्वमुक्ताः। उत्तरापाद्यविपर्ययोपि द्रष्टव्यः। एतेषां च विपर्यये उ
क्तं गृह्यकारिकायां। उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये। सर्वदत्तां जलौघादिं दा १५४
नं तथैव चेति। एतस्मिंश्चोदकपिंडदानाद्यौर्ध्वदेहिके प्रक्रांते। समानएव दर्शापाते विशेषा

भविष्यत्पुराणे। प्रवृत्ताशौचतंत्रस्तु यदि दर्शः प्रपद्यते। समाप्य चोदकं पिंडान्स्नानमात्रं
समाचरेदिति। इदं च मातापितृभिन्नविषयं। तद्विषये तु श्लोकगौतमः। अत्रं तद्दशाहेद
र्शश्चेत्तत्र सर्वं समापयेत्। पित्रोस्तु यावदाशौचं दद्यात्पिंडं तिलांजलीनिति। इदमपि
अहमध्ये। त्रिरात्रात्परं तु दर्शापाते मातापितृविषयेप्यन्यवदेव। तथा च गालवः। पि
त्रोराशौचमध्येपि यदि दर्शः समापतेत्। तावदेवोत्तरं तंत्रं पर्यवस्येत्महात्मभिरिति। अ
न्येषां तु महात्मर्वमपि दर्शापातेन तत्र तंत्रसमाप्तिः। दाहा। दिनं। च यनस्या[redacted]
स्थिसंचयनस्य दिने वक्ष्यमाणेन प्रथमादिव्यानाहितान्यग्निपदा हाहाद्यद्दिवसादेवग

त्रि·टी एवं।तथांगिराः॥अनग्निमतउक्ता ते साग्नेः संस्कारकर्मणः।अस्थिसंचयनं दाहान्मता
१५५ हस्तयथातिथ्यीति।दाहाहाङ्कादित्यपपाठः।इदं नेवा।इदं वास्थिसंचयनं आदितः दाहदि
नमारभ्यचतुर्णामह्नामेकस्मिन्प्रथमे द्वितीये तृतीये चतुर्थे वा सप्तमे ह्नि नवमे दिने वास्वस्व न२
गृह्योक्तप्रकारेण कर्तव्यं।तथा च संवर्तः।प्रथमे ह्नि तृतीये वा सप्तमे नवमे तथा।अस्थि
संचयनं कार्यं दिने तद्गोत्रजैः सहेति।छंदोगपरिशिष्टं अपरेद्युस्तृतीये वा अस्थिसंच
यनं भवेदिति।अपरेद्युर्द्वितीये।विष्णुः।चतुर्थे दिवसेस्थिसंचयनं तेषां च गंगांभसि प्रक्षे १५५
पः इति।ब्रह्मपुराणे तु वर्णविशेषेण कालविशेषमवस्थाप्रकारद्वयेनोक्तः।चतुर्थे ब्रा

ह्मणानां तु पंचमे ह्नि भूभृतां।नवमे वैश्यजातीनां शूद्राणां दशमात्परे।क्वचित्तृतीये विप्रस्य
चतुर्थे क्षत्रियस्य च।पंचमे वैश्यजाते च शूद्रस्य दशमे ह्नि।अस्थां च संचयः प्रेते क्रियते
देशगोत्रवादिति।आश्वलायनेन त्वमोपि काल उक्तः।संचयनमूर्ध्वं दशम्याः कृष्णपक्ष
स्यायुजास्वेकनक्षत्र इति।कृष्णपक्षसंबंधि दशम्या ऊर्ध्वमयुग्मासु एकादशी त्रयो
दशी पंचदशीषु मध्ये कस्यांचित्तिथावषाढाफल्गुनीप्रोष्ठपदाख्यतिरिक्ते एकनक्ष
त्रे संचयनं कार्यमित्यर्थः।अयं च कालो नतीते आशौचकाले यथासंभवमतीतेपि सं
वत्सरांतादि सपिंडीकरणपक्षे द्रष्टव्यः।यदा तु द्वादशाहे सपिंडीकरणं क्रियते तन्मध्ये

Indira Gandhi National Centre for the Arts

त्रि-टी
१५६

चापंक्वासोनसंभाव्यते तदा दर्विका एव। संचयनानंतरं श्राद्धमस्मै दद्यादित्येकोद्दिष्टविधाना
त्सपिंडीकरणोत्तरं तन्निषेधात्। संचयनप्रकारश्चाश्वलायनकात्यायनाद्युक्तो द्रष्टव्यः
। अंगिरसा च विशेष उक्तः। अस्थिसंचयने यागो देवानां परिकीर्तितः। प्रेतीभूतं तंतयो
द्दिश्य यः शुचिर्न करोति चेत्। देवतानां तु यजनं तं शपंत्यथ देवताः। श्मशानवासिनो
देवाः शवानां परिकीर्तिताः॥ याग इज्या। तत्प्रकारश्च ब्रह्मपुराणे। स्नात्वाचिराच्चैकु
र्वंति प्रेतायोदकतर्पणं। श्मशाने देवतायागं चतुर्थे दिवसे ततः। भवंति पूजिता यस्मा १५६
त्तत्रस्थाः शोकरारयः। स्नातैः सुधौतवस्त्रैश्च श्मशानस्य समीपगैः। स्वजातिविहि

तैर्द्रव्यैर्यथाशक्त्या समाहितैः। मृन्मयेषु च भांडेषु कुंभेषु स्वचकेषु वा। सुपक्वैर्भक्ष्यभोज्यै
श्च पायसैः पानकैस्तथा। फलैर्मूलैर्दधिक्षीरैश्च पूज्याः क्रव्यादा देवताः। कैश्चिद्दर्भप्रसात
यं कैश्चित्तु पुष्पं च शोभनं। धूपो दीपस्तथा माल्यं कैश्चिद्रूपं त्वरान्वितैः। तत्र पाषाणप
र्णानि श्मशानाग्नेः समंततः। कैश्चिद्रूपाणि सर्वाणि पानीयान्यक्षतानि च। निवेद्य पू
र्वोक्तमंत्रैः सर्वैरनहंकृतैः। नमः क्रव्यादमुखेभ्यो देवेभ्य इति सर्वदा। येत्र श्मशाने देवाः
स्युर्भगवंतः सनातनाः। ते स्मत्सकाशाद्गृह्णंतु बलिमष्टांगमक्षयं। प्रेतस्यास्य शुभांल्लो
कान्प्रयच्छंतु च शाश्वतान्। अस्माकमायुरारोग्यं सुखं च ददतां चिरं। एवं कृत्वा बलिं सर्वा

Indira Gandhi National Centre for the Arts

च

त्रि॰टी ऋक्षीरेणाम्बुक्ष्यवाग्यतेः। विसर्जनं तु देवानां कर्त्तव्यं च समाहितैः। ततो पतिपदे क्षोत्थां
१५७ शाखामादाय वाग्यतः। अपसव्यं क्रमाद्भूत्वा हृत्वा कश्चित् सगोत्रजः। प्रेतस्यास्थीनि गृह्य
ज्ञातिप्रधानांगोद्भवानि च। पंचगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्ट्य च। प्रक्षिप्य मृन्मये
भांडे नवे साच्छादने शुभे। आरोप वृक्षमूले वा शुद्धे संस्थाप्य यत्नतः। गृहीत्वास्थीनि नद्य
म्भनीत्वा तोये विनिक्षिपेत्। ततः संमार्जनं भूमेः कर्त्तव्यं गोमयाम्बुभिः। पूजा च पुष्प
धूपाद्यैर्बलिभिः पूर्ववत् क्रमात्। भूमेराच्छादनार्थं च वृक्षः पुष्करको पि वा। पट्टको १५७
वा प्रकर्त्तव्यस्तत्र सर्वैर्विधानतः इति। भक्ष्यभोज्यपायसपानकफलमूलात्मकोब

---

लिः प्रधानं भक्ष्यादीनां पूजाकरणात्वो मेः। अर्घ्यः पुष्पाणि धूपो दीपः माला
तंडुलादिः शरावपात्राणि केषु चित्पात्रेषु पानीयानि यवाद्यक्षताश्च तदंगानि। प्रधा
नांगानि चोक्तानि गृह्यकारिकायां। शिरसो वक्षसः पाण्योः पार्श्वाभ्यां चैव पादतः
।अग्रदक्षिणमस्थीनि गृह्णातीत्यादि गोभिलः इति। पुष्करकः पुष्करिणीपट्टकश्चत
।अथ दक्षिणमस्थी निगृह्णातीत्या गोभिल इति। पुष्करकः पुष्कारिणीपट्टकश्चल
र्ः। संचितानां चास्थ्नां प्रतिपत्तिरुक्ता विष्णुना तेषां च गंगांभसि प्रक्षेप इति। तत्र वि
शेषो ब्रह्मपुराणे। तत्स्नानमाकुन केर्नीत्वा करा विज्ञाद्भवीजले। कश्चित्क्षिपति स
नु बांधो द्विवा सहोदरः। मातुः कुले पितृकुले वर्जयित्वा नराधमः। अस्थीन्यन्यकु

त्रि॰टी॰ लक्ष्मस्पनीत्वावांद्रायणंचरेत्। अस्थीनिमातापित्रोर्वज्ञानांनयंतिगांगमपियेकथंचित्।
१५८ सद्भावकस्यापिदयाभिभूतास्तेषांतुतीर्थानिफलप्रदानि। कुलद्वयंचाप्यथवर्जयित्वामा
तापित्रोर्जन्मप्रभृत्याश्रितेच। अस्थीनिवान्यस्यनयन्वहंश्चभाग्यक्षयंलभतेदुष्कृतेचाभा ५
गीरथ्यांयत्रगतानुतीर्थेकुलेनरःकोपियदाविपन्नःतदातदातत्रतयाथभक्त्याभावे
नचास्थीनिविनिःक्षिपेद्वास्नात्वाततःपंचगव्येनसिक्त्वाहिरण्यमध्वाज्यतिलैश्चयोज्य।
ततस्तुमृत्पिंडपुटेनिधायपश्यन्दिशंप्रेतगणोपगूढं। नमोस्तुधर्मायवदन्प्रविश्यज १५८
लंसमेप्रीतइतिक्षिपेच्च। उत्थायभास्वंतमवेक्ष्यसम्यक्दक्षिणांविप्रमुखायदद्यात्।

---

एवंकृतेप्रेतपुरस्थितस्यस्वर्गेगतिःस्यात्तुमहेंद्रतुल्येति। प्रथमद्वितीयादिदिनविधिश्चमृ
लोक्तोदशाहाद्याशौचे। सद्यःशौचादौतुब्रह्मपुराणे। सद्यःशौचेतथैकाहेसद्यःसंचय
नंभवेत्। अहाशौचेद्वितीयेह्निकर्तव्यस्त्वस्थिसंचयइति। संचयनानंतरंचैकोद्दिष्टश्रा
द्धमुक्तमाश्वलायनेन। श्राद्धमस्मैदद्युरिति। विषमश्राद्धादीनिचस्मृतिनिबंधातोवगं
तव्यानि। अन्यत्तु। ततः। अनुपेतेऽनुपनीतेप्रेतेरण्येपिएतदस्थिसंचयनंनकार्यं २८ वर्षा॥
नित्यं। केचिद्वर्षापिसिस्त्वापेक्ष्यवयोधिकेसपिंडकृतेमृतेकनीयसां[illegible]नाम्नपिंडाना
उपरिवर्तमानानांमुखशिरोरोम्णांवपनंनरवच्छेदनंचोचुः। द्वैकत्वं। केचिद्दितपाक्षिक

Indira Gandhi National Centre for the Arts

त्रि॰टी॰
१५९

त्वं दर्शपतिः। तेन चेनाभ्युदयकामनायां वयोधिके सपिंडे प्रेते सर्वैः कनिष्ठैर्भ्रात्रादिभिरपि व
पनादि कर्त्तव्यं। पितृपरमगुरुभ्रातृमातापित्रोराचार्ये वोद्धृते नित्यं नियमेनोपरिवपनादि
कर्त्तव्यं। तथा च दर्शमेहृति संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र स्नानानि काशीसिकेशश्म
श्रुणखानि चेति देवलवचनात् स्नानवत् सर्वेषां वपनादौ प्राप्ते तेषां चोदकसंस्पर्शनं ता
वंतं कालमनुभाविनां च परित्यापनमित्यापस्तंबवचनेन मतकनीयः सपिंडानां तन्नियम्य
ते। एवं च स्नानश्मश्रुकर्माणीति विल्मादिवचनगतमपि बहुवचनमनुभाविविषयतया १५९
संकुचितमेवं द्रष्टव्यं। श्मश्रुग्रहणं चोपलक्षणं। तेनैव च पुत्राणां तदुर्मातिदेशाद्धाः

शिष्यस्यापि च वपने सिद्धे गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ। आधानकाले सोमे
च वपनं सप्तसु स्मृतमिति वचनान्मातापित्राचार्यमरणे तस्यावश्यकत्वमन्यत्र चा
नियतत्वं कल्प्यते। अन्यथैतस्यानर्थक्यापत्तेः। वचनप्राप्तपरिसंख्यायाश्च शक्यत्वा
त्तीर्थेतरेऽपि वपनसत्वाच्चात्र च गंगापदस्य सर्वतीर्थेष्वयं विधिरिति सर्वतीर्थपदस्य
वपनस्याप्यागमात्रपरत्वेके न चित्रं तेनोक्तं तत्त्रिस्थलीसेतावस्मान्वितमाचरणैः प्रबंधे
न निराकृतं। तत्राधिकं च वक्तव्यमन्यत्र मत्कृते द्रष्टव्यं। पित्रादिग्रहणं च भर्तुरप्युपल
क्षणं। पुत्रः पत्नी च वपनं कुर्यादेतेषु यथाविधि। पिंडदानोचितोन्योऽपि कुर्यादित्यसमा

Indira Gandhi National
Centre for the Arts

द्दितइतिव्यासवचनेपत्न्या अपि वपनविधानात्। तत्रकालविधिः। सूतकांते। सूतकशब्दश्चा
शौचमात्रपरः। स्नाशौचांतेकिंउपरिवपननखछेदनंकुर्यात्। अयंचमुख्यःकल्पःसक
लस्मृतिपुराणेषूक्तत्वात्। दशमग्रहणस्याशौचांत्यदिनोपलक्षकत्वात्। मध्येवा। के
चिदिदमप्यसंबध्नंते। केचित्स्मृतिकारान्वज्ञातनामविशेषा आशौचमध्येपिद्दिती
यादिनेवपनमाहुः। तथाचमिताक्षरोदाहृतस्मृत्यंतरे। द्वितीयेहनिकर्त्तव्यंक्षुरक
र्मप्रयत्नतः। तृतीयेपंचमेवापिसप्तमेवाप्रदानतइति। आप्रदानतएकादशाहिक
श्राद्धादितिचतुर्थ्यादीनामपिविधिः। अन्यथातस्यानर्थक्यात्। केचित्तुदाहाग्रभृतेरा



हकर्त्तुःप्रथमदिनेपिवपनमुक्तं। अतएवस्मृतिसंग्रहे। यस्मिन्तस्यराज्ञावेवदाहेनेदेव
प्राप्तस्यतदंगभूतस्यवपनस्यतदानींनिषिध्यद्वितीयदिनेतुस्नानमुक्तं। राघोदध्यातुपिं
डांतेकृत्वावपनवर्जितं। वपनेनेष्यतेपत्रौम्बस्तनीवपनक्रियेति। केचित्तुसर्वपुत्राणा
मुक्तं। मदनपारिजातादौप्रथमदि[redacted]नकृतवपनस्यापिपुनराशौचांतेवपनमुक्तं। त
त्रसर्वत्रप्रमाणंमृग्यं। अन्यदप्याशौचदिनकृत्यंब्रह्मपुराणेभिहितं। यस्ययस्यतुव
र्णस्ययद्यत्स्यात्परिविनिर्गतं। एतच्चवस्त्रशुद्धिंचगृहशुद्धिंकारोत्यपि। समाप्यदशा
मंपिंडंयथाशास्त्रमुदाहृतं। ग्रामाद्बहिस्ततोगत्वाप्रेतस्पृष्टंतुवाससी। अंत्यानाम

त्रि॰टि श्रितानां च यत्कास्त्रानैकरोति च। श्मश्रुलोमनखानां च यत्स्यान्नेतत्र इत्यपि। गौरस
१६१ र्षपकल्केन तिलकल्कैः संयुतं। शिरःस्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः। वासोयुग्मं
नवं शुक्लमव्रणां स्पृष्ट्वा हेम वच। गृहीत्वा गां सुवर्णं च मंगलानि शुभानि च। स्पृष्ट्वा संकी
र्तयित्वा च पश्चात्कुर्याद्वैनरः इति। अत्र चापार्थं। अत्र शावाशौचे स्नानं सामान्यतः स्म
तावुक्तं शांतिस्वस्त्ययनादिविशेषतः स्वगृह्ये भणितं नैरंभणितं वान्यगृह्ये भणितं नैर
र्थविदित्वा शुभार्थं कृत्वा अशुभभयपरिहारार्थमानेन विशेषतः श्वत्रातिमरणसूचिन १६१
भावमनिष्टातुल्यत्येयशुभार्थं च भूसुरेभ्यो ब्राह्मणेभ्यो दीयत इति दानं हिरण्यादि दद्यात्।

तथा च हारीतः। ग्रामे कृत्स्नमरणं गत्वा कृतश्मश्रुकर्माणः स्पृष्ट्वा सुत्सुज्य तिलकल्कैर्वस्त्र
क्षगौरसर्षपैः सशिरःस्नात्वा अहतवाससः शुक्लवाससो वा अग्निं स्पृष्ट्वा हिरण्यदीनालभ्य च
विशेषेण शांतिं कृत्वा श्वोभूते एकान्तेहि हंसप्रदाय स्वस्त्ययनादि धर्मार्थान्वर्त्तयतीति। श्वोभू
विशेषेण शांतिं कृत्वा श्वोभूते एकान्तेहि हंसप्रदाय स्वस्त्ययनादि धर्मार्थान्वर्त्तयतीति। श्वोभू
त इति शांतिं कृत्वेत्यत्र ऋषिसंवध्यते। विष्णुरपि। तत्र शांतिं कृत्वा ब्राह्मणानां पूजनं देवाः प
रोक्षदेवाः प्रत्यक्षदेवा ब्राह्मणा इति। अत्र च यदाशौचान्ते दिन एव शांतिकमुक्तं तमेव नि
सूक्तप्रकारेण दृष्टव्यं पश्या। श्वोभूतेऽग्निमुपसमाधाय शांत्युदकं कुर्यादिति। शंनो देवीरिति
सूक्तेन प्रथमं। द्वाभ्यां द्वितीयं शंनो देवीरभिष्टय इति शंन इंद्राग्नी। तदस्त्वा मित्रावरुणेति तृतीयं

त्रि·टी· शंनोधातेंद्रजीवयास्मात्को शान्तथिवीशांतिरिति चतुर्भिश्च तुर्थ। उभयतः सर्वत्र सावित्री
१६२ शांतिंकुर्यात्। तृतीयेशर्करांकुलस्थं वसत्र्येनाचम्पनिष्ठीवेत। विवस्वानिंद्रभिसूक्तं। द्या
मरात्रेकेशश्मश्रुलोमनखानिवापयित्वा आत्मनः शांतिनिमित्तं शांत्युदकंकुर्यादयुग्मा
न्ब्राह्मणान्भोजयेदिति। दशमरात्र इतिवापयित्वेत्यनेनैव संबध्यते न शांत्युदकं कुर्यादि
त्येनेन। श्वोभूते दशपक्रमे तस्याशौचान्तरदिने कर्तव्यतोक्तेः गुरूणामि मतान्यतो वा
पक्षीयमाणाक्रमावास्यायां शांतिकर्मकुर्वीरन्निस्याघाश्वलायनाद्युक्त प्रकारेणानुत्रा १६२
शौचान्तरं यथाकालं द्रष्टव्यं। पंचकत्रिपादृक्षमरणादौ चदाहप्रकारः सतकांतेच शांतिक

[redacted] विशेषप्रकारो
ब्रह्मपुराणाद्यक्तो द्रष्टव्यः २९ दत्वाशेषुः। सपिंडाः पिंडं दत्वा एकः पुत्रादिः साक्षाद्न्ये
चतत्सः हाय्माचारेणनपरंपरया प्रथमदिने पिंडदानं कृत्वा स्नानोदकदानादि च कृत्वा परे
३४ ऽसपिंडा अपियेशावंन्नसपिंडं वहंति स्नापयंत्यलंकुर्वंति वा ते च प्रशमितमनसः अन्येषु
तत्रैरितिहासैः पुत्रादीनां विशोकीकृतमनसः पुत्रादयश्च तेभ्यः कृतेरितिहासैर्विवेकेन
विशोकीकृतस्वमनसः ततः दिवामरणे नक्षत्रोदयपर्यंतं रात्रिमरणे सूर्योदयपर्यंतं वहि
रेवमृदुष्णादूलभ्रंशो वस्त्रशोषणादिकुर्वतः स्थित्वा कनीयः पुरःसराः तस्यमृतस्य पुत्रा

Indira Gandhi National
Centre for the Arts

त्रि॰टी॰ देर्वाविरमद्रजित्वान्त्रस्यतद्देश्मनोद्वार्येवस्थित्वानिंवपत्राणिविदश्यदशनैःएवंउपित्वानंतु
भक्षयित्वात्मकाश्चाचम्यअग्मंबुदूर्वांकुरवरहृषभान्अक्षतान्यवादीन्गोमयंसिद्धा
१६३ र्थान्वोःसर्षपांस्तैलंचसंस्पृश्याथदृषदिद्वारपाषाणेपदमेकंन्यस्यप्रविश्यानंतुनापुच्छे
घसर्वेसपिंडादयस्तद्देश्मविशेयुः।प्रविशेयुःकनीयःपुरःसराएवातथाचयाज्ञवल्क्यः
।कृतोदकान्समुत्तीर्णान्मृदुशाड्वलसंस्थितान्।स्नातानपवदेयुस्तानितिहासैःपुरा
तनैः।मानुष्येकदलीस्तंभनिःसारेइत्यादिक्रियाःकार्याःस्वशक्तितःइत्यंतं।इतिसंश्रि १६३
त्तगछेयुर्गृहंबालपुरःसराः।विदश्यनिंबपत्राणिनियताद्वारिवेश्मनः।आचम्याग्न्यादि

सलिलंगोमयंगौरसर्षपान्।प्रविशेयुःसमालभ्यकृत्वाश्मनिपदंशनैः।प्रवेशना
दिकंकर्मप्रेतसंस्पर्शिनामपि।इच्छतांतत्क्षणाच्छुद्धिःपरेषांस्नानसंयमादिति।
शंखः।दूर्वाप्रवालमग्निंवृषभंचेति।अस्थलापनः।आसतंआनक्षत्रदर्शनादादि
त्यस्यवादृश्यमानेप्रविशेयुःकनिष्ठप्रथमाज्येष्ठजघन्याःप्राप्यागारमश्मानमग्निं
गोमयमक्षतांस्तिलानपउपस्पृशंतीति।अवधिद्वयस्यचव्यवस्थोक्तापारस्करेण।
प्रेतस्पर्शिनोनग्रामंप्रविशेयुरानक्षत्रदर्शनाद्रात्रौचेदादित्यस्येति।हारीतेननाव
हृहिः।छिन्नशाखावत्कम्मोप्युक्तः।ब्राह्मणानुमत्यावेति।अशुभस्पर्शस्याप्लावनो

नः पदनिधानरूप एव एकं मूलकल्पनालाघवात्। पारस्करः। निवेशनद्वारे पिचुमंद
प[redacted]त्रालि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपांस्तैलमालभ्याश्मानमाक्रम्य
प्रविशेयुरिति। वैजवापेन तु केषांचिदालंभे मंत्राश्च प्युक्ताः। शमीमालभन्ते शमीपा
पं शमयत्विति। अश्मानमालभन्ते अश्मेव स्थिरो भूयासमिति। अग्निमग्निर्नः शर्म
यच्छत्विति। मूले च शमीति लाउपलक्षिता दृष्टव्याः। यस्तु विप्रः शुध्यत्यपः स्पृष्ट्वा 
क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः इति मनूक्तो वा
यायुधादिस्पर्शः सन्त्राशौचोत्तरदिने शुध्यतीत्यभिधानादित्युक्तं। दशमपिंडमुत्स

ज्य रात्रिशेषे शुचिर्भवेदित्येतत्तु एकादशाहिकश्राद्धांगब्राह्मणनिमंत्रणादिविषयं
। एवं चाशौचांत्यदिनकर्तव्यमध्येपहाहनादिस्पर्शलिखनं वाचस्पत्यादीनां तद्ग्रंथा
। आशौचांत्यदिने पिंडानोत्तरं गोहिरण्यादिस्पर्श उक्तः। एकादशाहादिकर्तव्यं वा
न्यतो वगंतव्यमित्यधिकस्तु परस्यते। कामेषुवेदरसभूमिमिते शकाह्वे चैत्रासिते हरितिथौ र
घुनाथनामा।। रामेशसूरिसुतमाधवविदुजन्मा टीकां समापयदिमां स्मृतिपारदृश्वा
१ अहं समशोकमग्नस्य कृत्स्नमेतस्मिन्नतिदुःशके। यस्मात्मागमनेन च हेतुर्गुरुरूपे च मे
२ नत्वहो पदमक्रियामपन चेदीप्सोत्तरारोपमहावनाशुकं यं पास्तापदिनामारो

त्रि·टी·

पर्यंतेन किं। दृष्टं वस्त्वपि तद्विधेने द्विजडैरध्यस्तदोषं न वा सर्वेपीदृश एवेनानुस
भवेघोवेदृनत्वंस्त्वलु ३५०० इति श्रीमत्सद्वाक्यप्रमाणतममहामहोपाध्यायभट्ट
माधवसुतभट्टविश्वनाथानुजभट्टरघुनाथनिर्मिता त्रिंशच्छ्लोकविवृतिः संपूर्णा।।
।। ।।श्री संवत १८३१ फाल्गुणमासे शुक्लपक्षे रविवासरे चतुर्थीयां।। ।।



Indira Gandhi National
Centre for the Arts